Digitized by Madhuban Trust, Delhi

RSVP Series No:184

# वैखानसागमकोशः

# VAIKHĀNASA ĀGAMA KOŚA

## Volume IX



RASHTRIYA SANSKRIT VIDYAPEETHA
(Deemed University)
TIRUPATI
2008

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

RSVP 184

# वैखानसागमकोशः
# VAIKHĀNASA ĀGAMA KOŚA
Volume IX

Digitized by Madhuban Trust

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

# वैखानसागमकोशः

## नवमं सम्पुटम्

## ८. स्नपनप्रकरणम्

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठग्रन्थमाला - १८४

# वैखानसागमकोशः

नवमं सम्पुटम्

## ८.स्नपनप्रकरणम्

सम्पादकौ
आचार्यः लक्ष्मीनरसिंहभट्टः
आचार्यः हयवदनपुराणिकः

संस्कृतसारस्य आङ्ग्लानुवादकः
आचार्यः पि. प्रभाकर आप्टे

राष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः)
तिरुपतिः

२००८

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

राष्ट्रियसंस्कृतविद्यापीठग्रन्थमाला -१८४

**वैखानसागमकोशः - नवमसम्पुटम्**

**८. स्नपनप्रकरणम्**

**प्रथमसंस्करणम् : २००८**

**प्रतिकृतयः : १०००**

© सर्वाधिकारः राष्ट्रियसंस्कृतविद्यापीठेन स्वायत्तीकृतः

प्रकाशकः -

**अनुसन्धानप्रकाशनविभागः**

राष्ट्रियसंस्कृतविद्यापीठम्

(विश्वविद्यालयानुदानायोगस्य १९५६ धारायाः तृतीयानुभागेन संस्थापितः)

तिरुपतिः ५१७ ०६४, आन्ध्रप्रदेशः, भारतम्

मुद्रणाय सज्जीकृतः -

**आगमकोशपरियोजना**

राष्ट्रियसंस्कृतविद्यापीठम्

तिरुपतिः ५१७ ०६४

**मूल्यम् : रू. 225**

**मुद्रकः** स्टूडेण्ट अफ्सेट्, बालाजी कलोनी, तिरुपति

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

RASHTRIYA SANSKRIT VIDYAPEETHA, TIRUPATI SERIES NO.184

# VAIKHĀNASA ĀGAMA KOŚA

## Volume IX

# 8. Snapana Prakaraṇam

*Editors*

**PROF. LAKSHMINARASIMHA BHATTA**

**PROF. K. HAYAVADANA PURANIK**

*Translation of Sanskrit Summary into English*

**PROF. P. PRABHA KARA APTE**

राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः
(मानितविश्वविद्यालयः)

**RASHTRIYA SANSKRIT VIDYAPEETHA**

**(Deemed University)**

**TIRUPATI**

**2008**

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

RSV Series No : 184

**VAIKHĀNASA ĀGAMA KOŚA** - Volume IX

**8. Snapana Prakaraṇam**

**First edition : 2008**
**No of copies : 1000**

© all rights reserved by R.S. Vidyapeetha, Tirupati, A.P.

Published by
**Research & Publications Department**
Rashtriya Sanskrit Vidyapeetha
(University established under section 3 of UGC Act, 1956)
TIRUPATI - 517 064, A.P., INDIA
Website : www.rsvidyapeetha.ac.in

Prepared by
**ĀGAMA KOŚA PROJECT**
Rashtriya Sanskrit Vidyapeetha
TIRUPATI - 517 064 (A.P.)

**Price : Rs.** 225

**Printed at :** Students Offset, Balaji Colony, Tirupati

Data Correction & DTP - N. Venkata Ramana Prasad.
The book has been set-in pages in Computer Unit, Agama Kosa Project.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

Grams: Vidyapeetha

Rashtriya Sanskrit Vidyapeetha
(University established under sec.3 of UGC Act, 1956)
Tirupati- 517 064 (A.P.)
(Accredited with A+ Grade by NAAC)

Prof. Harekrishna Satapathy
Vice-Chancellor

Tel/Fax: 0877 - 2287680
(O) 2287838
(R) 2287826
E-mail : hks_vc@yahoo.com

*" Centre of Excellence in the Subject of Traditional Sastras"*

## FOREWORD

It is a matter of immense pleasure to note that the press copy of the IX volume of Agama Kosa has been nealty prepared within a short span of period, from the publication of its VIII volume. The meticulous efforts, made by the officials deserve our special appreciation. While congratulating them on their success in achieving the targets within the stipulated time-frame as per the planning of the project, I would hope that the rest of the volumes as planned are prepared and brought out as early as possible, since the publications of this project have been in heavy demands both in national and international markets of scholars and researchers.

**'Agama'** is an important branch of Sanskrit literature that mainly deals with the mysterious ritualistic procedueres and implications of various deities and this system has been in existence from time immemorial ever since the dawn of the human civilization. As regards the antiquity and authenticity of the Agamas, it is told that -

आगतं पञ्चवक्त्रात्तु गतं च गिरिजानने ।
मतं च वासुदेवस्य तस्मादागममुच्यते ॥

The seven salient features of the Agama are as follows -

सृष्टिश्च प्रलयश्चैव देवतानां तथार्चनम् ।
साधनं चैव सर्वेषां पुरश्चरणमेव च ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



षट्कर्मसाधनं चैव ध्यानयोगश्चतुर्विधः ।
सप्तभिर्लक्षणैर्युक्तं त्वागमं तद्विदुर्बुधाः ॥

Agamas are of various types and the Vaikhanasa Agama explains significant aspects of rituals performed in Shri Venkateswara Temple Tirumala and many other temples, in India and abroad which are governed by rules of Vaikhanasa Agama.

The present volume-IX of Vaikhanasa Agama narrates in detial regarding the necessity and types of **"Ablution"** performed to the deity in Vaishnava tradition of worship in the temples. There are fifteen important aspects of ablution that have been elaborately narrated in this volume. These are :

1) Types of ablution 2) Construction of Ablutional Chamber etc. 3) Collection of Ablutional Materials 4) Arrangement of the pitchers containning the Ablutional Ingredients 5) Placing God in Reclining posture 6) Worship of the Ablutional Material deties 7) Procedure of Ablution 8) Ablution of the icon of the stationary image 9) Ablution with twenty-five pitchers 10) Thousand-pitcher-Ablution 11) Pure-Water-Ablution 12) Sprinkling of Five-cow-product 13) Ablution with penta-cow-product 14) Ablution with (water containing)) Penta-nector-items 15) Mega-Ablution.

While dealing with all these demensions of temple-culture and ritulas as per Vaikhanasa Agama rules, the scholars engaged in preparing the encyclopaedia have referred to so many related treatieses, collected the materials and incorporated all these materials in the present volume. Hence, it goes without saying that the conerned volume will go, in long way, in helping the scholars, readers and researchers, in various ways. This will aslo cater to the needs of the students and learners who desire to know the basic principles of Agama Shastras particulars in respect of

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



**"Ablution"**. I am sure, the present volume will also earn the appreciation of all concerned as the previous ones, because of its preparation and presentation in a most co-ordinated and systematic manner.

Once, again I congratulate all the scholars and editors, including Prof. L.N. Bhat, for the their pioneering work and wish the publication all success.

30.9.08
Tirupati

**(H.K. SATAPATHY)**
**Vice-Chancellor**

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

**Rashtriya Sanskrit Vidyapeetha; Tirupati(A.P)**
(University established u/s.3 of UGC Act, 1956)

# आगमकोशपरियोजना

## Āgama Kośa Project

---

# उपोद्घातः

संविदितमेवेदं समवगतसर्वशास्त्राणां सङ्ख्यावतां समेषां यदत्र निसर्गकरुणावरुणालयस्य श्रुतिशिरसि विदीप्तस्य च भगवतः श्रीनिवासस्य राजधान्यां तिरुपतौ संस्कृतं संस्कृतिं च प्रतिष्ठापयितुं केन्द्रसर्वकारेण संस्थापितमिदं राष्ट्रियसंस्कृतविद्यापीठमासंस्थापनान्निगमागमशास्त्रसंरक्षणदीक्षम् अभिनवप्रयोगशीलं संस्कृतमातरं संसेवमानं भारते स्थेयसीं प्रतिष्ठामध्यास्त इति।

अध्यात्मचिन्तनप्रधानेऽस्मिन् भारतवर्षे सकललोकोज्जीवनाय प्रवृत्तानां तन्त्रापराभिधानानामागमानां निरन्तरप्रचारः अनादेः कालात्प्रवर्तते। अविच्छिन्नगुरुशिष्यपरम्परया आगतो ग्रन्थसन्दर्भ आगमपदेनाभिधीयते। यद्यप्याचार्यमुखादधीत्य वेदानधिगच्छन्ति शिष्या इति वेदा अप्यागमशब्देन व्यवह्रियन्ते तथापि चिरादस्मत्पूर्वजाः वेदान् निगमशब्देन विग्रहाराधनप्रतिपादकानि तन्त्राण्यागमशब्देन च व्याजह्रुः।

भारतीयसंस्कृतिनिधेः वेदस्योपबृंहणाय प्रवृत्ताः शिवविष्ण्वादीनामाराध्यदेवानां पारम्यं प्रतिपादयन्तश्चागमाः शैवशाक्तवैष्णवभेदेन त्रेधा भिद्यन्ते। तत्र शैवागमाः कापालकालामुखपाशुपतशैवभेदेन चतुर्धा भवन्ति। तत्र शैवभेदः पुनः वाम-दक्षिण-सिद्धान्तभेदेन त्रिधा। दक्षिणभेदे अन्तर्भूतानां काश्मीरागमानामुत्तरदेशेष्वेव प्रचुरः प्रचारः, शैवसिद्धान्तागमानां तु दक्षिणदेशेष्वेव प्रचारः। शैवागमाः शिवपारम्यं शिवपूजादिकं च प्राधान्येन प्रतिपादयन्ति। शाक्तागमा दक्षिणाचारवामाचारभेदेन द्विविधा भवन्ति। दक्षिणाचारः प्रायेण वैदिकमार्गानुसारी। वामाचारस्तु वैदिकमार्गपरिभ्रष्ट इति वदन्ति। उभयेऽपीमे शक्तिपारम्यं शक्तिपूजादिकं च विशेषतः प्रतिपादयन्ति। वैष्णवागमाश्च वैखानसपाञ्चरात्रभेदेन द्विविधा भवन्ति। उभयेऽपीमे विष्णुपारम्यं विष्णुपूजादिकं च प्राधान्येन प्रतिपादयन्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



पाञ्चरात्रागमाः पुनर्भगवता नारायणेन स्वयमुपदिष्टाः दिव्याः , मुनिभाषिता आप्तोक्ता अदिव्या इति द्विविधाः।

भगवता विखनसा भृग्वत्रिमरीचिकाश्यपेभ्यश्चतुर्भ्यः उपदिष्टः तैश्च प्रचारं नीतः वैखानसागमः।

शैव-वैष्णवाद्यागमानां विषयप्रधानाः आगमकोशग्रन्थाः समेषामागमतत्त्वावबोध-कुतूहलिनां महते उपकाराय कल्पन्त इति विद्यापीठसंस्थापकनिदेशकानां डा. बि. आर्. शर्ममहोदयानामभिसन्धिमनुरुध्य तदानीन्तनेन तिरुपतिकेन्द्रीयसंस्कृतविद्यापीठसंघेन (Kendriya Sanskrit Vidyapeetha Tirupati Society) विमर्शनिपुणानामन्ताराष्ट्रियख्यातिभृतां विद्यापीठसंघाध्यक्षाणां डा. वि. राघवन् महोदयानामाध्यक्ष्ये संशोधनप्रकाशनसमितिः व्यवास्थाप्यत यस्यां संशोधनप्रकाशनमर्मज्ञाः डा. एस् . एम् . कत्रे , डा. पि. एल् . वैद्य, डा. आर्येन्द्रशर्मा , डा.बि. आर् . शर्मा इत्येवं विश्वविख्याताः विद्वांसः सदस्या आसन् । तेषां मार्गदर्शनमनुरुध्य विद्यापीठस्य अनुसन्धानप्रकाशनविभागस्य विद्वद्भिः क्रिस्तूत्तरचतुःषष्ट्यधिकनवशतोत्तरैकसहस्रतमवत्सरतः क्रिस्तूत्तरषडशीत्यधिकनवशतोत्तरैकसहस्रतमवत्सरं यावत् (1964 -1986 A.D) उपलभ्यमानेभ्यः वैखानसपाञ्चरात्रागमग्रन्थेभ्यः, कतिपयेभ्यः शैवागमग्रन्थेभ्यश्च आगमकोशोपयोगिनो विषयाः सङ्कलिताः संशोधिताश्च।

तैर्विद्वद्भिःसङ्कलिताःसंशोधिताः अपेक्षिताश्च वैखानसागमग्रन्थभागाः वैखानसागम-कोशसम्पुटेषु समावेश्यन्त समावेशयिष्यन्ते चेत्येतदत्राविस्मरणीयमास्ते।

समापितविषयसङ्कलनेभ्यो वैखानसागमग्रन्थेभ्य उद्धृतं वैखानसागमकोशस्य प्रथमं सम्पुटं त्रिनवत्यधिकनवशतोत्तरैकसहस्रतमे (1993) क्रैस्तवीयसंवत्सरे विद्यापीठेन प्रकाशितम् । निरवरोधं पुनरागमकोशकार्यस्य निर्वर्तनाय विद्यापीठे आगमकोशपरियोजना मानवसंसाधनविकासमन्त्रालयेन द्व्यधिकद्विसहस्रतमे क्रिस्तुवत्सरे (2002) भूयः प्रकल्पिता।

बेरनिर्माण - बेरप्रतिष्ठा - नित्यार्चन-उत्सवप्रकरणगतविषयविशेषाः वैखानसागम-कोशस्य द्वितीयसम्पुटमारभ्य अष्टमसम्पुटपर्यन्तभागेषु प्रकाशिताः। सम्प्रति वैखानसागमकोशस्य नवमे सम्पुटे स्नपनप्रकरणस्य विषयविशेषाः उपस्थाप्यन्ते।

किञ्च आगमशास्त्रानुरागिणां विदुषां सुखावबोधाय विविधशीर्षकगतविषयविशेषाणां सारः सम्पुटेऽस्मिन् पृथक् संयोजितः। अधिगताङ्ग्लभाषाणां जिज्ञासूनां कोशगतसंस्कृत-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



सारभागस्य सुबोधार्थं आङ्ग्लभाषयाऽनूदितः सारभागोऽपि अत्र सन्निवेशितो विराजते। एतत्कोशनिर्माणप्रकारविषये तथा क्लिष्टाया आगमशास्त्रीयभाषायाश्च विषये प्रथमसम्पुटे एव विस्तृततयोक्तमेवेति नात्र प्रतन्यते।

वैखानसागमकोशस्य निर्माणकार्ये उपकृतवद्भ्यः विद्यापीठस्य अनुसन्धानप्रकाशन-विभागस्थतदानीन्तनसूरिभ्यः श्रीमद्भ्यः डा. एम् . डि. बालसुब्रह्मण्यम् , डा. मुरलीधरपाण्डेय, डा. आर्. महादेवन्, डा. वि. स्वामिनाथन्, डा. पि. पि. आपटे, डा. यु. शङ्करभट्ट, डा. राघवप्रसाद चौधरी, लक्ष्मीनरसिंहभट्ट, ए. श्रीनिवास अय्यंगार् , पं. के. शठकोपाचार्य, डा. एन्. एस्. रामानुजताताचार्य, के. ए. बालसुब्रह्मण्यम् , डा. उमारमण झा, यशपालखजूरिया, ड़ा.जयप्रसादबलोधी, डा. टि. जि. अनन्तसुब्रह्मण्यम् , एम्. ए. भट्ट, के. रघुनाथन्, श्रीराममिश्र, डा. के. हैमवतीशम् , डा. के. ई. गोविन्दन् , एम्. सायिरामसुब्रह्मण्यशर्मा, सि हेच् . पि. सत्यनारायण, एस्. सुब्बय्य संज्ञकेभ्यः शतशो धन्यवादान् वितरावः।

वैखानसागमकोशस्य नवमसम्पुटस्य प्रकाशने उपकृतवद्भ्यः प्राच्यप्रतीच्योभय-विद्याविभासुरेभ्यः साहित्यादिविविधशास्त्रकुशलेभ्यः कुलपतिभ्यः आचार्येभ्यः हरेकृष्णशतपथि महोदयेभ्यः, कुलसचिवेभ्यः आचार्येभ्यः ए. गुरुमूर्तिमहोदयेभ्यश्च आधमर्ण्यं प्रकटयावः।

ईक्ष्य (प्रूफ) संशोधने सहायकः डा. सुधांशु शेखर महापात्रमहोदयः साधुवादेन स्मर्यते सादरम् । वैखानसकोशग्रन्थस्यास्य टङ्कनकर्मणि तथा पुस्तकसमीकरणकार्ये च सहकृतवन्तं श्री एन् . वेङ्कटरमणप्रसाद्-नामानमाशीर्भिः योजयावः।

जगज्जीवातोः श्रीनिवासस्य कृपया वैखानसागमकोशस्य नवमं सम्पुटमिदं व्युत्पित्सूनाम् आगमतत्वकौतुकिजनानां विदुषां च बहूपकाराय स्यादिति मन्वहे।

तिरुपतिः
दिनाङ्कः २०.१.२००८

आचार्यः लक्ष्मीनरसिंहभट्टः
आचार्यः हयवदनपुराणिकः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

# सूचीपत्रम्


FOREWORD ... 7

उपोद्घातः ... 10

सूचीपत्रम् ... 13

विशिष्टविषयसूची ... 14

स्नपनप्रकरणे विषयविशेषाणां सारः ... 25

SUMMARIES ... 51

वैखानसागमकोशे परामृष्टानां ग्रन्थानां सङ्केताः ... 107

**स्नपनप्रकरणम् ... 1 - 195**

१. स्नपनप्रभेदाः ... 3

२. स्नपनालयादिकल्पनम् ... 25

३. स्नपनसम्भारसङ्ग्रहणम् ... 39

४. स्नपनद्रव्यन्यासः ... 99

५. स्नपनपूर्वरात्रौ देवशायनम् ... 117

६. स्नपनद्रव्यदेवार्चनम् ... 124

७. स्नपनप्रयोगः ... 132

८. ध्रुवार्चाबेरस्नपनम् ... 151

९. पञ्चविंशतिकलशस्नपनम् ... 155

१०. सहस्रकलशस्नपनम् ... 160

११. शुद्धस्नपनम् ... 170

१२. पञ्चगव्यप्रोक्षणम् ... 181

१३. पञ्चगव्यस्नपनम् ... 183

१४. पञ्चामृतस्नपनम् ... 186

१५. महाभिषेकः ... 188


CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

# विशिष्टविषयसूची


| | १. स्नपनप्रभेदाः | | पृ |
|---|---|---|---|
| ८.१.१ | देवेशस्य स्नपने निमित्तानि | ... | ३ |
| ८.१.२ | प्राप्ते स्नपननिमित्ते स्नपनस्य लोपे फलम् | ... | ६ |
| ८.१.३ | निमित्तद्वयसन्निपाते स्नपनकालनिर्णयः | ... | ६ |
| ८.१.४ | स्नपनस्य कालविवेकः | ... | ७ |
| ८.१.५.० | स्नपनत्रैविध्यम् नित्यादिभेदेन | ... | ७ |
| ८.१.५.१ | स्नपनं नित्यम् | ... | ७ |
| ८.१.५.२ | स्नपनं नैमित्तिकम् | ... | ८ |
| ८.१.६ | स्नपनं काम्यम् | ... | ८ |
| ८.१.७ | नित्यस्नपनस्य द्वैविध्यम् | ... | ८ |
| ८.१.८ | द्विविधनित्यस्नपनस्य विषयविवेकः | ... | ८ |
| ८.१.९ | नित्यपूजानैमित्तिकस्नपनयोर्युगपत्प्राप्तौ कर्तव्यक्रमः | ... | ९ |
| ८.१.१० | स्नपनस्य त्रैविध्यं श्रेष्ठादिभेदेन | ... | ९ |
| ८.१.११ | स्नपनस्य नवविधत्वम् | ... | ९ |
| ८.१.१२.० | अधमाधमं स्नपनम् | ... | ९ |
| ८.१.१२.१ | अधममध्यमं स्नपनम् | ... | १० |
| ८.१.१२.२ | अधमोत्तमं स्नपनम् | ... | १० |
| ८.१.१२.३ | मध्यमाधमं स्नपनम् | ... | ११ |
| ८.१.१२.४ | मध्यममध्यमं स्नपनम् | ... | ११ |
| ८.१.१२.५ | मध्यमोत्तमं स्नपनम् | ... | १२ |
| ८.१.१२.६ | उत्तमाधमं स्नपनम् | ... | १३ |
| ८.१.१२.७ | उत्तममध्यमं स्नपनम् | ... | १३ |
| ८.१.१२.८ | उत्तमोत्तमं स्नपनम् | ... | १४ |


CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi




| | | | |
|---|---|---|---|
| ८.१.१३ | अशक्तानां स्नपनं नवविधम् | ... | १५ |
| ८.१.१४ | अशक्तानाम् अधमाधमं स्नपनम् | ... | १५ |
| ८.१.१५ | अशक्तानाम् अधममध्यमं स्नपनम् | ... | १५ |
| ८.१.१६ | अशक्तानाम् अधमोत्तमं स्नपनम | ... | १५ |
| ८.१.१७ | अशक्तानां मध्यमाधमं स्नपनम् | ... | १५ |
| ८.१.१८ | अशक्तानां मध्यममध्यमं स्नपनम् | ... | १६ |
| ८.१.१९ | अशक्तानां मध्यमोत्तमं स्नपनम् | ... | १६ |
| ८.१.२० | अशक्तानाम् उत्तमाधमं स्नपनम् | ... | १६ |
| ८.१.२१ | अशक्तानाम् उत्तममध्यमं स्नपनम् | ... | १६ |
| ८.१.२२ | अशक्तानाम् उत्तमोत्तमं स्नपनम् | ... | १७ |
| ८.१.२३ | स्नपनस्य द्वैविध्यम् भद्रक्षुद्रभेदेन | ... | १७ |
| ८.१.२४ | भद्रस्नपनम् उत्तमोत्तमादिभेदेन नवविधम् | ... | १७ |
| ८.१.२५ | त्रिविधं क्षुद्रस्नपनमुत्तममध्यमाधमभेदेन | ... | १९ |
| ८.१.२६ | प्रतिष्ठाङ्गं सप्तकलशस्नपनम् | ... | २० |
| ८.१.२७ | शुद्धस्नपननिमित्तानि | ... | २१ |
| ८.१.२८ | नित्यार्चनाङ्गं शुद्धस्नपनम् | ... | २१ |
| ८.१.२९ | उत्सवपूर्वाङ्गस्नपनम् | ... | २२ |
| ८.१.३० | उत्सवाङ्गमवभृथस्नपनम् | ... | २२ |
| ८.१.३१ | पञ्चामृतस्नपननिमित्तानि | ... | २४ |


## २. स्नपनालयादिकल्पनम्


| | | | |
|---|---|---|---|
| ८.२.१ | स्नपने स्नपनालयादिकल्पनम् | ... | २५ |
| ८.२.२ | स्नपने ऋत्विग्वरणम् | ... | ३८ |


## ३. स्नपनसम्भारसङ्ग्रहणम्


| | | | |
|---|---|---|---|
| ८.३.१ | स्नपने अङ्कुरार्पणम् | ... | ३९ |
| ८.३.२ | अङ्गचतुष्टययुक्तस्य स्नपनस्य पुष्कलत्वम् | ... | ३९ |


CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi




| | | | |
|---|---|---|---|
| ८.३.३ | स्नपनार्थं सम्भारसङ्ग्रहणम् | ... | ४० |
| ८.३.४ | स्नपनोक्तानि प्राग्द्रव्याणि | ... | ४० |
| ८.३.५ | अष्टविधायाः मृदः सङ्ग्रहणम् | ... | ४१ |
| ८.३.६ | अष्टविधाया मृदः अलाभे प्रतिनिधिः | ... | ४२ |
| ८.३.७ | मृदा स्नापने फलम् | ... | ४२ |
| ८.३.८ | स्नपने मृल्लोपे फलम् | ... | ४२ |
| ८.३.९ | स्नपनोपयुक्तानामष्टकुलपर्वतानां कल्पनम् | ... | ४३ |
| ८.३.१० | पर्वतप्रदक्षिणफलम् | ... | ४५ |
| ८.३.११ | स्नपने पर्वतलोपे फलम् | ... | ४५ |
| ८.३.१२ | स्नपनोपयुक्तानि धान्यानि | ... | ४५ |
| ८.३.१३ | स्नपने विहितधान्याभावे प्रतिनिधिः | ... | ४६ |
| ८.३.१४ | धान्यस्नापने फलम् | ... | ४७ |
| ८.३.१५ | स्नपने धान्यलोपे फलम् | ... | ४७ |
| ८.३.१६ | स्नपनोपयुक्तानामङ्कुराणामाहरणम् | ... | ४७ |
| ८.३.१७ | अङ्कुरालाभे प्रतिनिधिः | ... | ४८ |
| ८.३.१८ | अङ्कुरैरर्चने फलम् | ... | ४८ |
| ८.३.१९ | अङ्कुरलोपे फलम् | ... | ४८ |
| ८.३.२० | स्नपनोपयुक्तानि अष्टमङ्गलानि | ... | ४८ |
| ८.३.२१ | स्नपनार्थम् अष्टमङ्गलानां कल्पनम् | ... | ४९ |
| ८.३.२२ | अष्टमङ्गलद्रव्यैः पूजने फलम् | ... | ५० |
| ८.३.२३ | अष्टमङ्गललोपे फलम् | ... | ५१ |
| ८.३.२४ | स्नपने प्रधानद्रव्याणि | ... | ५१ |
| ८.३.२५ | पञ्चगव्यादीनां स्नपनद्रव्याणां प्रमाणम् | ... | ५१ |
| ८.३.२६ | गव्यग्रहणे पात्रं प्रशस्तम् | ... | ५२ |
| ८.३.२७ | स्नपने पञ्चगव्यम् | ... | ५२ |
| ८.३.२८ | गव्यानि प्रशस्तानि | ... | ५४ |


CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi




| | | |
|---|---|---|
| ८.३.२९ | श्रेष्ठं घृतम् ... | ५४ |
| ८.३.३० | घृतस्नापनस्य फलम् ... | ५५ |
| ८.३.३१ | घृतलोपे फलम् ... | ५५ |
| ८.३.३२ | स्नपने प्रशस्तं मधु ... | ५५ |
| ८.३.३३ | मधुनः अलाभे प्रतिनिधिः ... | ५६ |
| ८.३.३४ | मध्वादिग्रहणे नियमविधानम् ... | ५६ |
| ८.३.३५ | मधुस्नापने फलम् ... | ५६ |
| ८.३.३६ | मधुलोपे फलम् ... | ५६ |
| ८.३.३७ | स्नपने प्रशस्तं दधि ... | ५७ |
| ८.३.३८ | दधिस्नापनफलम् ... | ५७ |
| ८.३.३९ | दधिलोपे फलम् ... | ५७ |
| ८.३.४० | स्नपने प्रशस्तं क्षीरम् ... | ५७ |
| ८.३.४१ | क्षीरेण स्नापने फलम् ... | ५८ |
| ८.३.४२ | क्षीरलोपे फलम् ... | ५८ |
| ८.३.४३ | स्नपने गन्धोदकम् ... | ५८ |
| ८.३.४४ | गन्धोदकेन स्नापने फलम् ... | ५९ |
| ८.३.४५ | गन्धोदकलोपे फलम् ... | ५९ |
| ८.३.४६ | अक्षतोदकलक्षणम् ... | ६० |
| ८.३.४७ | अक्षतोदकेन स्नापने फलम् ... | ६० |
| ८.३.४८ | अक्षतोदकलोपे फलम् ... | ६१ |
| ८.३.४९ | स्नपने फलोदकस्य लक्षणम् ... | ६१ |
| ८.३.५० | फलोदकेन स्नापने फलम् ... | ६२ |
| ८.३.५१ | फलोदकलोपे फलम् ... | ६२ |
| ८.३.५२ | स्नपने कुशोदकस्य लक्षणम् ... | ६३ |
| ८.३.५३ | कुशोदस्नापनस्य फलम् ... | ६३ |
| ८.३.५४ | स्नपने कुशोदकलोपस्य फलम् ... | ६४ |


CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi




| | | |
|---|---|---|
| ८.३.५५ | स्नपने रत्नोदकस्य लक्षणम् ... | ६४ |
| ८.३.५६ | रत्नोदकस्यालाभे प्रतिनिधिः ... | ६५ |
| ८.३.५७ | रत्नोदकेन स्नापने फलम् ... | ६५ |
| ८.३.५८ | रत्नोदकलोपे फलम् ... | ६५ |
| ८.३.५९ | स्नपने जप्योदकस्य लक्षणम् ... | ६५ |
| ८.३.६० | जप्योदकेन स्नापने फलम् ... | ६७ |
| ८.३.६१ | स्नपने सर्वौषध्युदकस्य लक्षणम् ... | ६७ |
| ८.३.६२ | सर्वौषध्युदकेन स्नापने फलम् ... | ६८ |
| ८.३.६३ | सर्वौषध्युदकलोपे फलम् ... | ६८ |
| ८.३.६४ | उष्णोदकस्य लक्षणम् ... | ६८ |
| ८.३.६५ | उष्णोदकलोपे फलम् ... | ६८ |
| ८.३.६६ | उपस्नानलोपे फलम् ... | ६९ |
| ८.३.६७ | पञ्चगव्यादीनां स्नपनद्रव्याणां प्रमाणम् ... | ६९ |
| ८.३.६८ | स्नपनद्रव्यमानादीनां खिलाधिकारोक्तनामतिदेशः ... | ६९ |
| ८.३.६९ | स्नपनोपयोगीन्यनुद्रव्याणि ... | ६९ |
| ८.३.७० | पुण्यपुष्पैरर्चने फलम् ... | ७२ |
| ८.३.७१ | पुण्यपुष्पलोपे फलम् ... | ७२ |
| ८.३.७२ | स्नपने उद्वर्तनचूर्णम् ... | ७३ |
| ८.३.७३ | श्रीवेष्टकादि चूर्णस्यालाभे प्रतिनिधिः ... | ७४ |
| ८.३.७४ | उद्वर्तनचूर्णार्पणे फलम् ... | ७४ |
| ८.३.७५ | उद्वर्तनचूर्णलोपफलम् ... | ७४ |
| ८.३.७६ | स्नपने कषायचूर्णम् ... | ७५ |
| ८.३.७७ | कषायोदकस्यालाभे प्रतिनिधिः ... | ७६ |
| ८.३.७८ | कषायोद्वर्तने फलम् ... | ७६ |
| ८.३.७९ | कषायचूर्णलोपे फलम् ... | ७६ |
| ८.३.८० | स्नपने तीर्थोदकाहरणम् ... | ७७ |


CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi




| | | |
|---|---|---|
| ८.३.८१ | स्नपने तीर्थोदकसङ्ग्रहणकाल: … | ७७ |
| ८.३.८२ | तीर्थोदस्नापने फलम् … | ७७ |
| ८.३.८३ | स्नपने वनौषधिचूर्णानि … | ७७ |
| ८.३.८४ | वनौषधिचूर्णेन स्नापने फलम् … | ७९ |
| ८.३.८५ | वनौषधिलोपे फलम् … | ७९ |
| ८.३.८६ | स्नपने हरिद्राचूर्णम् … | ७९ |
| ८.३.८७ | हरिद्राचूर्णस्नापने फलम् … | ८० |
| ८.३.८८ | हरिद्राचूर्णलोपे फलम् … | ८० |
| ८.३.८९ | हरिद्रादीनां चूर्णनप्रकार: … | ८० |
| ८.३.९० | सर्वगन्धचूर्णस्य लक्षणं प्रमाणं च … | ८१ |
| ८.३.९१ | सर्वगन्धमार्जने फलम् … | ८२ |
| ८.३.९२ | स्नपने मूलगन्धस्य लक्षणम् … | ८२ |
| ८.६.९३ | मूलगन्धेनार्चने फलम् … | ८३ |
| ८.६.९४ | मूलगन्धलोपे फलम् … | ८३ |
| ८.६.९५ | प्लोतवस्त्राहरणम् … | ८३ |
| ८.३.९६ | वस्त्रादीनां संग्रहणम् … | ८४ |
| ८.३.९७ | विहितवस्त्रालाभे कर्तव्यक्रम: … | ८५ |
| ८.३.९८ | प्लोतवस्त्रोत्तरीयभूषणलोपे फलम् … | ८५ |
| ८.३.९९ | स्नपने धातूनां सङ्ग्रहणम् … | ८६ |
| ८.३.१०० | धातुभि: अलङ्कारे फलम् … | ८६ |
| ८.३.१०१ | धातुलोपे फलम् … | ८६ |
| ८.३.१०२ | स्नपने प्लोतादीनां सामान्यद्रव्याणामाहरणम् … | ८७ |
| ८.३.१०३ | स्नपने चतुरङ्गभूषणसङ्ग्रहणम् … | ८७ |
| ८.३.१०४ | स्नपने हविरादिसङ्ग्रहणम् … | ८८ |
| ८.३.१०५ | हविर्लोपे फलम् … | ८८ |
| ८.३.१०६ | द्रव्यालाभे प्रतिनिधि: … | ८८ |
| ८.३.१०७ | कलशाद्याहरणम् … | ८८ |


CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi




८.३.१०८ स्नपने द्विविधाः कलशाः ... ९१

८.३.१०९ स्नपनकलशाः वर्ज्याः ... ९१

८.३.११० स्नपनकलशेषु उत्तमादित्रैविध्यम् उपादानद्रव्यानुरोधेन ... ९१

८.३.१११ स्नपनकलशेषु उत्तमादित्रैविध्यं प्रमाणानुरोधेन ... ९१

८.३.११२ लोहजकलशशोधनम् ... ९२

८.३.११३ मृन्मयकलशशोधनम् ... ९२

८.३.११४ प्रधानकलशलक्षणम् ... ९२

८.३.११५ उत्तमादित्रिविधस्नपने प्रधानकलशसङ्ख्या ... ९२

८.३.११६ उपस्नानकलशाः ... ९२

८.३.११७ उत्तमादित्रिविधस्नपने उपस्नानकलशसङ्ख्या ... ९३

८.३.११८ स्नपनकलशसङ्ख्या ... ९३

८.३.११९ स्नपने कलशसंस्कारः ... ९४

८.३.१२० स्नपने कलशादिसंस्कारः ... ९४

८.३.१२१ स्नपने कलशन्यासः ... ९५

८.३.१२२ स्नपने कलशार्चनम् ... ९६

८.३.१२३ स्नपने करकसङ्ख्या ... ९६

८.३.१२४ चषकादिपात्रकल्पनम् ... ९७

८.३.१२५ सप्तविधा दर्भाः ... ९७

८.३.१२६ कूर्चकल्पनम् ... ९७


### ४. स्नपनद्रव्यन्यासः


८.४.१ स्नपनद्रव्यन्यासः ... ९९


### ५. स्नपनपूर्वरात्रौ देवशायनम्


८.५.१ स्नपनागारे भगवदर्चनम् ... ११७

८.५.२ प्रातरादिकालविशेषानुरोधेन स्नपने प्राप्ते आवाहनविसर्जनयोर्विवेकः ... ११७


CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi




८.५.३ कौतुकबन्धनपूर्वकं देवस्य शायनम् ... ११९

८.५.४ रात्रौ स्नपने शयननिषेधः ... १२३

८.५.५ स्वस्थानात् कौतुकदेवीचालननिषेधः ... १२३


## ६. स्नपनद्रव्यदेवार्चनम्


८.६.१ स्नपने मृदादिद्रव्याणामधिदेवतार्चनम् ... १२४


## ७. स्नपनप्रयोगः


८.७.१ स्नानवेद्यां भगवदर्चनम् ... १३२

८.७.२ स्नपनाङ्गहोमः ... १३४

८.७.३ स्नपनप्रयोगः ... १३६

८.७.४ मतान्तरेण स्नपनप्रयोगः ... १४६

८.७.५ देव्योः स्नपनम् ... १४७

८.७.६ स्नपनान्ते आचार्यादिदक्षिणादिदानम् ... १४७

८.७.७ आचार्यादिदक्षिणालोपफलम् ... १४७

८.७.८ स्नपनोपयुक्तद्रव्यविनियोगः ... १४८

८.७.९ स्नपनफलम् ... १४८

८.७.१० महास्नपनफलम् ... १४९

८.७.११ स्नपनसेवाफलम् ... १४९

८.७.१२ स्नापनान्तोत्सवफलम् ... १५०

८.७.१३ स्नपनान्तोत्सवसेवाफलम् ... १५०

८.७.१४ स्नपनान्तोत्सवलोपफलम् ... १५०

८.७.१५ ग्रहणादिपुण्यकालस्नपनफलम् ... १५०

८.७.१६ विष्णुपञ्चदिनस्नपनफलम् ... १५०


## ८. ध्रुवार्चाबेरस्नपनम्


८.८.१ ध्रुवार्चास्नपनविशेषः ... १५१


CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



८.८.२ एकबेरे कौतुके शयनं विना प्रतिसरबन्धपूर्वकं स्नपनविधिः ... १५४

## ९. पञ्चविंशतिकलशस्नपनम्
### (अधमाधमस्नपनम्)

८.९.१ पञ्चविंशतिकलशस्नपनमहिमानुवर्णनम् ... १५५
८.९.२ पञ्चविंशतिकलशस्नपने द्रव्यकलशादिसङ्ख्याविवेकः ... १५५
८.९.३ पञ्चविंशतिकलशस्नपने द्रव्यन्यासः ... १५५
८.९.४ पञ्चविंशतिकलशस्नपने जयाद्यर्चनम् ... १५७
८.९.५ पञ्चविंशतिकलशस्नपने कलशेशार्चनम् ... १५७
८.९.६ पञ्चविंशतिकलशस्नपनप्रयोगः ... १५८

## १०. सहस्रकलशस्नपनम्

८.१०.१ सहस्रकलशस्नपनकालः ... १६०
८.१०.२ सहस्रकलशस्नपने अष्टविधायाः मृदःसंग्रहणम् ... १६०
८.१०.३ अष्टकुलपर्वतानां कल्पनम् ... १६०
८.१०.४ धान्यानामाहरणम् ... १६१
८.१०.५ अष्टमङ्गलकल्पनम् ... १६१
८.१०.६ पञ्चगव्यादिप्रधानद्रव्यणामाहरणम् ... १६१
८.१०.७ पुण्यपुष्पाहरणम् ... १६१
८.१०.८ उद्वर्तनार्थचूर्णाहरणम् ... १६२
८.१०.९ कषयार्थमश्वत्थचूर्णाद्याहरणम् ... १६२
८.१०.१० तीर्थोदकाहरणम् ... १६२
८.१०.११ वनौषधिचूर्णाहरणम् ... १६२
८.१०.१२ हारिद्रचूर्णाहरणम् ... १६२
८.१०.१३ सर्वगन्धचूर्णाहरणम् ... १६३
८.१०.१४ प्लोतवस्त्राहरणम् ... १६३

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



८.१०.१५ मूलगन्धाहरणम् ... १६३
८.१०.१६ भूषणाहरणम् ... १६३
८.१०.१७ अङ्कुरार्पणपूर्वकं द्रव्यस्य ग्रहणम् ... १६४
८.१०.१८ सहस्रकलशस्नपने स्नपनशालानिर्माणम् ... १६४
८.१०.१९ श्वभ्रकल्पनम् ... १६४
८.१०.२० औपासनकुण्डकल्पनम् ... १६५
८.१०.२१ सहस्रकलशस्नपने ऋत्विग्वरणम् ... १६५
८.१०.२२ सहस्रकलशस्नपने पूर्वेद्युः देवशायनम् ... १६५
८.१०.२३ सहस्रकलशस्नपने कलशकल्पनम् ... १६५
८.१०.२४ सहस्रकलशस्नपने द्रव्यन्यासः ... १६६
८.१०.२५ सहस्रकलशस्नपने श्वभ्रे देवस्थापनम् ... १६७
८.१०.२६ सहस्रकलशस्नपने ऋत्विक्पूजनम् ... १६८
८.१०.२७ सहस्रकलशस्नपनाङ्गहोमः ... १६८
८.१०.२८ सहस्रकलशस्नपनानन्तरं देवस्य स्वस्थानप्रापणम् ... १६८
८.१०.२९ सहस्रकलशस्नपने अनुक्तांशाचरणक्रमः ... १६८
८.१०.३० सहस्रकलशस्नपने दक्षिणादानम् ... १६९
८.१०.३१ स्नपनोपयुक्तद्रव्यविनियोगः ... १६९
८.१०.३२ सहस्रकलशस्नपनफलम् ... १६९

**११. शुद्धस्नपनम्**

८.११.१ शुद्धस्नपनप्रयोगः ... १७०
८.११.२ शुद्धस्नपनप्रकारः ... १७२
८.११.३ शुद्धस्नपनप्रयोगः उत्तमकल्पः ... १७५
८.११.४ शुद्धस्नपनप्रयोगः मध्यमकल्पः ... १७९

**१२. पञ्चगव्यप्रोक्षणम्**

८.१२.१ आलयादीनां शुद्ध्यर्थं पञ्चगव्येन प्रोक्षणम् ... १८१

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



८.१२.२ देहशुद्ध्यर्थं पञ्चगव्यप्राशनक्रमः ... १८२

## १३. पञ्चगव्यस्नपनम्

८.१३.१ शुभप्रदानि पञ्चगव्यानि ... १८३
८.१३.२ पञ्चगव्यानां प्रमाणम् ... १८३
८.१३.३ ग्राह्याणि पञ्चगव्यानि ... १८३
८.१३.४ पञ्चगव्यैः भगवतः स्नापनम् ... १८४
८.१३.५ पञ्चगव्यस्नापनफलम् ... १८५
८.१३.६ पञ्चगव्यप्राशनफलम् ... १८५

## १४. पञ्चामृतस्नपनम्

८.१४.१ पञ्चामृतलक्षणम् ... १८६
८.१४.२ पञ्चामृतस्नपनप्रयोगः ... १८६
८.१४.३ पञ्चामृतादिप्राशनफलम् ... १८७
८.१४.४ पञ्चामृतस्नपनफलम् ... १८७

## १५. महाभिषेकः

८.१५.१ महाभिषेकमहिमानुवर्णनम् ... १८८
८.१५.२ महाभिषेककालः ... १८८
८.१५.३ महाभिषेके अङ्कुरार्पणम् ... १८९
८.१५.४ महाभिषेके कूटादिकल्पनम् ... १८९
८.१५.५ भूमण्डलादिकल्पनपूर्वकं भगवतः अभिषेचनम् ... १८९
८.१५.६ महाभिषेकाङ्गं होमः ... १९१
८.१५.७ महाभिषेकानन्तरं मौलिपूजनम् ... १९३
८.१५.८ महाभिषेकफलम् ... १९४

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

# वैखानसागमकोशस्य नवमं सम्पुटम्

# ८. स्नपनप्रकरणम्

## विषयविशेषाणां सारः

### १. स्नपनप्रभेदाः

प्रतिष्ठान्ते उत्सवान्ते विष्णुपञ्चदिने उत्तरायणे गुरुशुक्रोदये गुरुशुक्रास्तमये मासर्क्षे यजमानर्क्षे अन्यसङ्क्रमणेषु दुःस्वप्ने व्याधिसम्बाधे दुर्भिक्षे शत्रुपीडायां भूकम्पेऽशनिपाते, दिग्दाहे पांसुवर्षे देवस्य हसितरुदितस्वेदचलितान्त्यजसूतिकोदक्यास्पर्शेषु मन्दिरान्तः श्वकाककुक्कुटसर्पगोधाप्रवेशेषु अकाले पूर्णचन्द्रचन्द्रक्षययोः गन्धर्वनगरे प्रतिसूर्ये च दृष्टे अनावृष्ट्यल्पवृष्टिषु अन्येषु चोत्पातेषु समुत्पन्नेषु देवस्य स्नपनं कार्यम्। विष्णुपञ्चदिनेषु अयने विषुवद्वये चन्द्रसूर्योपरागे व्यतीपाते प्रतिष्ठान्ते उत्सवान्ते सर्वशान्त्यर्थं च देवदेवस्य पञ्चामृताभिषेकः कार्यः। निमित्ते प्राप्तेऽपि स्नपनाकरणे राष्ट्रे सर्वत्रात्याहितं भवेत्।

एकस्मिन् मासे नक्षत्रयुग्मं स्याच्चेत् परस्मिन्नेव दिवसे देवं स्नापयेत्। तिथिद्वयं चेत् द्वयोरपि स्नपनं कार्यम्। नक्षत्रं तिथिर्वा वारद्वयानुषक्तं चेत् परस्मिन्नेव दिवसे कार्यम्। एकस्मिन्नेव दिने नक्षत्रं तिथिश्च द्वयमपि चेत् नक्षत्रस्नपनं पूर्वम्। ततस्तिथिस्नपनम्। पूर्वस्नपनावसाने सद्योऽङ्कुरार्पणादि कृत्वा द्वितीयस्नपनं कर्तव्यम्।

उत्तरायणे श्रवणादिशुभनक्षत्रे शुभवारे शुक्लतिथौ स्थिरराशौ स्नपनस्य कालः।

स्नपनं नित्यनैमित्तिककाम्यभेदेन त्रिविधम्। अयनद्वये विषुवे च स्नपनं नित्यम्। चन्द्रसूर्योपरागे नैमित्तिकम्। नित्यनैमित्तिककालभिन्नेषु स्नपनं काम्यम्। नित्यस्नपनं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



स्नानम् अभ्युक्षणं चेति द्विविधम्। सरूपे प्रतिमादौ स्नानम् अरूपे वर्णयुक्ते च अभ्युक्षणमिति विवेकः।

नित्यपूजाया नैमित्तिकस्नपनस्य च सन्ध्याकाले युगपत्प्राप्तौ नैमित्तिकं समाप्य नित्यपूजा कार्या।

शताष्टकलशस्नपनं श्रेष्ठम्, अष्टचत्वारिंशत्कलशं मध्यमं, पञ्चविंशतिकलश-मधममिति पुनः स्नपनं त्रिविधम्।

नवधाऽपि भिद्यते स्नपनं कलशसङ्ख्यानुरोधेन। तत्र प्राग्द्रव्यैरनुद्रव्यैरपि विना द्वादशप्रधानैर्द्वादशोपस्नानैरिति चतुर्विंशतिकलशैः स्नपनमधमाधमम्। नादेयादिमृदोऽष्टौ सौवर्णे पृथगेकस्मिन्नेकस्मिन् शरावे गृह्णीयात्। तथा धान्यान्यङ्कुरांश्च पूर्ववत्। द्वादशप्रधानाः कलशाः। षट्त्रिंशदुपस्नानाः। पुण्यपुष्पाणि तथा जातीफलादिचूर्णमश्वत्थादिकषाय-चूर्णं च शरावे गृह्णीयात्। तीर्थोदकानि चतुर्षु शङ्खेषु गोश्रृङ्गेषु शरावेषु वा। तथा श्रीवेष्टकादिचूर्णानि शरावेषु पृथक्पृथगेव ग्राह्याणि। तथैव प्राग्द्रव्यैश्च सहितमष्ट-चत्वारिंशत्कलशैः स्नपनमधममध्यमम्। चतुर्विंशतिः प्रधानकलशाः चतुरशीतिरुपस्नानाश्चेति शताष्टकलशैः स्नपनं प्राग्द्रव्यैरनुद्रव्यैश्च सहितमधमोत्तमम्।

शताष्टकाद् द्विगुणं मध्यमाधमम्। त्रिगुणं मध्यममध्यमम्। चतुर्गुणं मध्यमोत्तमम्। पञ्चगुणं मध्यमोत्तममित्यपि वदन्ति।

षड्गुणमुत्तमाधमम्। अष्टगुणमुत्तममध्यमम्। दशगुणमुत्तमोत्तमम्। सहस्रकलशैः स्नपनमुत्तमोत्तमम्। पञ्चगुणमुत्तमाधमं, षड्गुणमुत्तममध्यमं, सप्तगुणमुत्तमोत्तममित्यपि वदन्ति।

अशक्तौ तु नवविधं स्नपनं यथा - पञ्चगव्यगन्धोदकाभ्यां पूर्णौ द्वौ कलशौ उपस्नानयुक्तौ तथा हरिद्राचूर्णकलशश्चेति पञ्चभिः कलशैः स्नपनमधमाधमम्। पञ्चगव्य-गन्धोदककुशोदककलशाः उपस्नानसमन्विताः हरिद्राचूर्णकलशश्चेति सप्तभिः कलशै-रधममध्यमम्। पञ्चगव्यगन्धोदककुशोदकाक्षतोदककलशा उपस्नानयुक्ता हरिद्रा-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



चूर्णकलशश्चेति नवभिरधमोत्तमम्। एते नवकलशा जप्योदककलशयुक्ताश्चेत् मध्यमाधमम्। नवकलशैः सह मधुकलशस्तदुपस्नानः जप्योदककलशश्चेति द्वादशकलशैः स्नपनं मध्यममध्यमम् । पञ्चगव्यघृतमधुदधिगन्धोदाक्षतोदकुशोदकलशा उपस्नानयुक्ता इत्येतैश्चतुर्दशकलशैः स्नपनं मध्यमोत्तमम् । एतैः सह क्षीरकलशस्तदुपस्नानश्चेति षोडशकलशैरुत्तमाधमम्। दधिकलशश्चोपस्नानयुक्तश्चेत्येतैः अष्टादशकलशैरुत्तममध्यमं स्नपनम्। एतैः सह सर्वौषध्युदकतदुपस्नानकलशौ इति विंशतिकलशैरुत्तमोत्तमं स्नपनमिति।

स्नपनं भद्रक्षुद्रभेदेनापि भिद्यते। शताधिकसहस्रान्तकलशस्नपनं भद्रम्। इदं भद्रं नवधा भिद्यते। तद् यथा चतुर्विंशतिकलशा अनुप्राग्द्रव्ययुताश्चेत् अधमाधमम्। शताष्टकलशा अनुप्राग्द्रव्ययुताश्चेत् अधममध्यमम्। द्विशतकलशा अनुप्राग्द्रव्ययुताश्चेत् अधमोत्तमम्। यद्वा चत्वारिंशत् कलशाः सर्वद्रव्ययुताश्चेत् अधममध्यमं स्नपनम्। द्वादशप्रधानानां प्रत्येकं त्रयस्त्रयः प्रधानकलशाः पञ्चपञ्च चोपस्नाना मिलित्वा षण्णवतिः कलशाश्चेत् अधममध्यममित्यपि भवति। यद्वा द्वौ द्वौ प्रधानकलशौ, चत्वारश्चत्वार उपस्नानाश्च मिलित्वा द्वासप्ततिकलशाः। यद्वा एकैके प्रधानकलशाः सप्तसप्त चोपस्नाना मिलित्वा षण्णवतिकलशाः। यद्वा तीर्थोदककलशाश्चत्वारस्तदुपस्नानाश्चाष्टौ इति द्वादशकलशाः। यद्वा अष्टोत्तरशतकलशा अनुप्राग्द्रव्ययुताश्चेत् अधमोत्तमं स्नपनम्। शताष्टकलशात् द्विगुणं मध्यमाधमम्। त्रिगुणं मध्यममध्यमम्। पञ्चगुणं मध्यमोत्तमम्। षड्गुणमुत्तमध्यममम्। अष्टगुणमुत्तममध्यम्। दशगुणं तूत्तमोत्तमम् इति।

एतदशक्तौ एकं कलशं स्थापयित्वा तत्र सर्वान् देवान् क्रमेणावाह्य पूजयेत्। उक्तद्रव्याद्यलाभे स्मृत्वा पुष्पं निक्षिपेत्। विष्णुसूक्तादि सहस्रकृत्वो जपेत्।

क्षुद्रस्नपनमुत्तमं मध्यममधमं चेति त्रिविधम्। पञ्चविंशतिकलशैरुत्तमं स्नपनं भवति। अष्टादशभिर्मध्यमम्। चतुर्दशकलशैरधमम्।

स्नपनविशेषा अनेके सन्ति। प्रथमं तावत् प्रतिष्ठाङ्गं सप्तकलशस्नपनम्। क्षीरेणैकं घृतेनैकं मधुनैकं सिद्धार्थकोदकेनैकम् अक्षतोदकेनैकं गन्धोदेनैकं कुशोदेनैकमिति

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



सप्तभिर्द्रव्यैः सप्त कलशान् प्रपूर्य तेषु द्रव्येषु अथर्वसामऋग्वेदान् आदित्यकाश्यपौ ऋतून् मुनींश्चेति सप्त देवताः पूजयेत्। इमे प्रधानाः सप्त कलशाः। तत्तत्पार्श्वे सप्तोपस्नानकलशाः स्थाप्याः। तत्र अश्विनौ वत्सरान् असून् पवित्रं वाक्पतिं तक्षकं मरुतश्चेति सप्ताधिदेवान् पूजयेत्।

नित्यार्चनाङ्गं शुद्धस्नपनम्। तैलाभ्यञ्जनाङ्गशोधनानन्तरमुष्णोदकगन्धोदकैः संस्नाप्य मूर्धोपरि सहस्रधारां धृत्वा शङ्खं पद्मं चूलिकां च गृहीत्वा कलशस्थेन सुगन्धजलेन पुरुषसूक्तमनुस्मरन्नभिषेचयेत्।

उत्सवेषु पूर्वाङ्गतया मध्याह्नार्चनान्ते स्नपनोक्तविधानेन यथाशक्ति कलशैः स्नापयित्वा शुद्धोदकैरभिषिच्य हविर्निवेदयेत्।

उत्सवोत्तराङ्गतयाऽवभृथस्नपनं चक्रस्नपनापरपर्यायं रत्नोदैरक्षतोदैः कुशोदैर्यवोदैश्चन्दनोदैश्च सम्पूर्णैः पञ्चभिः कलशैर्भवति। शिष्टैश्च तत्कलशोदैश्चक्रमभिषेचयेत्। तीर्थे निमज्जयेच्च। तत्र पञ्चसु प्रधानकलशेषु सिद्धार्थोदकमक्षतोदकं गन्धोदकं कुशोदकं जप्योदकं च प्रपूर्य आदित्यान् अप्सरसः काश्यपं गुरुं ऋतूंश्च पूजयेत्। तत्तत्पार्श्वे उपस्नानकलशेषु मरुतो मुनीन् तक्षकं मन्त्रान् विद्याधरांश्च क्रमेणावाह्य पूजयेत् इत्यपि वदन्ति।

## २. स्नपनालयादिकल्पनम्

देवालयाभिमुखे उत्तरे पश्चिमे ऐशान्ये वा स्नपनागारं मण्डपं कूटं प्रपां वा कृत्वा सर्वत्र वितानध्वजदर्भमालातरङ्गवेष्टनाद्यैरलंकुर्यात्। द्वारेषु तोरणपूर्णकुम्भाद्यैरलंकुर्यात्। परितः प्रावरणं कृत्वा अभ्यन्तरे गोमयेनोपलिप्य पिष्टतोययुतेन सूत्रेण पञ्चविंशतिभागं कृत्वा तन्मध्ये लोहोपलेष्टकादारुमृत्तिकानामन्यतमेन स्नानवेदिम् उत्तरे जलमार्गयुतां कुर्यात्। तां वेदिं वस्त्रेणाच्छाद्य कदल्यादिपत्रैश्चाच्छाद्य परितः कुशकूर्चान् विन्यसेत्। तत्परितः शय्यादेशमष्टभागं हित्वा तद्बहिः षोडशभागेषु चतुर्दिक्षु द्वाराणि कार्याणि। शेषेषु द्वादशभागेषु द्वादश प्रधानद्रव्यन्यासार्थं व्रीहिभिस्तण्डुलैर्वा वेदिः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



कार्या। तत्र बहिरिन्द्रादिदेवानां तत्तत्स्थाने द्वादशाङ्गुलविस्तृतानि पीठानि कारयेत्। पश्चिमद्वारवामे पङ्क्तीशस्य, उत्तरद्वारदक्षिणे विष्वक्सेनस्य च पीठं कारयेत्। जलद्रोणीं स्नानपीठं च विष्णोर्यः करोति स सर्वैः पूज्यमान उन्नते पीठे तिष्ठति। प्रपानिर्मातुः स्वर्गवासिभिः स्वर्गे गृहं निर्मीयते। स्नपने प्रपादिलोपे गृहनाशो भवति।

स्नपनालयस्य दक्षिणे औपासनकुण्डं कुर्यात्। शुद्धस्नपनं तु स्नपनालये वा बहिः सोपानमण्डपे वा आस्थानमण्डपे वा कर्तुं शक्यते।

## ३. स्नपनसम्भारसङ्ग्रहणम्

स्नपने प्रागुपयोक्तव्यानि मृदादीनि पञ्च प्राग्द्रव्याणीत्युच्यन्ते। स्न प्राधान्येनोपयोक्तव्यानि पञ्चगव्यादीनि द्वादश प्रधानद्रव्याणि। स्नपने पश्चादुपयोक्तव्यानि पुण्यपुष्पादीनि अनुद्रव्याणि। ततोऽपि पश्चादर्पणीयानि भूषणद्रव्याणि। एवं चतुरङ्गं स्नपनं पुष्कलं भवति।

नादेयाद्या अष्टविधा मृदः, हिमवत्प्रमुखा अष्टावचलाः, शाल्यादीनि धान्यानि, अङ्कुराः, श्रीवत्साद्यष्टमङ्गलद्रव्याणि चेति पञ्च प्राग्द्रव्याणि। तत्र नद्यां, सस्यक्षेत्रे, तटाके, दर्भमूले, गजदन्तोद्धृते, गोविषाणोद्धृते, कुलीरावासे, वल्मीके चेति अष्टविधा मृदः संग्राह्याः। महीदेवीमनुज्ञाप्य, ताश्च पृथक्पृथगाहृत्य, आतपेन संशोध्य, ताभिर्देवं स्नपयेत्। तेन भूमिः सर्वसस्यान्विता भवेत्। अन्यथा, मृद्भिरस्नपने, भुवि सस्यनाशो भवेत्।

हिमवान् मेरुर्विन्ध्यो विडूरो वेदपर्वतो महेन्द्रो महाहरिश्चन्द्रोऽथ शतशृङ्गश्चेत्यष्टौ कुलपर्वताकारान् याज्ञिकैर्वृक्षैः मृदा वा कुर्यात्। ते च मूले षडङ्गुलविस्ताराः, ऊर्ध्वे त्र्यङ्गुलविस्ताराः, अष्टाङ्गुलोच्छ्रयाः, प्रागादि चतुर्दिक्षु क्रमेण श्वेतपीतरक्तकृष्णवर्णयुता भवेयुः। यद्वाऽष्टौ पर्वतास्ते क्रमेण श्वेतपीतकृष्णरक्तश्वेतपीतकृष्णरक्तवर्णा भवेयुः। स्नपने एतान् पर्वतान् देवस्योपरि प्रदक्षिणकरणेन गोत्रस्थितिलाभः। पर्वतलोपे यजमानस्य स्थैर्यलोपः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



शालिव्रीहि-यव-मुद्ग-माष-प्रियङ्गु-तिल-तिल्व-सर्षपाणि अष्ट धान्यानि, मसूरचणकयुतानि तानि दश धान्यानि वा सङ्गृह्य स्नपनं कुर्यात्। तेन धान्यवृद्धिः फलम्। स्नपने धान्यलोपे च धान्यनाशः स्यात्। सर्वधान्यालाभे यवः प्रतिनिधिः, मुद्गो वा। धान्याधिपदैवत्यहोमं धान्यलोपप्रायश्चित्तार्थं कुर्यात्।

अङ्कुरार्पणोक्तधान्यानामङ्कुरा ग्राह्याः। तदलाभे पुष्पैः कुशदूर्वाङ्कुरैर्वा चूतादि-पल्लवैर्वा देवपूजा कार्या। अङ्कुरैरर्चने प्रजावृद्धिर्भवति। अङ्कुरलोपे तु प्रजाहानिः।

श्रीवत्सः पूर्णकुम्भः भेरी आदर्शः मत्स्ययुग्मम् अङ्कुशः शङ्खः आवर्तश्चेत्यष्ट-मङ्गलानि। अश्वत्थादियाज्ञीयवृक्षैर्वा मृदा वा अष्ट सप्ताङ्गुलसमुच्छ्रयाणि चतुरङ्गुलोच्छ्रय-पीठयुक्तानि मङ्गलानि कारयेत्। श्रीवत्सः स्वर्णवर्णः स्यात्। उदकुम्भो रक्तः। भेरी बिम्बफलाभा। आदर्शः श्वेतः। मत्स्ययुग्मं पीतवर्णम् ऊर्ध्वास्यं रक्तनेत्रं कृष्णपक्षयुक्तं च। अङ्कुशो रक्तदण्डः कृष्णवर्णसृणियुक्तः। आवर्तोऽतिरक्तश्च। एतैर्मङ्गलैः पूजनेन सर्वमङ्गलानि भवन्ति। तदभावेऽमङ्गलप्राप्तिः।

पञ्चगव्यं, घृतं, मधु, दधि, क्षीरं, गन्धोदकमक्षतोदकं, फलोदकं, कुशोदकं, रत्नोदकं, जप्योदकं, सर्वौषध्युदकं चेति द्वादश स्नपने प्रधानद्रव्याणि। तानि च प्रत्येकमाढकं तदर्धं वा यथालाभं वा सङ्गृह्य शेषं जलेन पूरयेत्।

सद्यःपक्वं सुवर्णाभं घृतं श्रेष्ठम्। अनतीतपञ्चदशाहं वा। मासादूर्ध्वं तु वर्जयेत्। घृतेन स्नपने सामवेदाध्ययनफलं लभ्यते। तल्लोपे तु बुद्धिनाशः।

फलजं पुष्पजं वा मधु ग्राह्यम्। तदलाभे नारिकेलजलं मृण्मये पात्रे सद्य एव गृहीत्वा स्नापयेत्। कापिलं घृतं वा ग्राह्यम्। मधु क्षीरं घृतं च सम्यगुत्पूयैवाहरेत्। मधुस्नापने वचो मधुस्यन्दि भवेत्। तल्लोपे महान् व्याधिः।

अशुक्तं दधि द्व्यहाभ्यन्तरगं ग्राह्यम्। तेन स्नपने अच्छं यशो लभ्यते। तल्लोपे तु ज्वरप्राप्तिः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



गव्यं क्षीरं सद्योदुग्धं ग्राह्यम्। यामातीतं त्यजेत्। आजं माहिषं च क्षीरं वर्जयेत्। क्षीरेण विष्णोः स्नपने क्षीरवत्यो गावो लभ्यन्ते। तल्लोपे आयुर्हीनं भवेत्, कीर्तिश्च मलिना भवेत्।

चन्दनकोष्ठूशीरैलालवङ्गादिगन्धैर्मिश्रं जलं गन्धोदकम्। गन्धोदकस्नपनेन सर्वसम्पल्लाभः। तल्लोपेन च दुर्गन्धप्रप्तिः।

यवसर्षपव्रीहिमाषतण्डुलान्यक्षतानि। जलाष्टांशतद्द्रव्ययुतमक्षतोदकं भवति। तेन स्नापने प्रजा अक्षता भवेत्। तल्लोपे तत्क्षतिः।

कदलीपूगपनसनालिकेरमातुलुङ्गनारङ्गादिभिः जलाष्टांशादहीनैः फलैर्युक्तं जलं फलोदकम्। तेन स्नपने शुभफलावाप्तिः। तल्लोपे जीवितं विफलं भवेत्।

कुशाग्रैर्दूर्वाक्षतैश्च सहितं जलं कुशोदकम्। तेन स्नपने ब्रह्मवर्चसप्राप्तिः। तल्लोपे तल्लोपश्च।

पद्मरागपुष्यवैडूर्यवज्रमौक्तिकानि पञ्चरत्नानि। प्रवालमरतकगोमेदेन्द्रनीलयुतानि तान्येव नवरत्नानि। नवभिः पञ्चभिर्वा रत्नैर्युक्तं रत्नोदकम्। रत्नानामलाभे सुवर्णं ग्राह्यम्। रत्नोदकस्नपनेन मणिरत्नादिवृद्धिः। तल्लोपे धनधान्यविनाशः।

वैष्णवं विष्णुसूक्तं पुरुषसूक्तं च द्वादशकृत्वो जप्त्वाऽभिमन्त्रितं जलं जप्योदकम्। दर्भैर्जलं स्पृष्ट्वा मन्त्रजपं कुर्यात्। अतो देवादिभिः षड्भिर्मन्त्रैर्वा प्रणवशतयुक्तैरभिमन्त्रितं जलं जप्योदकम्। विष्णुगायत्र्या वाऽभिमन्त्रितं तथा। जप्योदकस्नपनेन सर्वजपफलं भवति।

ओषध्यः फलपाकान्ताः प्रियङ्गुसर्षपमुद्गादिधान्यानि। सर्वैस्तैः त्रिभिरधिकैर्वा जलाष्टांशप्रमाणैर्युतं जलं सर्वौषध्युदकम्। तेन स्नपने सर्वौषधिसमृद्धिर्भवेत्। तल्लोपे व्याधिपीडा च।

नात्युष्णं नातिशीतं च क्वथितं शुद्धं वारि उष्णोदकम्। स्नपने तदभावे उष्णशरीरता भवेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



पञ्चगव्यादीनां स्नपनद्रव्याणां प्रमाणमाढकादन्यूनं भवेत्। न्यूनं चेदाभिचारिकं स्यात्। देवर्षिनृपाणां तु स्नपने द्रोणद्रोणार्धप्रमाणं विहितम्।

प्रधानद्रव्यैः संपूर्णाः कलशाः प्रधानाः। तत्तत्प्रधानानन्तरस्नपनार्थाः सुगन्धिशुद्धोदकपूर्णाः कलशा उपस्नानाः।

पुण्यपुष्प-जातीफलादिचूर्ण-कषायचूर्ण-तीर्थोदक-वनौषधिचूर्ण-हारिद्रचूर्ण-सर्वगन्धचूर्ण-मूलगन्ध-प्लोतवस्त्रोत्तरीयाभरण-यज्ञोपवीत-धातव इति द्वादशानुद्रव्याणि।

बिल्व-करवीर-पद्म-कुमुद-नन्द्यावर्तक-पद्म-तुलसी-क्रान्तानि अष्टपुण्यपुष्पाणि। तैरर्चने पुण्यलाभः। तल्लोपे पापप्राप्तिः।

श्रीवेष्टक-यव-चणक-मुद्गोशीर-रत्नक-मसूर-दमन-जातीफल- लवङ्ग-कर्पूरैला-चन्दनादीनि चूर्णयित्वा अङ्गोद्वर्तनार्थं शरावेषु पूरयेत्। श्रीवेष्टकाद्यलाभे एलादिचूर्णं ग्राह्यम्। उद्धर्तनचूर्णार्पणेन आयुर्वृद्धिः। तल्लोपे विपदो भवन्ति।

अश्वत्थवटमधूकासनखदिरवञ्जुलार्जुनोदुम्बरादीनां त्वच आहृत्य तच्चूर्णानां कषायाणि शरावेषु पूरयेत्। वटमधूकाद्यलाभे अश्वत्थचूर्णं विधीयते। कषायचूर्णेनोद्वर्तने कान्तिलाभो भवति। तल्लोपे तु कान्तिहानिः।

नदीतटाकवापीकूपनिर्झरेषु सद्यो गृहीतमुदकं तीर्थोदकमित्युच्यते। तच्चोदकं दिवा ग्राह्यं, न निशि। निशि स्नपनं चेत् अग्निसन्निधौ जलं ग्राह्यम्। तीर्थोदस्नापनेन तीर्थयात्राफलं लभ्यते।

सिंही नकुली व्याघ्रा अनन्ता आदित्या पाठा सहदेवी दूर्वा अपामार्गा वशा कण्टकारिः कुरुण्डं मरीचं सूर्यबोधी सर्षपमित्याद्या वनौषधयः चूर्णार्थमाहरणीयाः। वनौषधिचूर्णेन स्नपने नित्यमरोगता भवेत्। तल्लोपे रोगो भवेत्।

हरिद्रायाः चूर्णं षड्भागतण्डुलचूर्णयुक्तं स्वर्णचूर्णेन च मिश्रितं हेमाभं हरिद्राचूर्णमित्युच्यते। तेन स्नापने हरिः प्रीतो भवति। तल्लोपे नरो गतश्रीर्भवति। उलूखले

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



सोमं, मुसले सुदर्शनं, हरिद्रायां सिनीवालीं, दासीषु जयाद्यप्सरसश्च मनसा ध्यात्वा चूर्णं कार्यम्। तत्काले सुवर्णमपि तत्र निक्षिपेत्। पुनश्चूर्णयित्वा कलशेनाहरेत्।

हरेणु-स्थौणेय-पत्रा-व्याघ्रनखागुरु-मरु-दमनक-मेरुवाल-जातीफल-मांसी-कर्पूरैला-लवङ्ग-चन्दनोशीर-स्थिरा-नारद-सावन-कुस्तुम्बुरूणि एकोनविंशतिसुगन्धीनि चूर्णयेत्। सर्वगन्धमिति तदुच्यते। तेन मार्जनेन चलापि श्रीरचला तिष्ठति।

नन्द्यावर्तम् अपामार्गं पलाशं कुशः भूंस्तृणः तुलसी करवीरं बिल्वम् आमलकी मालती दूर्वा भूर्जकं चेतीमान् मूलगन्धान् मार्जनार्थमाहरेत्। मूलगन्धैर्मार्जने कुलवृद्धिः। तल्लोपे वार्धक्यं च भवति।

कार्पासतन्तुकृतं नवं सूक्ष्मं श्वेतमहतं वस्त्रयुग्मं प्लोतार्थमाहरेत्। कौशेयं कार्पासं वा शुद्धं वस्त्रमुत्तरीयार्थमाहरेत्। सौवर्णाभरणानि मणिमुक्तामयानि तथा यज्ञोपवीतं सौवर्णं तान्तवं वाऽऽहरेत्। प्लोतं वस्त्रमुत्तरीयं धातुराभरणं पुष्पमाला गन्धं चेति एतानि सप्त स्नपनेषु सर्वेषु सामान्यानि। एतेषां लोपे कर्मनाशो भवति। रमापतिर्न तुष्यति।

मनःशिला हरितालम् अञ्जनं श्यामं जातिहिङ्गुलिकं सौराष्ट्रं गोरोचनं गिरिकं चेति धातुभिरलङ्कुर्यात्। तेन धातुवृद्धिर्भवति। तल्लोपे नरो निर्धातुर्भवति।

पायसं कृसरं गौल्यं यावकं चेति चतुर्हविर्निवेदयेत्। पानीययुक्तमपूपादि च निवेदयेत्। सिद्धार्थकं कुशाग्राणि तिलास्तण्डुला व्रीहयो दधि क्षीरमक्षतं तोयमित्यष्टाङ्गमर्घ्यमर्पणीयम्। तल्लोपे स्नपनं निष्फलं भवति।

स्नपनार्थम् आढकपूर्णान् कलशान् तद्द्विगुणपूर्णकलशान् तद्द्विगुणपूर्णघटान् तत्षड्गुण-पूर्णोदधानीं प्रस्थपूर्णान् शरावान् कलशानां पिधानानि यथोचितान्यन्यानि भाण्डानि च खण्डस्फुटितकालरहितानि नवान्याहरेत्।

मृदादिद्रव्याहरणाय प्रतिद्रव्यं पृथक्पृथक् आढकपूर्णान्येव पात्राण्याहरेत्, न कृशानि। सुवर्णरौप्यताम्राणि तदलाभे मृण्मयानि वा आहरेत्। प्रस्थपूर्णः शरावः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



द्रोणपूर्णः कुम्भः। द्रोणार्धं करकम्। उदधानी तु चतुर्द्रोणपूर्णा। कलशस्तु द्वादशाङ्गुलविस्तारः षोडशाङ्गुलनाहः द्व्यङ्गुलकण्ठः पञ्चाङ्गुलमुखश्च। पक्वबिम्बफलाकारश्च। भिन्नान् जीर्णान् अपक्वान् सकालांश्च कलशान् वर्जयेत्। सौवर्णं राजतं ताम्रं च क्रमादुत्तमं मध्यममधमं च भवति। एतत्त्रिविधकलशस्याप्यलाभे मृण्मयः कलशो ग्राह्यः। आढकपूर्णमुत्तमं, तदर्धं मध्यमं, एकप्रस्थं चाधममिति कलशे त्रैविध्यम्। लोहजं कलशमाम्लेन शोधयेत्। मृण्मयं तु गायत्र्या शोधयेत्।

सप्तविंशतिदर्भैः प्रोक्षणकूर्चकं कुर्यात्। षडङ्गुलायामो वेदो मार्जनार्थं विधीयते। पञ्चदश-नव-सप्तदर्भैर्वा कूर्चान् कुर्यात्। द्वादशाङ्गुलमानेन कलशादिषु कूर्चान् स्थापयेत्। नव-संप्त-पञ्च-त्रिभिर्वा साग्रैर्दर्भैः कलशार्थकूर्चान् कुर्यात्। षट्त्रिंशदङ्गुलायामान् परिस्तरणकूर्चान् कुर्यात्। प्रोक्षणकूर्चो हस्तमात्रः। मार्जनार्थः षडङ्गुलः। कुशाः काशाः उशीरा दूर्वा व्रीहयो विश्वामित्रा यवाश्चेति सप्तविधा दर्भा भवन्ति।

## ४. स्नपनद्रव्यन्यासः

पञ्चगव्यादिभिः सर्वौषध्युदकान्तैः द्वादशप्रधानद्रव्यैः सम्पूर्णाः द्वादश कलशाः प्रधाना भवन्ति। तेषां चोपस्नानकलशा जलपूर्णा अपि द्वादश। हरिद्राचूर्णसंयुक्तजलकलशोऽपि एकः इति क्षुद्रस्नपने पञ्चविंशतिसङ्ख्याः कलशाः।

पूर्वस्मिन् दिनेऽङ्कुरार्पणमधिवासं च कृत्वा स्नपनमण्डपे पञ्चविंशतिपदं कृत्वा तन्मध्ये श्वभ्रार्थमेकं, परितोऽष्ट च पदानि हित्वा, सञ्चरणार्थं च चतुर्दिक्षु चत्वारि पदानि त्यजेत्। शिष्टेषु द्वादशपदेषु कलशन्यासः करणीयः। तदर्थं व्रीहीन् आढकमानेन तदर्धेन प्रस्थमानेन वा सङ्गृह्य तैः कलशपीठं कृत्वा तदुपरि प्रोक्षणोल्लेखनदर्भास्तरणानि च कृत्वा कलशेषु द्रव्याणि निक्षिपेत्। प्रणवेन कूर्चानपि निक्षिपेत्। सपिधानान् सोपस्नानान् तान् कलशान् विष्णुगायत्र्या पृथक्पृथक् स्थानेषु न्यसेत्।

ऐशान्यादिषु विदिक्षु द्वाराणां वामपार्श्वेषु क्रमात् पञ्चगव्यं, दधि, अक्षतोदकं, रत्नोदकं च न्यसेत्। प्रागादिषु दिक्षु क्रमात् घृतं, क्षीरं, फलोदकं, जप्योदकं च ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



तत्पार्श्वेषु मधु, गन्धोदकं, कुशोदकं, सर्वौषध्युदकं च। एतेषां सर्वेषामपि वामपार्श्वेषु तदुपस्नानकलशानपि न्यसेत्। नैर्ऋत्यपश्चिमयोरन्तराले हारिद्रचूर्णकलशमपि न्यसेत्। सर्वानपि कलशान् वस्त्रेण परिवेष्टयेत्।

## ५. स्नपनपूर्वरात्रौ देवशायनम्

कौतुके यदि सन्ध्याकाले स्नपनं प्राप्तं तदा नित्यं स्नपनं पूर्वं समापयेत्। प्रातःकाले स्नपनं चेत् कोतुके आवाह्यार्चनं कृत्वा पश्चात् स्नपनं कार्यम्। कौतुकस्यैव तत्तत्काले आवाहनविसर्जने विहिते। नान्ययोः। रात्रौ तुरीययामे स्नपनं चेत् रात्रौ उद्वासनमकृत्वा स्नपनान्ते एव कौतुकाच्छक्तिं ध्रुवे आरोपयेत्। पश्चात् प्रातरावाहयेत्। रात्रिपूजावासाने ध्रुवे शक्त्यारोपणं, निशान्ते ध्रुवात् कौतुके आवाहनं च नित्यं कार्यम्। सन्ध्ययोरुभयोर्मध्ये यदि स्नपनं तदा सम्बन्धकूर्चमादाय प्रतिसरं बध्वा स्नापयेत्।

पूर्वरात्रौ विशेषतोऽभ्यर्च्य शयनस्थाने शयनं संकल्प्य स्नपनबिम्बं तदलाभे औत्सवं, तदलाभे कौतुकं समारोप्य प्रतिसरं बन्धयेत् शाययेच्च। अथवा तत्काले शयनं संकल्प्य देवमारोप्य प्रतिसरं बध्वा यामं मूहूर्तं वा शाययेत्। आसन्ने तु काले शयनं विना कौतुकं बन्धयेदित्यपि केचित्। रात्रौ यदि स्नपनं तर्हि शयनं नैव कारयेत्।

देव्यौ विनैव देवं स्नपने चालयेत्। नित्यस्नानं विना देव्यौ प्राणदेशान्न चालयेत्। शयनस्थानमालायाद् दक्षिणे प्रथमावरणे कुर्यात्। व्रीहिभिस्तण्डुलैस्तिलैश्च धान्यवेदिं प्रकल्प्य तदुपर्यण्डजादीनि पञ्चवस्त्राणि चास्तीर्य शिरोपधानं पादधारणमुत्तराच्छादनं च प्रकल्पयेत्। वस्त्रोपरि दर्भास्तदुपरि पुष्पाणि च विन्यस्य पुण्याहं वाचयित्वा कौतुकं बध्वा हरिं शाययेत्। उत्तराच्छादनं कृत्वा चामराद्यैर्वीजयेत्। नृत्तगेयादिभिः रात्रिशेषं नयेत्।

## ६. स्नपनद्रव्यदेवार्चनम्

प्रभाते अधिवासितं देवमादाय श्वभ्रमध्ये वेद्यामुपरि संस्थाप्य परितः प्रागग्रानुदगग्रांश्च कूर्चान् संन्यस्याघ्यान्तं जयाद्यप्सरसोऽर्चयेत्। कलशाद् बाह्यतः पङ्क्तीशममितं वीशं दिक्पालांश्च पूजयेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



शिवो, विश्वसूनुः, सामवेदो, वत्सराः, ऋचः, प्राणो, यजुः, रुद्रः, अथर्वा, अश्विनौ, तीर्थाः, लोकनाथो, विश्वमूर्तिः, गुरुः, सोमो, नागराजो, मुनिः, तक्षकः, पुरुषो, गन्धर्वाः, मन्त्रो, विद्याधराः, अर्कोऽप्सरसः, सिनीवाली चेति पञ्चविंशति-कलशानामधिपा देवाः आसनाद्यर्घ्यान्तोपचारैः पूजनीयाः। मूर्तिमन्त्रैः प्रणवादिनमोऽन्तैः तानर्चयेत्।

नवविधस्नपने आचार्यो देवस्याभिमुखे दक्षिणे वा आसीनस्तिष्ठन् वा देवमानम्य प्राणायामं कृत्वा कलशन्यासं कुर्यात्। ऐशान्यपूर्वयोर्मध्ये नादेयाद्या अष्टौ मृदः एकस्मिन् पात्रे गृहीत्वा 'उदुत्य' मिति मन्त्रेण न्यसेत्। पूर्वाद्यैशान्यपर्यन्तमष्टदिक्षु द्वारवामपार्श्वेषु हिमवदादीन् अष्टपर्वतान् 'इदं विष्णु' रिति मन्त्रेण न्यसेत्। दक्षिणाग्नेययोर्मध्ये शाल्यादीनि धान्यानि एकस्मिन् पात्रे संगृह्य 'शुक्रं त' इति मन्त्रेण न्यसेत्। तत्रैव चाभ्यन्तरे 'सोम ओषधीना' मिति मन्त्रेणाङ्कुरानपि न्यसेत्। अष्टदिक्षु द्वारदक्षिणपार्श्वेषु 'शंसानी'ति मन्त्रेण श्रीवत्सादीनष्टमङ्गलान् न्यसेत्।

ऐशान्यां सोपस्नानं पञ्चगव्यकलशं 'त्र्यम्बक' मिति मन्त्रेण न्यसेत्। पूर्वद्वारोत्तरपदे घृतकलशं 'घृतप्रतीक' इति मन्त्रेण न्यसेत्। पूर्वद्वारदक्षिणे मधुकलशं 'यन्मधुन' इति, आग्नेय्यां दधिकलशं 'दधिक्राव्णे' ति, दक्षिणद्वारपूर्वे क्षीरकलशं 'शं नो देवी' रिति, दक्षिणद्वारपश्चिमे गन्धोदकलशं 'सोमं राजान' मिति, नैर्ऋत्याम् अक्षतोदककलशम् 'इमा ओषधय' इति, पश्चिमद्वारदक्षिणे फलोदककलशं 'सोमं राजान' मिति, पश्चिमद्वारोत्तरे कुशोदककलशं 'यतस्त्वमासा' दिति, वायव्यां रत्नोदकलशम् 'अतो देवा' इति, उत्तरद्वारपश्चिमे जप्योदकलशं 'ब्रह्मा देवाना' मिति, उत्तरद्वारपूर्वे सर्वौषध्युदककलशं 'चित्रं देवाना' मिति च मन्त्रपूर्वं न्यसेत्। एषां वामपार्श्वे 'स्वादिष्ठये' ति उपस्नानकलशान् न्यसेत्।

पुण्यपुष्पाण्येकस्मिन् पात्रे संगृह्य दक्षिणनैर्ऋत्यमध्ये 'इमाः सुमनस' इति मन्त्रेण न्यसेत्। नैर्ऋत्यपश्चिममध्ये जातीफलचूर्णकलशं 'वन्ध्योन' इति न्यसेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



पश्चिमवायव्यान्तराले अश्वत्थादिकषायचूर्णकलशम् 'एते शत' मिति न्यसेत्। नादेयादितीर्थतोयकलशमपि तत्रैव 'वारीश्चतस्त्र' इति न्यसेत्। उत्तरवायव्यमध्ये 'रुद्रमन्य' मिति सिंह्यादिवनौषधिकलशं न्यसेत्। नैर्ऋत्यपङ्क्तीशयोर्मध्ये हरिद्राचूर्णकलशं 'सिनीवाली' ति न्यसेत्। ऐशान्योत्तरमध्ये हरेण्वादिसर्वगन्धचूर्णकलशम् 'इमे गन्धा' इति न्यसेत्। ऐशान्यां 'नारायणाय विद्महे' इति मन्त्रेण प्लोतवस्त्रोत्तरीयाभरणयज्ञोपवीतानि न्यसेत्।

सोपस्नानान् द्वादश प्रधानकलशान् द्वादशवस्त्रैरावेष्टयेत्। इदमुत्तमम्। अष्टवस्त्रैरावेष्टने मध्यमम्। चतुर्वस्त्रैरावेष्टनेऽधमम्। कलशान् 'देवस्य त्वे' ति मन्त्रेण गृहीत्वा, यवान्तरमङ्गुल्यन्तरं वा तन्तुना परिवेष्ट्य, अद्भिः प्रक्षाल्यैव च यथोक्तैः पञ्चगव्यादिद्रव्यैः संपूरयेत्। पिधानाद्यैरपिधाय प्रादक्षिण्यक्रमेण तत्तत्स्थाने न्यसेत्।

प्राग्द्रव्येषु मृत्सु मेदिनी, पर्वतेषु अग्निः, धान्येषु वायुः, अङ्कुरेषु तार्क्ष्यः, मङ्गलेष्विन्द्रश्चाधिदेवाः।

प्रधानद्रव्येषु पञ्चगव्ये शिवः, तदुपस्नाने विश्वेदेवाः। घृते सामवेदः तदुपस्नानेऽप्सरसः। मधुनि ऋग्वेदः, तदुपस्नाने प्राणाः। दध्नि यजुर्वेदः, तदुपस्नाने रुद्रः। क्षीरेऽथर्ववेदः तदुपस्नानेऽश्विनौ। गन्धोदके ऋतवः तदुपस्नाने मरुतः। अक्षतोदके काश्यपः तदुपस्नाने बृहस्पतिः। फलोदके सोमः, तदुपस्नाने नागराजः। कुशोदके मुनयः, तदुपस्नाने तक्षकः। रत्नोदके विष्णुः, तदुपस्नाने गन्धर्वाः। जप्योदके पवित्रः तदुपस्नाने विद्याधराः। सर्वौषध्युदके आदित्यः, तदुपस्नानेऽप्सरसश्च अधिदेवाः।

अनुद्रव्येषु - पुण्यपुष्पेषु धाता। जातीफलचूर्णे चक्रम्। वनौषधीषु रुद्रः। हरिद्राचूर्णे देवसनाभिः। सर्वगन्धचूर्णे इन्द्रः।

भूषणेषु प्लोतवस्त्रे त्वष्टा। मूलगन्धे ब्रह्मा। धातुषु दुर्गा। भूषणे षण्मुखश्चाधिदेवाः। द्रव्याधिदेवान् तत्तद्द्रव्यसमीपतः तत्तद्द्रव्यधरान् ध्यात्वा एकादशविग्रहैरष्टविग्रहैर्वाऽर्चयेत्। प्रणवादिनमोऽन्तैः तत्तन्नाममन्त्रैः पूर्वं तोयं, ततः पुष्पं, पश्चात् तोयं च दत्वा उपचारानर्पयेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



सावित्रीमन्त्रमुच्चार्य पूर्वाद्यष्टदिक्षु ऊर्ध्ववेद्यां क्रमेण जया, विजया, विन्दा, पुष्टिका, नन्दका, कुमुद्वती, उत्पलका, विशोका चेत्यष्टावप्सरसः पूजयेत्। नैर्ऋत्यपश्चिमयोर्मध्ये पङ्क्तीशम्, ऐशान्योत्तरयोर्मध्ये शान्तं चार्चयेत्।

**७. स्नपनप्रयोगः**

दिवा निशि सन्धिषु वा यत्र यत्र निमित्तं स्यात् स एव स्नपनकालः। कालातीते नित्यार्चनायां न दोषो भवति।

स्नपनदिनात् पूर्वं नवमे सप्तमे पञ्चमे तृतीये वाऽह्नि अङ्कुरार्पणं कर्तव्यम्। अङ्कुरार्पणानन्तरं स्नपनद्रव्याण्याहरेत्। स्नपनस्य पूर्वदिने यजमानः आचार्यसहितान् द्वादशर्त्विजो वरयेत्। द्वादशस्वेको होमकर्मणि नियोक्तव्यः। हौत्रप्रशंसने चैकः। अर्चनकर्मणि चत्वारः। अभिषेकाय चत्वारः। द्वौ च परिचारकाविति। तस्मिन्नेव दिने रात्रौ देवस्य प्रतिसरं बद्ध्वा शयने शाययेत्।

सहस्रकलशस्नपने प्रधानकलशाः चतुर्विंशतिः उपस्नानकलशाश्चाष्टचत्वारिंशत् भवन्ति। कषाय-तीर्थतोय-हरिद्राचूर्ण-सर्वगन्धचूर्णव्यतिरिक्तानां द्वादशानां प्रधानद्रव्याणामेवं प्रधानोपस्नानाः चतुःषष्ट्यधिकाष्टशतकलशा भवन्ति। कषायस्य चत्वारः प्रधानाः षोडशोपस्नानाश्च। तीर्थतोयस्य केवलं चतुर्विंशतिः। हरिद्राचूर्णकलशाः सोपस्नानाः प्रधानवत् द्वासप्ततिः। सर्वगन्धस्य चत्वारः प्रधानाः षोडशोपस्नानाश्च। सर्वे मिलित्वा सहस्रं कलशा भवन्ति।

पञ्चसु पङ्क्तिषु प्रत्येकं द्विशतं कलशाः स्थाप्यन्ते। यद्वा दशसु पङ्क्तिषु प्रत्येकमेकशतं कलशाः स्थाप्यन्ते। सर्वथा सहस्रकलशस्थापनं भवति।

सहस्रकलशस्नपनार्थं मण्डपस्य पूर्वार्धे कलशस्थापनाय व्रीहिभिः पञ्चदशपदानि कुर्यात्। तत्रैशान्योत्तरयोर्मध्ये शान्तस्य तण्डुलैः पीठं कुर्यात्। नैर्ऋत्यपश्चिममध्ये मित्रस्य। पत्रैः श्वभ्रं समाच्छाद्य तदुपरि कूर्चान् निक्षिपेत्। जयादीः पूजयित्वा आचार्यहस्तमानेन तालोच्छ्रयां बिल्वफलकां न्यसेत्। शयनाद् देवमुत्थाप्य सर्वालङ्कारैः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



परिभूष्य ग्रामप्रदक्षिणं कृत्वा श्वभ्रमध्ये स्थापयेत्। यजमानः सर्वान् ऋत्विजः वस्त्रहेमाङ्गुलीयकैः पूजयेत्। हौत्रप्रशंसनं कृत्वा तदालयगतान् तथा मृदाद्यधिदेवांश्च सर्वानावाहयेत्। जुष्टाकारं कृत्वा जुहुयात्। सर्वैः कलशैर्देवस्य स्नपनं कुर्यात्। प्रतिसरं विमोच्य शुद्धोदकेनाभिषिच्य अन्तहोमं कृत्वा, देवमलङ्कृत्यालयं प्रदक्षिणीकृत्य प्राणस्थाने, प्रतिष्ठाप्य प्रभूतं हविर्निवेदयेत्। ततो यजमानः आचार्याय दक्षिणां दत्वा तत्समां दक्षिणां चतुर्णामभिषेक्तॄणामपि दद्यात्। अध्वर्युहोत्रोस्तदर्धम्। कलशपूजकानामपि तत्समम्। तदर्धं परिचरितॄणामिति क्रमः। स्नपनोपयुक्तानि द्रव्याणि चाचार्याय दद्यात्।

महास्नपनार्थं सैकते स्थण्डिले लोकपालानर्चयेत्। मेरुं तस्य मूर्धनि क्रोडरूपिणं देवेशं च मूर्तिमन्त्रैरर्चयेत्। मेरुमध्ये सूर्यं, प्राच्यां चतुर्मुखम्, उत्तरे भूमिदेवीं, दक्षिणे जम्बूशाखां चार्चयेत्। देवस्य कौतुकं बध्वाऽधिवास्य च द्वादशकलशैः पञ्चगव्यादिपूरितैः स्नापयेत्।

एवं महास्नपने कृते राजानः सागरान्तां महीं प्राप्नुवन्ति। इन्द्रादिलोकपालाश्चानेन कर्मणा हर्यनुग्रहेण लोकपालत्वं प्रापुः। पृथु-जनक-मान्धात्रादिनृपा दीर्घकालं महीं पालयामासुः। अतो राजा विष्णोर्महाभिषेकं कारयेत्। स इहलोके सुखं भुक्त्वाऽन्ते मोक्षमाप्नुयात्।

नित्यार्चनायामुत्सवे पुण्यनक्षत्रेषु च शुद्धस्नपनं कार्यम्। शुद्धस्नपनार्थं देवं शयना-दुत्थाप्य वाद्यघोषेणालयं प्रदक्षिणीकृत्य मण्डपे पीठे संस्थाप्य राजोपचारान् कृत्वा पादौ प्रक्षाल्य पुष्पाञ्जलिं दद्यात्।

दन्तधावनं मुखप्रक्षालनम् आचमनं मुखवासं स्तोत्रनृत्तगेयवाद्यादिविनोदांश्चार्पयेत्। कार्यं विज्ञापयेत्। अलकशोधनं तैलाभ्यञ्जनं कृत्वाऽलकान् बध्नीयात्। पुष्पमाल्यैरलङ्कृत्य अङ्गे तैलाभ्यञ्जनं कृत्वा मर्दयेत्। तच्छेषं भक्तेभ्यो दद्यात्। शालिपिष्टेन देवाङ्गं विमृजेत्। अष्टम्यां नवम्यामेकादश्यां चतुर्दश्यां पर्वणि च दन्तधावनमभ्यञ्जनं च वर्जयेत्। ततः आम्लेन परिशोधनं केशशुद्धिं च कृत्वा शुद्धोदकैरभिषिच्य कर्पूरादि-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



परिमलैर्युक्तेन हरिद्रापिण्डेन सर्वाङ्गमालिप्य सुगन्धिजलेन स्नापयेत्। क्षीरेणोष्णोदकैर्वाऽभिषेचयेत्। आचमनं दत्वा वस्त्रमाल्यादिभिरलङ्कृत्योपवीतमुत्तरीयं च दद्यात्। हस्तयोरनामिकाङ्गुल्योः पवित्रे योजयेत्। चन्दनेन सर्वाङ्गमालिप्य पाद्याद्यर्घ्यान्तमभ्यर्च्य सहस्रधारयाऽभिषेचयेत्। देव्योरपि तत्तन्मन्त्राभ्यां संस्नाप्य चन्दनं दत्वा प्लोतेन परिमृज्य वस्त्रखण्डेनाच्छाद्यालकान् शोधयेत्। पुनराचमनं दत्वा पादयोः पुष्पाणि दद्यात्।

देवं सहस्रधारया, अलाभे षोडशादि चतुरन्तं यथालाभं कुम्भोदकैरभिषेचयेत्। तत्काले चतुर्दिक्षु वेदान् पाठयेत्। स्तोत्रैर्जयशब्दैर्नृत्तगीतवाद्यैश्च घोषयेत्। पुनः शुद्धोदकैरभिषिच्य प्लोतेन विमृज्य वस्त्रेणाच्छाद्यालङ्कृत्य अलकबन्धं विसृज्य धूपं दत्वा उत्तरीयोपवीताभ्यां भूषयेत्। पाद्याचमनपुष्पाञ्जलीर्दत्वा पीठे देवं संन्यस्य दूर्वाक्षतगन्धपुष्पयुतं पात्रं मकुटोपरि त्रिः प्रदक्षिणमावर्त्य पुरतो निक्षिपेत्। रक्षादीपं कृत्वा आदर्शं दर्शयेत्। छत्रचामरादि समर्प्य अपूपादि प्रभूतं हविर्निवेदयेत्। पाद्याचमनमुखवासान् दत्वा यानमारोप्यालयं प्रदक्षिणीकृत्य जीवस्थाने प्रतिष्ठाप्यार्चयेत्।

राजोपचारैः प्रभूतपञ्चविधहविर्भिश्च विना पाद्याचमनदन्तधावनतैलाभ्यञ्जनहरिद्रागन्धोदकस्नानैरष्टोपचारैः स्नपनं मध्यमम्। शुद्धान्नमेव हविर्दीयत इति एतत्कल्पे विशेषः। अन्यत् सर्वं पूर्ववत्।

सामान्यतः सर्वेषु स्नपनप्रयोगेष्वयं प्रकारो द्रष्टव्यो यथा- आचार्यः देवं प्रणम्य पाद्याद्यैरभ्यर्च्य देवस्य दक्षिणे उत्तराभिमुखस्तिष्ठेत्। शिष्यस्तं प्रणम्य रक्षस्वेति मन्त्रतः पञ्चगव्यादिकलशं क्रमेण गुरुहस्ते दद्यात्। गुरुस्तं प्रणवेन प्रोक्ष्यादाय वामहस्ते धृत्वा सव्येन कूर्चमादाय द्रव्यनामोक्त्वा मन्त्रान्ते कूर्चाग्रेण देवस्य मौलौ सकृत् स्रावयेत्। कूर्चेन सह तद्द्रव्यं त्रिः सकृद् वा मौलौ प्रदक्षिणीकृत्य 'विष्णुं स्नापयामी' त्युक्त्वा द्रव्येण स्नापयेत्। तत्र पञ्चगव्यानि फलोदकं च पादयोः स्रावयेत्। अन्यैर्द्रव्यैरेव स्नपयेदित्यप्येके। स्नपनानन्तरं गुरुहस्तात् तं कलशं शिष्यो गृहीत्वा पूर्वस्थाने न्यस्य करौ प्रक्षालयेत्। प्रतिद्रव्यं स्नपनानन्तरं देवं वस्त्राद्यैर्विभूष्याघ्यान्तमभ्यर्च्य हारिद्रैः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



स्नपयेत्। ततः प्रणम्य देवं कलशाधिदेवान् विसर्जयेत्। शुद्धस्नानोक्तमार्गेण देवं तैलेनाभिषेचयेत्।

प्लोतवस्त्रेण विमृज्य देवं श्वभ्रादादाय योगासने न्यस्य वस्त्राद्यैर्विभूष्य अर्घ्यान्तमभ्यर्च्य महाहविः प्रभूतं वा निवेदयेत्। नृत्तगेयादि विनोदानर्पयेत्। यजमान आचार्यं पूजयेत्। आचार्यः पुनः देवमादायालयप्रदक्षिणं कृत्वा जीवस्थाने प्रतिष्ठाप्य पूजयेत्।

स्नपनस्य पूर्वदिने रात्रौ रात्रिपूजानन्तरं देवं श्वभ्रदक्षिणपार्श्वे शयने शाययेत्। प्रतिसरं बन्धयेत्। ततः स्नपनावसानपर्यन्तं पाद्याद्यैरष्टविग्रहैर्देवमाराधयेत्। हविर्नैव निवेदयेत्। रात्रौ यदि स्नपनं तर्हि शयनं विनैव तत्काले कौतुकं बद्ध्वा स्नपयेत्।

स्नपनोपक्रमे यजमान आचार्यं सशिष्यं दैवज्ञं च वस्त्राभरणैः पूजयेत्। आचार्यः स्नपनार्थं शय्यागतं देवमुत्थाप्याभरणैरलंकृत्य जलधारापुरःसरं शकुनसूक्तेन मन्दिरं प्रदक्षिणीकृत्य श्वभ्रमध्ये स्थापयेत्। श्वभ्रस्य पश्चिमे औपासनकुण्डे आहवनीयादौ वा आघारं हुत्वा हौत्रप्रशंसनं कृत्वा देवं देवीभ्यां सह दक्षिणप्रणिधौ जले आवाहयेत्। ततोऽध्वर्युः पङ्क्तीशं सेनेशं जयाद्याः कलशाधिपांश्च देवान् उत्तरप्रणिधौ जले आवाहयेत्। जुष्टाकारस्वाहाकारपूर्वं मूलमन्त्रैः क्रमेणैव जुहुयात्। क्रियामन्त्रद्रव्यध्यानादि-सर्वविपर्याससङ्करलोपदोषप्रायश्चित्तार्थं सर्वसम्पत्तिसिध्यर्थं च पुरुषसूक्तेन विष्णुसूक्तेन च जुहुयात्। वैष्णवैः षण्मन्त्रैः प्रायश्चित्ताहुतीश्च जुहुयात्। देवमुद्दिश्य नामन्त्रं किञ्चिदपि आचरेत्। यत्र मन्त्रविशेषो न निर्दिष्टोऽस्ति तत्कर्म सावित्र्या कुर्यात्।

सावित्रीमन्त्रमुच्चार्य ऊर्ध्ववेद्यां पूर्वादीशानपर्यन्तं जया विजया विन्दा पुष्टिका नन्दका कुमुद्वती उत्पलका विशोका चेत्यप्सरसः पूजयेत्।

स्नपनार्थमुदधानीं वस्त्रपूतेन जलेन पूरयेत्। देवपूजायां रात्रौ जलं न गृह्णीयात्। रात्रौ ग्रहणं चेत् अग्निसन्निधौ कलशादीनद्भिर्विशोध्य धूपद्रव्येण धूपयेत्। कलशान् जलेनापूर्य पिधाय न्यसेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



आचार्यः शुचिर्भूत्वा उष्णीषोत्तरीये धृत्वा प्राङ्मुखः सन् दधि प्राश्य सूर्यं नमस्कृत्य हरेः पुरतो जानुभ्यां भूमिं निपीड्यासित्वा स्थित्वा वा देवं स्नपयेत्। हस्ताभ्यां पुष्पाणि देवस्य पादयोर्न्यसेत्। देवपीठात् निर्माल्यं विसृज्य पाद्याद्य-र्घ्यान्तमष्टविग्रहैरर्चयेत्। प्रतिद्रव्यस्नपनोत्तरमेवं निर्माल्यं विसृज्य नवानि पुष्पाण्यर्पयेत्।

नित्यस्नानं विनाऽन्यत्र देव्यौ प्राणदेशान्न चालयेत्। यथा अग्निहोत्रगृहात् पत्नी कदापि ग्रामान्तरं न गच्छति एवम्।

नवविधस्नपने आचार्यः सयजमानः द्रव्यदेवाराधनार्थमेकं, कलशोद्धरणार्थं द्वौ चतुरो वा, अभिषेकार्थमेकं, होमार्थमेकं होतारमेकं च वरयित्वा पूजयेत्।

पर्वतैर्मङ्गलैश्च देवस्य प्रदक्षिणप्रणामौ कारयेत्। अन्यैर्द्रव्यैः प्रदक्षिणप्रणामपूर्वं स्नपनं कारयेदिति विशेषः। मृदादिद्रव्याणां न्यासे तैः स्नपने च पृथक्पृथक् मन्त्रा विहिताः सन्ति। एके तु प्रणवपूर्वं गायत्र्यैव मृदादिद्रव्याणां न्यासं पवमानाद्यैरेव स्नपनं चाहुः।

स्नपनस्य सर्वाभीष्टसिद्धिर्वैकुण्ठलोकप्राप्तिश्च फलमुक्तम्। तथा स्नपनान्तोत्सवस्य प्रजावृद्धिर्विपुलसम्पत्प्राप्तिश्च। स्नपनान्तोत्सवाकरणे न देवस्तुष्यति। किञ्च येन द्रव्येण देवं स्नापयेत् तद्द्रव्यं तस्य वर्धते। राज्ञो राष्ट्रस्य च तद्द्रव्यसमृद्धिश्च भवति। अशुभानि नश्यन्ति। शुभानि वर्धन्ते।

मेरोरुत्तरपार्श्वे कलशान् न्यसेत्। मध्ये मौलिं धान्यपीठे प्रतिष्ठाप्य तस्मिन् अनन्तं पुष्पादिभिः षड्विग्रहैः पूजयेत्। अष्टभिः कलशैः संस्नाप्य वस्त्रेणाच्छाद्य चामरैरुपवीजयेत्। अभिषेकान्ते जयशब्देनोद्धृत्य देवपार्श्वे निदध्यात्। देवं पाद्याद्यैरष्टविग्रहैः पूजयेत्। यजमानः स्वयं मौलिमुद्धृत्याचार्यहस्ते दद्यात्। आचार्यः विष्णुसूक्तैकाक्षरादि जप्त्वा ध्रुवसूक्तेन भूतो भूतेष्विति च मन्त्रेण ध्रुवे वा कौतुकादौ वा मौलिं न्यसेत्। चतुर्दिक्षु चत्वारः पुरुषसूक्तादिकं जपेयुः। पायसादि हविर्निवेद्यान्तहोमं कृत्वा पञ्चप्रणामानर्पयेयुः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



देव्योः सह स्नपनं नवविधस्नपनेषु न कार्यम्। देवमेव संस्नाप्य हविर्निवेदयेत्। देव्योः सहपीठे प्रतिष्ठा चेत् देवस्नापनान्ते देवदेव्यौ कलशं विना शुद्धोदैः स्नपयेत्।

देवे तैलाभ्यक्ते न स्नपनं कुर्यात्। तैलमोक्षं कृत्वा स्नपनमाचरेत्। उदयात् पूर्वं पक्वमपि हविः, सोष्णं चेत् तद् दिवा निवेदयेत्। अस्तमयात् पूर्वं पक्वमपि सोष्णं चेद्रात्रौ निवेदनार्हम्। पात्रान्तरगतं शीतं सूतिकया प्रतिलोमैरुदक्यया वा दृष्टं, मक्षिकाकीटादिदूषितं च हविर्नैव निवेदयेत्। यद्यज्ञानान्निवेदितं तर्हि शुद्धोदैरभिषिच्य महाशान्तिं हुत्वा द्विगुणं हविर्निवेदयेत्।

ध्रुवार्चास्नपनं चेत् आलयाभिमुखे प्रपां कृत्वा धान्यराशौ कलशस्थापनं कार्यम्। तमादायाभ्यन्तरं गत्वाभिषेचयेत्। रात्रौ सूर्योदयात् पूर्वं स्नपने शक्तिं नोद्वासयेत्। बिम्बात् श्वभ्रे संस्थाप्य स्नपनान्ते समभ्यर्च्य उद्वासयेत्। उदये तु शक्तिमुद्वास्य ध्रुववेद्यां निवेश्य ध्रुवात् तत्रावाह्य स्नपयेत्। अथवा औत्सवं बिम्बं ध्रुवपार्श्वे प्रतिष्ठाप्य तत्रैव स्नपनोत्सवादिः कार्यः। न तु ध्रुवे उत्सवं कुर्यादित्यन्ये वदन्ति।

सन्ध्याकाले कौतुके यदि स्नपनं प्राप्तं तदा स्नपनमादौ कृत्वा ततो नित्यार्चनं कर्तव्यम्। प्रातःकाले स्नपनं चेत् नित्यार्चनानन्तरं स्नपनं कार्यम्।

पूर्वरात्रौ स्नपने प्राप्ते कौतुकबेरात् शक्तेरुद्वासनं नास्ति। कौतुकबन्धनं कृत्वा स्नपनं कार्यम्। रात्रौ तुरीययामे चेत् स्नपनं, तदा कौतुकात् शक्तिं ध्रुवे आरोप्य कौतुकं श्वभ्रमध्ये संस्थाप्य कौतुकं बध्वा स्नपयेत्। रात्रिपूजावसाने कौतुकात् ध्रुवे शक्त्यारोपणं कृत्वा निशान्ते ध्रुवात् शक्तेः कौतुके आवाहनं नित्यम्।

प्रतिष्ठोत्सवस्नपनाद्यर्थं वरणीय आचार्य एवंलक्षणको भवेद्यथा- स वैखानसकुले जातः निषेकादिक्रियान्वितः ज्ञानसमन्वितश्च स्यात्। स गृहस्थो ब्रह्मचारी वानप्रस्थो वा भवेत्। देवकार्यमध्ये आचार्यस्य ऋत्विजां वाऽऽशौचं यदि प्राप्नोति तदा स्नानेनैव विशुद्धिः स्यात्। स्नात्वा ते कर्म कुर्युः। यतः दीक्षितानां व्रतस्थानां यतीनां ब्रह्मचारिणामाशौचं न भवेत्, तेषामुदके पद्मपत्रवत् अलेपात्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



दीक्षितोऽप्येकपुत्रस्तु मातापित्रोर्गुरोर्वा मृतौ, संस्कृत्य शालामागत्य देवकार्यं कुर्यात्। देवकार्यसमाप्तौ तु प्रेतकार्यं कुर्यात्। तत्समाप्तौ च देवकार्यं कुर्यात्। पूर्वं देवकार्यं, ततः प्रेतकार्यं दिने दिने कर्तव्यं स्यादिति शातातपोऽब्रवीत्।

देवकार्यमध्ये आचार्यमरणे प्राणोत्क्रमणकाले रक्षाबन्धं विसृज्य तत्पुत्रादिषु तं बध्वा शीघ्रं कर्म प्रवर्तयेत्। तत्पुत्रादिष्वलब्धेषु देवहस्ते रक्षासूत्रं बन्धयेत्। अन्यमाचार्यमाहूय कार्यशेषं समापयेत्। तस्य रक्षाबन्धनं न कार्यम्। अज्ञानादन्यहस्ते बन्धनं कृतं चेत् तत् कर्म निष्फलं स्यात् राजराष्ट्रविनाशकरं स्यात्।

## ८. ध्रुवार्चाबेरस्नपनम्

ध्रुवार्चाबेरस्नपने मण्डपे प्रपायां वा मृदादिद्रव्याणि संन्यस्य देवानभ्यर्च्य तन्मध्ये धान्यराशौ गन्धतोयपूर्णं कुम्भं संन्यस्य तत्र वरुणं पूजयेत्। देवदेवमष्टविग्रहैरर्चयित्वा देवेशं परितः पीठोर्ध्वे जयादीनभ्यर्च्य कलशानादाय अभ्यन्तरं प्रविश्य स्नपनं कुर्यात्। हवींषि च निवेदयेत्। औत्सवं बिम्बं वा ध्रुवपार्श्वे प्रतिष्ठाप्य तत्रैव स्नपनं कुर्यात्। एकबेरे कौतुके शयनं विना, प्रतिसरबन्धनपूर्वकं स्नपनं सद्यः कार्यम्।

## ९. पञ्चविंशतिकलशस्नपनम्

पञ्चविंशतिकलशस्नपनं स्नपनेष्वधमाधमं क्षुद्रं दुर्बलानां भक्तानां महाफलप्रदम्। गव्यादिभिः सर्वौषध्युदकान्तैर्द्रव्यैः पूर्णाः द्वादश प्रधानकलशाः जलपूर्णा द्वादशोपस्नानकलशाः हरिद्राचूर्णपूर्णकलशश्चैक इति मिलित्वा पञ्चविंशतिः कलशाः स्नपनार्थं स्थाप्यन्ते। जयादीन् पङ्क्तीशममितं वीशं दिक्पालांश्च मूर्तिमन्त्रतः कलशाद् बाह्यतोऽभ्यर्च्य कलशानादाय देवदेवं स्नापयेत्। ततः कलशेशान् विसृज्य शुद्धस्नपनमार्गेण तैलेनाभिषेचयेत्। प्लोतवस्त्रेण विमृज्य श्वभ्राद् देवमादाय योगासने संस्थाप्याभ्यार्च्य महाहविः प्रभूतं वा निवेदयेत्। देवेशं पुनरादाय धामप्रदक्षिणं कृत्वा जीवस्थाने प्रतिष्ठाप्य पूजयेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



## १०. सहस्रकलशस्नपनम्

मण्डपस्य पूर्वार्धे कलशस्थापनाय द्विप्रस्थैर्व्रीहिभिः पञ्चदश पदानि सूत्रमार्गेण कुर्यात्। तत्र प्राक् पश्चिमायता द्वितालविस्ताराः पञ्चदशपङ्क्तीः कुर्यात्। ताः पञ्चगव्यैः समभ्युक्ष्य दर्भैः समास्तरेत्। प्रथमपङ्क्तौ पर्वतधान्याष्टमङ्गलाङ्कुराणि न्यसेत्। द्वितीयादि-त्रयोदशान्तासु पङ्क्तिषु क्रमेण पञ्चगव्यादिप्रधानद्रव्यकलशान् सोपस्नानान् न्यसेत्। प्रतिद्रव्यं चतुर्विंशतिः प्रधानकलशाः अष्टचत्वारिंशदुपस्नानकलशाश्चेति ज्ञातव्यम्। चतुर्दश्यां पङ्क्तौ पुण्यपुष्पाणि चूर्णानि कषायकलशांस्तीर्थकलशांश्च न्यसेत्। कषायस्य चत्वारः प्रधानकलशाः षोडश चोपस्नानाः। तीर्थतोयस्य चतुर्विंशतिकलशाः। पञ्चदश्यां पङ्क्तौ वनौषधीः हरिद्राचूर्णकलशान् सर्वगन्धकलशांश्च न्यसेत्। हरिद्राचूर्णस्य चतुर्विंशतिः प्रधानकलशाः अष्टचत्वारिंशदुपस्नानकलशाश्च भवन्ति। सर्वगन्धस्य प्रधानाश्चत्वार उपस्नानास्तु षोडशेति आहत्य कलशाः सहस्रं भवन्ति।

विष्वक्सेनं पङ्क्तीशं चार्चयित्वा पत्रैः श्वभ्रं समाच्छाद्य उपरि कूर्चान् निक्षिपेत्। जयादीः पूजयित्वा शयनाद्देवमुत्थाप्य ग्रामं प्रदक्षिणीकृत्य श्वभ्रमध्ये स्थापयेत्। हौत्रप्रशंसनपूर्वकं तदालयगतान् मृदाद्यधिदेवांश्च सर्वानावाह्य जुष्टाकारं कृत्वा क्रमेणाहुतीर्जुहुयात्। ततो देवेशं स्नपयित्वालंकृत्यालयं परीत्य प्राणस्थाने प्रतिष्ठाप्य प्रभूतं निवेदयेत्। दक्षिणां च प्रदापयेत्। चतुर्णामभिषेक्तॄणां दक्षिणा आचार्यदक्षिणा स्यात्। तदर्धमध्वर्युहोत्रोः। चतुर्णां कलशपूजकानां तत्समा दक्षिणा। तदर्धं परिचरितृभ्यां दक्षिणा देया। स्नपनोपयुक्तानि द्रव्याणि सर्वाणि वस्तूनि चाचार्याय दद्यात्।

एवं यो भक्त्या विष्णोः स्नपनं कुर्यात् स स्नपनोक्तं सर्वं फलमवाप्नोति। सर्वान् कामानवाप्नोति। केवलेन क्षीरेण घृतेन वा गव्येन विष्णुं स्नापयन्नपि फलमेतदवाप्नुयात्।

## ११. शुद्धस्नपनम्

नित्यार्चनस्नपनोत्सवेषु जन्मनक्षत्रपुण्यनक्षत्रेषु च शुद्धस्नपनं देवस्य विहितम्। अलङ्कृते पीठे स्नपनबेरं संस्थाप्य पाद्यमाचमनं मुखवासं च दद्यात्। वस्त्राभरणादीनि

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



विमोच्य वाससाऽऽच्छाद्य मुखवासं दत्वा वस्त्रेण स्कन्धं समाच्छाद्य अलकशोधनं कुर्यात्। शिरसि तैलं संस्राव्य मर्दयेत्। स्कन्धात् वस्त्रं विमोच्याङ्गे अभ्यञ्जनं कृत्वा तच्छेषं भक्तेभ्यो दद्यात्। शालिपिष्टेन परिमृज्य आर्द्रवस्त्रेण च विमृज्य स्नानपीठे देवं स्थापयेत्। पादौ प्रक्षाल्य सौवर्णैः साधनैश्चूतपत्रसिराभिर्वा दन्तधावनं तालुशोधनं च कारयेत्। मुखप्रक्षालनम् आचमनं च दद्यात्। एकादश्यां पर्वणि नवम्यामष्टम्यां चतुर्दश्यां च दन्तधावनतालुशोधने अभ्यञ्जनं च वर्जयेत्। अन्यथा ग्रामयजमानयोर्भयप्रदं भवति। अम्लेन संशोध्य बिम्बशुद्धिं कृत्वा शुद्धोदकैरभिषिच्य हरिद्रापिष्टेन सर्वाङ्गमालिप्य शुद्धोदकैरभिषेचयेत्। क्षीरेण उष्णोदकैर्वा अभिषिच्य गन्धतोयैरपि संस्नाप्य वस्त्रमाल्यादिभिरलंकुर्यात्। पाद्याद्यर्घ्यान्तमभ्यर्च्य सहस्रधारयाऽभिषेचयेत्। तदलाभे षोडशादि चतुरन्तं यथालाभं कुम्भोदकैरभिषेचयेत्। पुनः शुद्धोदकैरभिषिच्य पूर्ववन्मण्डपे पीठे वस्त्राभरणगन्धमाल्यादिभिरलंकुर्यात्। पाद्याद्यर्घ्यान्तमभ्यर्च्य दूर्वाक्षतगन्धपुष्पाणि हस्ताभ्यां गृहीत्वा मकुटोपरि त्रिःप्रदक्षणीकृत्य पुरतो निक्षिपेत् रक्षादीपं कारयेत्। आदर्शच्छत्रचामराद्युपचारं च कुर्यात्। हविर्निवेदयेत्। पुनराचमनं मुखवासं च दत्वा यानमारोप्यालयं प्रदक्षिणीकृत्यान्तः प्रविश्य पूर्वस्थाने न्यसेत्। अर्चनं चेज्जीवस्थाने प्रतिष्ठाप्यार्चयेत्।

प्राङ्मुखं देवमुत्तराभिमुखः सन्, उत्तराभिमुखं देवं पश्चिमाभिमुखः सन्, दक्षिणाभिमुखं च देवं प्राङ्मुखः सन्नर्चयेत्। अन्यदिङ्मुखं तु नार्चयेत्। सर्वप्रयत्नेन देवस्य दक्षिणपार्श्वे स्थित्वा अर्चयेत्। अथवा वामपार्श्वे। इन्द्रादिपरिवारादीन् तत्तत्स्थाने समर्चयेत्। दिव्योपचारलोपश्चेत् क्षमस्वेति देवं प्रणमेत्।

भक्तियुक्तस्य या पूजा अधमाप्युत्तमा भवेत्।
भक्तिहीना च या पूजा उत्तमा सापि नश्यति।।

अयं शुद्धस्नपनप्रयोगे उत्तमः कल्पः। विना राजोपचारैः प्रभूतहविषा च मध्यमः कल्पो भवति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



## १२. पञ्चगव्यप्रोक्षणम्

गोमयेनोपलिप्ते मण्डपे षोडशदलं पद्मं विलिख्य तन्मध्ये द्रोणार्धतण्डुलपूर्णे कांस्यपात्रे पञ्चदलपद्मं विलिख्य मध्ये आज्यं, पूर्वादिषु दधिक्षीरगोमयगोमूत्रपात्राणि न्यस्याधिदेवानर्चयेत्। पञ्चगव्ये तु अधिदेवाः- घृते सामवेदः, दध्नि ऋग्वेदः, क्षीरेऽथर्ववेदः, गोमये स्कन्दः, गोमूत्रे शर्वश्चेति। विष्णुसूक्तरुद्रमन्त्रत्र्यम्बकमन्त्रैः अणोरणीयानिति आपोहिष्ठेति प्रोक्षणमन्त्रैश्च सर्वं मन्दिरं पञ्चगव्येन प्रोक्षयेत्। शंनोदेवीरित्युक्त्वा आचार्यकरदत्तं पञ्चगव्यं त्रिः पिबेत्। तेन सर्वपापैः प्रमुच्यते।

## १३. पञ्चगव्यस्नपनम्

देवस्य पञ्चगव्यस्नापने सर्वपापनाशः स्यात्। पञ्चगव्यलोपे तु गोहत्यापापम्। गोमूत्रं दधि घृतं क्षीरं गोमयजलमिति पञ्चभिर्द्रव्यैः पञ्चप्रधानकलशान् पूरयित्वा तेषु जाह्नवीं यजुः साम ऋचमथर्ववेदं चावाह्य पूजयेत्। उपस्नानकलशेषु गन्धोदकं अम्लोदकं हारिद्रोदं कुशोदं स्वादूदं च प्रपूर्य पूजयेत्। अभिषिक्तावशिष्टं पञ्चामृतं पञ्चगव्यं च प्राश्य सर्वपापैः प्रमुच्यते।

पञ्चगव्यार्थं कपिलाया गोः क्षीरं, श्वेताया दधि, रक्ताया घृतं, कृष्णाया गोमयं, नीलाया गोमूत्रं च प्रशस्तम्। पतितं गोमयं श्रेष्ठम्। गोमूत्रं चाप्यपातितम्। धारोष्णं क्षीरमादेयम्। सद्यस्तप्तं घृतम्। दधि चाप्यनतीताहम्।

पञ्चगव्ययोजनप्रकारो यथा - आढकषोडशांशेषु एकांशं घृतम्। द्व्यंशं दधि। त्र्यंशं क्षीरम्। चतुरंशं गोमयम्। षडंशं गोमूत्रम्। यद्वा आढकार्धं गोमूत्रम्। तदर्धं गोमयम्। प्रस्थं क्षीरम्। तदर्धं दधि। कुडुबं घृतम्। एवं पञ्चगव्यं योजयेत्। यद्वा प्रस्थपादं घृतम्। ततो द्विगुणं दधि। त्रिगुणं क्षीरम्। चतुर्गुणं गोमयम्। षड्गुणं गोमूत्रं चेति।

तण्डुलोपरि चतुरश्रे स्थण्डिले अष्टदलं पद्मं कृत्वा तन्मध्ये प्रणवं, दलेषु च प्रागादीशानपर्यन्तमष्टाक्षरं न्यस्य, तत् पद्मं कुशपुष्पाद्यैरलंकृत्य मध्ये पदे गोमूत्रं,

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



पूर्वादिषु दधिघृतक्षीरगोमयानि, आग्नेय्यां गन्धोदकं, नैर्ऋत्यामाम्लकं, वायव्यां हारिद्रम्, ऐशान्यां कुशोदकं च विन्यस्य तेषु तदधिदेवान् पूजयेत्। गोमूत्रे जाह्नवी। दध्नि यजुर्वेदः। घृते सामवेदः। क्षीरे ऋग्वेदः। गोमयेऽथर्ववेदश्चाधिदेवाः। गायत्र्या गोमूत्रं, दधिक्राव्णेति दधि, शुक्रमसीत्याज्यम्, आप्यायस्वेति क्षीरं, गन्धद्वारेति गोमयं, देवस्य त्वेति कुशोदकं च क्रमेण संयोजयेत्। चतुर्वेदादिमन्त्रैः पञ्चगव्येन देवं स्नापयेत्। अम्लेन शोधयेत्। सिनीवालीति हारिद्रैः भूरानिलेति गन्धोदकैः पुरुषसूक्तेन स्वादुशीतलतोयैश्च हरिं स्नपयेत्।

पञ्चानां गव्यानामाहरणे विनियुक्ता मन्त्रास्तु - गोमूत्रस्य गाङ्गेयो मन्त्रः। गोमयस्येशानमिति मन्त्रः। क्षीरस्य हिरण्यपाणिमिति। दध्न इषे त्वेति। घृतस्य चायं त इति।

## १४. पञ्चामृतस्नपनम्

गुडं दधि क्षीरं घृतं मधु इति पञ्चामृतपूरितेषु पञ्चसु प्रधानकलशेषु चन्द्रमथर्ववेदं यजुः साम ऋचं चावाहयेत्। तदुपस्नानकलशेषु पञ्चसु आदित्यमश्विनौ रुद्रं वत्सरान् पञ्चवायूंश्च क्रमेणावाहयेत्। पाद्याद्यैरर्चयित्वा सोमं राजानं, शं नो देवीः, इषे त्वोर्जेत्वा, अग्न आयाहि, अग्निमीले मन्त्रैः पञ्चामृतानि, वारीश्चतस्रेति सर्वोपस्नानजलानि चाभिषेचयेत्। इदं पञ्चामृतस्नपनं सर्वशान्तिकरम्। अवशिष्टं पञ्चामृतं पञ्चगव्यं च प्राशितं सकलमहापापोपपातकहरं, सकलैहिकभोगसायुज्य प्रदं भवेत्।

## १५. महाभिषेकः

स्नपनालये भूमण्डलं लिखेत्। मध्ये महामेरुं कल्पयेत्। मृदङ्गाकृतिं हस्तोत्सेधं मेरुं कृत्वा तस्य पूर्वदक्षिणपश्चिमोत्तरेषु क्रमेण श्वेतरक्तपीतकृष्णवर्णं विष्टम्भपर्वतं कृत्वा सर्वत्र हेमरत्नभूषितं कुर्यात्।

तत्र महामेरुमावाह्यार्चयित्वा तस्य मूर्धनि क्रोडरूपिणं देवेशं प्राङ्मुखं पूजयेत्। मेरुमध्ये सूर्यं, प्राच्यां चतुर्मुखम् उत्तरे भूदेवीं, दक्षिणे जम्बूवृक्षं चार्चयेत्। मेरोर्दक्षिणे

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



श्वेतवर्णं हिमाद्रिं, पिङ्गलं हेमकूटं, रक्तवर्णं निषधं च लिखेत्। उत्तरे नीलवर्णं नीलाचलं, श्वेतं श्वेतगिरिं, हेमाभं च शतशृङ्गं लिखेत्। सर्वत्र धातुभिर्वर्णयेत्। इदं जम्बूद्वीपम्। ततो लवणसमुद्रादिसप्तसागरान् प्लक्षादिषड्द्वीपांश्च लिखेत्। परितः लोकालोकपर्वतं दिक्षु इन्द्रादिलोकपालानां लोकांश्च लिखेत्।

महास्नपने कृते राजानः सागरान्तां महीं प्राप्नुवन्ति। इन्द्रादिलोकपालाश्चानेन कर्मणा हर्यनुग्रहेण लोकपालत्वं प्रापुः। पृथुजनकमान्धात्रादिनृपा सुदीर्घकालं महीं पालयामासुः। अतो राजा विष्णोर्महभिषेकं कारयेत्। उत्तरायणे श्रवणादिशुभनक्षत्रे शुभवारे शुक्लपक्षे शुभतिथौ स्थिरराशौ अङ्कुरार्पणपूर्वकं महाभिषेकं कुर्यात्।

आलयप्रमुखे उत्तरे द्वादशषोडशहस्तविस्तीर्णां चतुर्हस्तोच्छ्रयां च प्रपां चतुर्दिक्षु तोरणवितानादिभिरलङ्कृत्य अत्र भूमण्डलं लिखेत्। मध्ये हस्तोत्सेधो रत्नाढ्यो महामेरुर्मृदा कार्यः। तस्य चतुर्दिक्षु चान्ये पर्वताः कार्याः। दक्षिणे हिमाद्रिः हेमकूटो निषधश्च। नीलः श्वेतः शतशृङ्गश्चोत्तरे। जम्बूद्वीपमेवं प्रकल्प्य तद्बहिः वर्तुलाकारेण परितः प्लक्षादिद्वीपान् लवणादिसप्तसागरांश्च कल्पयेत्। दिक्षु इन्द्रादिलोकपालानां लोकान् न्यसेत्। लोकालोकमहापर्वतमपि परितो न्यसेत्। पूर्वरात्रौ वास्तुहोमं लोकपालार्चनं च कारयेत्। आचार्याद्यैरभिषेकं करायेत्। आचार्यः श्रद्धया महामेरुर्महीभर्ता देवावासः शैलेन्द्र इति चतुर्मूतिमन्त्रैर्महामेरुमर्चयेत्। तस्य मूर्धनि प्राङ्मुखं क्रोडरूपिणं हरिम् आदिवराहं यज्ञेश्वरम् उर्वीसन्धारणं वेदवादमिति मन्त्रैरर्चयेत्। मेरोर्मध्ये सूर्यं प्राच्यां चतुर्मुखम् उत्तरे भूदेवीं दक्षिणे जम्बूशाखां च पूजयेत्। कौतुकं बध्वाऽधिवास्य पञ्चगव्यादि-पूर्णैर्द्वादशकलशैर्देवेशं स्नपयेत्। मेरोः पश्चिमे औपासनाग्नौ आघारं हुत्वा वराहविष्णुपुरुष-सत्याच्युतादीनां लोकपालानां पर्वतानां द्वीपानां सप्तसागाराणां सप्तलोकानां पातालानां दिग्गजानां कपिलस्य च होमान् हुत्वा पारमात्मिकं पुरुषसूक्तं विष्णुसूक्तं वैष्णवं च महाव्याहृतिसंयुतं जुहुयात्। मेरोरुत्तरपार्श्वे धान्यपीठे मौलिं प्रतिष्ठाप्य जातरूपमयाय मकुटाय गणाधिपतये अनन्तायेति नामभिः पुष्पादिभिः षड्विग्रह-विधानेनाभ्यर्च्य अम्बरं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



छादयेत्। अभिषेकान्त उद्धृत्य देवपार्श्वे विन्यसेत्। यजमानो मौलिमुद्धृत्याचार्यहस्ते दद्यात्। आचार्यो विष्णुसूक्तध्रुवसूक्तादि जपन् ध्रुवे वा कौतुकादौ वा मौलिं विन्यस्य देवदेवं पूजयेत्। चत्वारः स्थापकाः चतुर्दिक्षु ध्रुवसूक्तपुरुषसूक्तादि जपेयुः। आचार्यो देवदेवमभ्यर्च्य पायसादि हविर्निवेद्य अन्तहोमं पञ्चप्रणामांश्च कुर्यात्। भक्त्या यो विष्णोरेवं महाभिषेकं कुर्यात् स चक्रवर्ती भवेत्। चतुःसागरपर्यन्तां निष्कण्टकां महीं प्राप्नुयात्। श्रीभूदेव्योः प्रसादेन श्रियं भुवं च प्राप्नुयात्। इह लोके सुखानि भुक्त्वान्ते मोक्षं चाप्नुयात्।

सारसङ्ग्रहीतारौ

**आचार्यः लक्ष्मीनरसिंहभट्टः**

**आचार्यः हयवदनपुराणिकः**

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

# Vaikhānasa Āgama Kośa
**[Volume - IX]**

*Translation of Saṇskrit Summary in to English*

# 8. Snapana Prakaraṇam

## 1. Types of Ablution

Ablution is to be performed to the deity at the conclusion of installation ceremony, at the conclusion of procession of the deity, on the fifth day of Viṣṇu, in Uttarāyaṇa, at rise and setting of Guru and Śukra, in the monthly constellation and in the constellation of the Yajamāna. Ablution is to be performed to the deity on the eruption of such mishaps as under: bad dream; affliction by diseases; famine, torture by enemies; earth-quake; meteor-fall; burning of all directions; dusty shower; sudden laughter, tearful weeping or perspiration or agitation noticed in the idol; contamination of the idol by low-born woman, who is in delivery-pollution, or who is in her menses; entry into the shrine by a dog, a cow, cock, serpent or untimely appearance of solar dummy in the city of Gandharvas; during the interval of full moon and no-moon nights; drought or scarce rainfall; and other similar mishaps. In absence of performance of ablution to deity in spite of eruption of ill-omen, there would occur some calamity all over the country.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



In the contingency of two constellations appearing in one and the same month, one should bathe the deity on the next day only. Likewise, if there are two lunar dates on the same (solar) day, the ablution should be conducted during both the lunar dates. In case, the constellation as well as one lunar date is overlapping two solar days, then the ablution-rite is to be conducted on the subsequent day. If however, constellation and the (said) lunar date fall on the same day, then, at first the constellation-ablution is to be performed and thereafter, the ablution meant for lunar date is to be conducted. In that event, having finished instant-sprouting of seeds etc. after the conclusion of first i.e. prior ablution, the second ablution is to be conducted. In the northern solar passage, the ideal time for ablutional rite is on the rise of auspicious constellation: Śravaṇa etc, and on auspicious day, in a lunar date of white fortnight and on the occasion of stable zodiac.

Ablution is threefold on the strength of the division: routine, occasional and motivated. At the time of two solar solistices (southern and northern) and the time of equinoxial juncture, the ablution is routine. At the time of lunar and solar eclipses, it is occasional. Routine ablution is twofold: bath and sprinkling. The discrimination is: in the case of images with form, bath service and in case of formless i.e. made of syllables, it is sprinkling.

In the eventuality of simultaneous occurrence of routine worship as well as occasional ablution-rite, routine worship is

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



to be done after finishing the occasional ritual (of ablution).

Experts opine that ablution with hundred and eight pitchers is the best type; that with forty eight pitchers is mediocre and the ablution with twentyfive pitchers is inferior pattern. Thus the ablution is of three types.

Corresponding to the varying number of pitchers, the ablutional rite is divided into nine categories as well. Therein, the ablution conducted with twentyfour pitchers: twelve for principal and twelve for ancillary ablutional rites; yet without any prior and posterior ingredients is termed as inferior-inferior pattern. Then, the priest should collect eight types of soils: from river etc., in one jar each, made of gold and food grains, as in previous case.

Thus the total number of principal pitchers would be twelve and ancillary bath-pitchers would be thirtysix. He should put holy flowers also in the jar and the powder of nutmeg as well as astringent powder of fig-tree-fruit etc., also in a jar. He should put the holy-ford-waters, either in four conches or cow's horns or in jars. Similarly, the powders of Śrīveṣṭaka etc. are to be collected separately in jars. In that way, alongwith prior materials, the ablution with fortyeight pitchers is termed as inferior-mediocre. The ablution conducted with one hundred and eight pitchers: twenty-four main plus eighty four ancillary-bath-pitchers, supplemented with prior and posterior ingredients is inferior-best pattern. The pattern is termed as mediocre-inferior when the number of pitchers is twice of one hundred

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



and eight (108x2 =216); thrice the number of pitchers (108x3=324) makes the pattern: mediocre-mediocre; four times (108x4=432) makes it mediocre-best type and some experts opine that five times the number (108x5=540) pitchers make the mediocre-best pattern. Six times (108x6=648) number of pitchers make it best-inferior; eight times (108x8=864) makes it best-mediocre and ten times (108x10=1080) makes it best of the best. Some people opine that five times (108x5=540) is best-inferior; six times (108x6=648) is best-mediocre and seven times (108x7=756) is the best of the best.

In the event of incapacity (of conducting elaborate ritual), the ninefold ablution is as under: Ablution with five pitchers : two filled with five cow-products and scented water (blended with sandal-paste) added by two ancillary bath-pitchers and one filled with turmeric powder, is termed as inferior-inferior Ablution-rite. The same rite conducted with the help of seven pitchers, filled respectively with five cow-products, sandal paste-water and water mixed with Kuśa grass, accompanied with equal number (i.e. three) ancillary bath-pitchers and one pitcher filled with turmeric powder (and water), is termed as inferior-mediocre. The ablution-rite conducted with nine pitchers: four main pitchers and four ancillary bath-pitchers, filled with five cow-products, sandal-scented water, water mixed Kuśa grass, and water mixed with unbroken rice, and one pitcher filled with water mixed with turmeric powder is termed as inferior-best. If these nine pitchers are attached with one pitcher meant for chant-muttering, then the pattern becomes mediocre-inferior.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



If the same ablution-rite is conducted with twelve pitchers by addition of three pitchers : one main and one ancillary, containing honey and one meant for chant-muttering, to the aforesaid nine pitchers, then the ablution is mediocre-mediocre. Ablution-rite when conducted with fourteen pitchers: seven main containing 1. five cow-products, 2. ghee, 3. honey, 4. curds, 5. sandal-scented water, 6. water mixed with unbroken rice and 7. water mixed with Kuśa grass and seven ancillary-bath-pitchers, then the ablution-rite is of mediocre-best pattern. Along with these, if main pitcher and ancillary-bath-pitcher are added, the ablution with sixteen pitchers is termed as best-inferior pattern. Again, when the main pitcher filled with curds is added by ancillary pitcher, then with those eighteen pitchers, the ablution-rite is called best-mediocre. Along with these (eighteen pitchers), if two more: main and ancillary pitchers, filled with water, containing all medicinal herbs, then that ablution-rite with twenty pitchers is known as best of best pattern.

Bothways, the total number becomes one thousand. Ablution is also divided into two types: major and minor. The major type extends upto one thousand one hundred (precisely 1080). The major type is classified ninefold as under: In this arrangement, if the twenty-four pitchers are filled with the ingredients corresponding to previous prescription, then the pattern is called inferior-inferior. If one hundred and eight pitchers contain ingredients, as per prior convention, then the pattern is called inferior-mediocre pattern. If two hundred pitchers contain prior-matching ingredients, then the pattern is

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



inferior-best. Alternatively, if forty pitchers are filled with all ingredients, then the ablution is termed as inferior-mediocre pattern. If the total number of pitchers arrives at ninety six, by summing up three each, out of twelve main pitchers, added by five each ancillary bath-pitchers, then the resultant pattern becomes inferior-medium. Or else, secondly, two and two main pitchers, when added by four and four ancillary bath-pitchers, when combined (12x6) makes seventy two pitchers. Otherwise, thirdly, having combined one main pitcher with seven each ancillary bath-pitchers (8x12) makes nintysix. Threreafter,, four pitchers containing sacred-ford-water, accompanied by corresponding eight ancillary-bath-pitchers, making a total of twelve pitchers: when combined (12x9=108) make one hundred and eight pitchers, containing prior-matching ingredients are selected, then it is inferior-best ablution. If the number of pitchers is twice of one hundred (i.e.108x2 =216), then, the pattern is mediocre-inferior; if it is thrice of that (i.e.108x3=324), then it is called mediocre-mediocre; if it is five times (108x5=540), then the pattern is called mediocre-best; if it is six times (108x6 =648), then the pattern is best-inferior; if it is eight times (108x8=864), then it is best-mediocre and if it is ten times (108x10=1080) then the pattern is best of best.

Likewise, in the contingency of non-availability of prescribed materials, he should conceptually memorize those and cast a flower and should mutter the hymns: Viṣṇu-sūkta etc. one thousand times.

The minor ablution rite is three-fold : best, mediocre and

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



inferior. The best type is materialized by ablution with the help of twenty-five pitchers, the mediocre with eighteen and inferior with fourteen pitchers.

There are many special features of ablution. Ablution of the icon or idol with water from seven pitchers is indeed the first component of installation. The worshipper should first fill seven pitchers with seven ingredients: one with milk; another with ghee; third one with honey; fourth one with water mixed with white mustard; next one with water containing unbroken rice; sixth one with scented water (sandal-paste etc.) and the last one with water containing Kuśa grass. Thus having filled seven pitchers with seven ingredients, the priest should worship seven deities: 1. Atharva-Veda, 2. Sāma-Veda and 3. Ṛg-Veda, 4. Sun, 5. Kāśyapa, 6. Six seasons and 7. Seven seers, on those seven ingredients. These are the seven main pitchers. Seven ancillary pitchers are to be installed by the side of the seven main pitchers. Therein, he should adore the following seven presiding deities: 1. Twin Aśvins, 2. Annual deities, 3. Vital breaths, 4. Sacred thread (deity), 5. Guardian of speech, 6. Takṣaka, the cobra-king, 7. Maruts, the wind-deities.

Ablution with pure water is a component of routine worship. The priest should bathe the deity with warm water and scented water, after anointing the idol with oil and cleansing its limbs. Then having held a perforated vessel with one thousand apertures, over the head of the icon, while pouring water with thousand streams and having held the conch, lotus, and mace,

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



in his hand, he should pour scented water while memorizing the hymn, Puruṣa-sūkta. The priest should first bathe the deity as per the procedure prescribed for ablution-rite as per one's capacity to afford a stipulated number of pitchers, he should bathe the deity with pitchers containing pure water and then offer food-oblation, at the conclusion of mid-day-worship, which serves as a prior ritual component of festivals.

By way of post-ritual component of festivals, the concluding bath or ablution supplemented by ablution of the discus with waters containing gems and waters containing unbroken rice, as also waters containing Kuśa grass, barley, as well as sandal-paste, filled in five pitchers. Conventionally, the priest should conduct the ablution of the discus with the remnant portions of water in those pitchers. Then he should dip the discus in holy water. Thereafter, he should fill the five main pitchers, respectively with water mixed with white mustard, water mixed with unbroken rice, water mixed with sandal-paste, water mixed with Kuśa grass and the water meant for muttering of chants and then he should worship the solar deities, celestial nymphs, sage Kaśyapa, his own preceptor, as also the six seasons in those pitchers. By the side of those pitchers, in the ancillary pitchers meant for ablution, he should worship in serial order, respectively wind-gods, sages, the cobra-king, the sacred chants as well as the semi-gods named Vidyādharas after due invocation. This is also the opinion of some experts.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



## 2. Construction of Ablutional Chamber etc.

Having constructed an ablutional chamber, pavilion, room or mini-pendal, the architect should embellish the area all over, with canopy, flags, Darbha garlands, waivy wrappers etc. at the entrance. He should set up decorations with arches and full-jars etc. Having put cloth- covering around, he should divide inner area into twenty five grids (5x5=25) after pasting it with cowdung and using a cord dipped into flour-mixed water. At the centre of it, the architect should construct an ablutional altar with any one material out of metal, stone, brick wood or clay, in the northern sectors, provided with water chamber. Thereafter, having covered that altar with a sheet of cloth and with plantain-leaves etc., he should spread bunches of Kuśa blades around. Around that having left one eighth portion of carpet area, the architect should plan exit doors, on four directions, in four out of sixteen grids in outer periphery. In the remaining twelve girds, he should prepare an altar for placing twelve main ingredients, with paddy or rice grains. Thereover, altars of twelve finger-units breadth should be constructed, for respective locations of Indra and other Gods, in outer periphery. In the western entrance door, on the left side, an altar for Paṅktīśa and in the right side of northern entrance door the altar for Viṣvakśena should be constructed. The person who constructs an ablutional altar, as well as water tub for Lord Viṣṇu is honoured by all, and is given high place of honour. For the sake of builders of charitable water booth, an abode is built in heaven, by the heaven-dwellers.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



In the event of omission of water, both at the time of ablutional ceremony, loss of house may occur.

Pure-water-ablution is possible to be conducted, either inside the ablutional chamber or in outside-area in a pavilion annexed with staircase or in permanent-pavilion.

## 3. Collection of Ablutional Materials

The materials: soil etc., which have prior utility for ablution, are said to be prior-material-items. The twelve ingredients: five cow-products etc., which are mainly useful in the ablutional rite are said to be main ingredients. The ingredients which are subsequently useful in ablution, such as sacred flowers etc., are ancillary ingredients. The items to be offered thereafter, are ornamental items. Thus the ablution with four components becomes comprehensively profuse.

The prior items are: eight types of soils: belonging to river etc.; eight mountains: Himalaya etc.; food-grains: paddy, rice-grains etc.; sprouts and the eight auspicious objects: Śrīvatsa etc. Therein, eight types of soils are to be collected from 1. river-bed, 2. paddy-field, 3. lake 4. the bottom of Darbha-grass, 5. the tusk of an elephant, 6. horns of cow or bull, 7. frog's dwelling 8. anthill. After seeking permission from Goddess Earth, those soils are to be collected separately. Then, having scorched those in sunshine, the priest should bathe the deity with the help of those soils. By that, the earth would become endowed with all kinds of crops. Otherwise, in absence of ablution with soils, there may occur destruction of crops.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



The priest should design models of eight pioneer-mountains: Himalaya, Meru, Vindhya, Viḍūra, Veḍa-parvata, Mahendra, MahāHariscandra and Śata-śṛṅga, either with sacrificial trees (trees approved for sacrificial implements) or with clay. Those should be of six finger-units breadth, at the bottom and three finger-units in height; should be endowed with paints: white, yellow, red and black on directions, in the order: east etc. (south west and north). At the time of ablution-rite, by holding these mounts over the icon of god, and rotating those right- wardly, the performer ensures stable status for his ancestral lineage. By the lapse of incorporation of mount-making, there may occur lapse of stability for the host-performer.

The preceptor should conduct the ablution-rite, after collecting eight types of food-grains: paddy, husked rice-grains, barely, green gram, black gram, Priyaṅgu, sesame, Tilva; mustard, added by lentil, and gram. The fruit thereby is abundance of crop and the counter-result, in the lapse of food-grain-ablution is crop-destruction. In the case of non-availability of all these grains, barley is deemed to the repetitive grain or else green-gram. For the atonement, the fumigatory rite, named the rite addressed to the presiding deity for the food-grains is advised.

The sprouts to be selected are of those food-grains, which are prescribed for the sprout-offering rite. In the event of its non-availability, the worship of God may be conducted with flowers, Kuśa-grass-blades, or the sprouts of Dūrvā grass, or

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



else by leaves of mango-tree etc. By worship carried out with the help of sprouts, resultant fruit is progeny-growth, and conversely, by lapse of sprout-offering rite, progeny - annihilation may take place.

The eight auspicious items are: 1.Śrīvatsa emblem, 2.Full pitcher, 3.Trumpet, 4. Mirror, 5. Fish-couplet, 6. Goad, 7. Conch and 8. Āvarta (whirl). The preceptor should design the eight auspicious objects, either with trees: fig etc. suitable for sacrificial cause, or with clay, measuring seven finger-units in height and equipped with altars, which are four-finger-units in height. Śrīvatsa should bear golden hue; water-pitcher of red colour, and trumpet resembling ripe Bimba-fruit; mirror is white; fish-couplet is of yellow colour, of red eyes and equipped with black fins; goad is of red rod and having black pointed spear; Āvarta is deep-red. By adoration with auspicious objects, there would be auspicious occurrences all over. In absence of its performance, there would emerge inauspicious events. The principal ingredients are : five cow-products, ghee, honey, curds, milk, sandal-paste, water, water mixed with unbroken rice, fruit-blended water, Kuśa-grass-mixed water, hibiscus-blended water and water mixed with all medicinal herbs. Having taken those, each one in one Āḍhaka quantity, or one half Āḍhaka or as per availability, he should fill up the remaining part of the pitchers with water.

The ghee which is freshly boiled as resembling the colour of gold is the best or it may even be less than five days old. He

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



should avoid ghee which is stale by more than one month. By offering oblation with ghee, the performer gets the fruit of studying Sāmaveda. And in the event of omission of that ablutional rite, the non-performer may face loss of intellectual faculty.

As for honey, that one which is produced from fruit or from flowers is acceptable. If it is not available, then the priest should collect cocoanut water in an earthen pot and bathe the deity while it is fresh. Alternatively, ghee from tawny cow is acceptable. He should collect honey, milk as well as ghee only after having properly refined the same. By performing oblation service to god, performer's speech oozes honey, and in its lapse, there may occur serious disease to the non-performer.

Curds which has not been fetid and which is within two days of formation is acceptable. By bathing the deity with it, pure fame is attained and by its lapse, affliction by fever occurs to the non-performer.

Cow's milk which is just milked is acceptable. The priest should avoid milk past three hours. The performer should avoid the milk of she-goat and she-buffalow . By bathing Lord Viṣṇu's icon with milk, milch cows are gained by the performer of ablutional rite. By lapse of it, the life-span is shortened and fame gets tarnished.

The scented water is blended with sandal-paste, Koṣṭu, Uśīra, cardimum, clove and such other fragrances. By bathing the deity with scented water, gain of all riches is assured, and by its lapse, the non-performer may meet with foul smell.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



Unbroken grains comprise: barley, mustard, paddy-grains, blackgram, and husked rice-grains. When the ingredients are in one eighth proportion of water, that mixture is known as unbroken grain-water. By bathing the deity with that blend, the people become harmless, and by its lapse, some harm may occur.

That mixture is known as fruitful water, when the water is added with not less than one eighth portion of water filled with fruit: plantain, betelnut, jackfruit, cocoanut, Mātulunga type of citron and orange etc. By bathing god with this kind of water, gain of auspicious fruit is assured. By lapse, life would become fruitless.

That water is called Kuśa-blended water, which is mixed with pointed Kuśa blades, Dūrvā grass and unbroken rice. By offering ablution to god, attainment of spiritual pre-eminence is achieved. By its lapse, there results lack of that eminence.

The five gems are: ruby, Puṣya, cat's eye-gem, diamond and pearl. The same set of five gems becomes a set of nine gems by addition of coral, emerald, Gomeda i.e. gem from Himalaya and Indus, and sapphire. Gem-ful water means water mixed with either five or nine gems. In the case of non-availability of gems, gold is admissible. By ablution with gem-mixed water, augmentation of beads and gems takes place. By its lapse, loss of wealth and food grains may take place.

Japyodaka is that water which is enchanted after twelve times muttering of Vaiṣṇava, Viṣṇu-sūkta as well as Puruṣa-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



sūkta. The practitioner or priest should touch water with Darbha blades and practise chant-muttering. The water fit by muttering is that which is charged after chanting with six Vedic Mantras: *ato devaḥ* or hundred repetitions of Om, or alternatively water enchanted by the hymn: Viṣṇu Gāyatrī, in that mode (i.e. twelve times). By bathing the deity with the chant-muttered water, the performer gets the fruit of chanting all the Mantras. Herbs are those which culminate in fruition i.e. fruit bearing, such as : Priyaṅgu, mustard and green gram. The water which is mixed with all these three items or even more, in one eighth quantity of water, is technically called omni-medicinal water. By the ablution with that water, there would be growth of all medicinal herbs and by its lapse affliction by diseases may take place.

Tepid warm water is that which is neither very hot nor very cold but boiled, or gently heated pure water. In lapse of such bath, the non-performer may get body-temperature.

The quantity of the bath-ingredients is to be not less than one Āḍhaka i.e. one fourth Droṇa i.e. eight shers (seven kilograms). If less quantity is used then, the ritual would turn to be exorcising rite. In respect of bathing Gods, seer and kings, the quantity should be one Droṇa or half Droṇa i.e. thirtytwo or sixteen shers i.e. (thirty or about fifteen kilograms.)

The main bath-pitchers are those which are filled with main ablutional ingredients. The ancillary bath-pitchers are those which are filled with scented pure water, kept for bath, subsequent to respective principal ablution.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



The twelve subsidiary bath-ingredients are as under: sacred flowers, powder of fragrant nutmeg; powder of fragrant resin; water from sacred fords; powder of sylvan medicinal herbs; turmeric powder; powder of all fragrant ingredients; root-scent; soaked clothes including upper cloth; ornaments and sacred thread and minerals.

The sacred flowers are as under; 1.Bilva; 2.Karavīra; 3.Lotus; 4.white water-Lily; 5.Nandyāvarta; 6.Ekapadma; 7.basil and 8.Krānta; i.e. eight in number. By worshipping God with these, gain of merit is assured and by the lapse of the worship, accrual of sin is imminent. The priest should fill following ingredients; Śrīveṣṭaka; barely; gram; green gram; fragrant root called Uśīra; Ratnaka; lentil; Damana; nutmeg; clove; camphor; cardimum; sandal etc. after pulverizing, in platters for the sake of anointing or smearing the body-limbs of the icon. In the event of non-availability of Śrī-veṣṭaka, the powder of cardimum is acceptable. By offering fragrant powder for body-rub (of icon), longevity is guaranteed. By its lapse, calamities takes place.

The priest should fill, in platters or trays, the decoctions of the fig; banyan; Madhūka; Āsana; Khadira; reed; Arjuna; Udumbara trees, after collecting the barks and pounding those. In case of non-availability of Banyan and Madhūka, powder of fig-bark is put to use. By offering service of anointing the deity with powder and extract, the performer is endowed with body lustre. And by its omission, there would arise loss of body lustre.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



Sacred-ford-water is termed as the water freshly brought from river, lake, stepped well, rope-well and spring or brook; and that water is to be fetched during day time and not at night. In case, the ablution is to be conducted at night, then water is to be fetched near fireplace. The meritorious fruit arising out of pilgrimage to holy ford is gained by performing ablution-rite to deity.

The sylvan medicinal herbs such as: Siṁhī; Nakulī; Vyāghrā; Anant; Ādityā; Pāṭhā; Saḥa-devī; Dūrvā; Apā-mārgā; Vaśā; Kaṇṭakāri; Kuruṇḍa; Marīca; Sūrya-bodhī i.e. sunflower; mustard etc. are to be fetched for pulverization. By conducting deity's ablution with powder of sylvan herbs, permanent healthy state would continue. By its lapse, there would arise disease. Turmeric powder is said to be that which is a mixture of turmeric powder, with one-sixth portion of rice flour, blended with gold-powder and which has golden shining. By conducting deity's ablution with that, Lord Hari is pleased; and by failure to do that, the person becomes bereft of riches. At the time of pulverization, moon is to be memorized on mortar-stone; Sudarśana disc on pestle, Goddess Sinīvālī ( a type of no-moon night); and celestial damsels on the maids (pounding the ingredients), and powdering is to be conducted. At that time, priest should drop gold also in it and having pulverized again, he should fetch the powder in a pitcher.

The priest should pound the following nineteen fragrant ingredients; 1.Hareṇu 2.Sthauṇeya 3.Patrā 4.Vyāghra-nakhā

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



5.Aloe 6.Maru 7.Damanaka 8.Incense Meruvāla, 9.Nut-meg 10.Māmsī 11.Camphor 12.Cardimum 13.Clove 14.Sandal 15.fragrant root Uśīra 16.Sthirānna 17.Arada 18.Sāvana 19.Kustumbaru. Then the pounded mixture is called omni-scent. By that wash, the wealth that is called fickle stands still.

Thereafter, the performer should fetch original scents which are as follows: 1.Nandyāvarta 2.Apāmārga 3.Palāśa 4.Kuśa 5.terrestrial grass 6.Basil 7.Karavīra 8.Bilva 9.Myrobalan (Āmalakī) 10.Mālatī 11.Dūrvā and 12. Birch, for the purpose of cleansing. By cleansing with these original scents, the fruit is augmentation of dynasty. And by its lapse, old age advances.

having held sandal-paste and flowers in two palms and having rotated those, three times, rightwardly, around the crown (of the image), the preist should cast those in front (of the deity); he should serve protocol of mirror-display, holding parasole and fanning chowrie. He should then offer food-oblation. Thereafter, having offered sipping water and mouth fragrance, he should mount the idol on the carriage and having taken a circum-ambulation round the temple and having entering into the temple, the preist should place the deity on the original place. If the worship is to be offered again, he should worship the deity after placing it on the live altar. The priest should worship east-facing God by himself facing the north; north-facing God by himself facing east; and he should not at all worhsip God facing the any other direction. The priest should worship God by standing at His right side, with all efforts; or else by standing on the left side. The priest should worship the retinue deities: Indra etc. at their respective places. In case, there occurs lapse of divine adorational service, then the priest should bow down uttering 'kindly pardon'. Whatever worship belongs to the worshipper with devotion, even though inferior, becomes excellent and whatever worship is deficient in devotion, even though excellent, gets spoiled. The above scheme is the best in the procedure of pure-water-ablution. The same scheme becomes mediocre with ample ablution, yet deficient in royal treatment.

## 12. Sprinkling of Five-cow-products

Having drawn a sixteen-petalled Lotus, in a pavilion,

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



plastered with cowdung and therein, having drawn a five-petalled lotus, at its centre, in a zinc-vessel filled with rice of half Droṇa quantity, the priest should put she-goat's ghee, in its centre, and place the pots containing (cow's) curds, milk, cowdung and cow's urine, respectively on the directions: east etc. (i.e. south, west and north), he should worship the following respective presiding deities: The presiding deities of five cow-products are: Sāmaveda on ghee, Ṛgveda on curds; Atharvaveda on milk; Skanda on cowdung and Śarva (Śiva) on cow's urine. The priest should sprinkle the entire shrine with five cow-products, along the recital of the Viṣṇu hymn and Rudra and Tryambaka chants, as well as the Vedic chants: *aṇor aṇīyān* ; etc. and the sprinkle-chants; *āpo hi ṣṭā* etc. Thereafter, he should sip thirce the amount of five cow products delivered at preceptor's hand, after reciting the chant: *śan no devīr*........... By that he is freed from all sins.

## 13. Ablution with penta-cow-products

By administering ablution to the deity with water containing five cow-products, there would be destruction of all sins. Yet, by lapse of (ablution with) five cow-products, the sin of killing a cow may accrue. Having filled five main pitchers with five ingredients; cow's urine, curds, ghee and milk and water blended with cowdung, the priest should worship those (pitchers), after invoking in those, respectively, Gaṅgā, Yajurveda, Sāmaveda, Ṛgveda and Atharvaveda. Then, having filled water blended with sandal-paste, water blended with sour ingredients, water

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



blended with turmeric, water mixed with Kuśa-grass and sweet water in the ancillary bath-pitcher, the priest should worship those (five pitchers). The devotee is liberated from all sins by drinking remnant of penta-nector and penta-cow-products.

For the composition of Pañca-gavya-the best commendable composition is as under: 1.milk of tawny cow, 2.curds of white cow, 3.clarified butter of red cow. The dung fallen on ground is the best. Urine is also that which is not forcibly caused to ooze. Milk is to be taken when milked afresh; and ghee is that which is just bóiled, and curds should be such for which a day is not lapsed over.

The mode of composition of Penta-cow-products is as under: In one Āḍhaka of Pañca-gavya, one sixteenth portion is ghee i.e. clarified butter, two sixteenth i.e. one eighth part is curds; three portions out of sixteen is to be milk; four portions i.e. one fourth part is to be cow dung; six portions i.e. three eighth part is to be cow's urine(total 1/16+1/8+3/16+1/4 +3/8= 16/16 = one). Alternative composition is as under : one half Āḍhaka, cow's urine plus its half i.e. one fourth is to be cowdung; one Prastha is to be cow's milk and its half is to be curds and one Kuḍuba is to be ghee. That quantity may be used. Third alternative is as under : one fourth Prastha is to be ghee: its double i.e. one half Prastha is to be curds; three times i.e. three fourth is to be milk ; four times i.e. one Prastha is to be cowdung and six times i.ẹ. one and half Prastha is to be cow's Urine.(1/4+2/4+3/4+4/4+6/4= 16/4 = 4 Prasthas total).

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



On a square-shaped altar and thereover, on the layer of rice-grains, the preceptor should draw a diagram of eight-petalled lotus and then having inscribed Om at its centre, and the eight syllables on petals, beginning with east and ending with north-east, i.e. south-east; south; south-west; west; north-west; north and north-east, he should decorate that lotus with Kuśa blades and flowers. Then having deposited cow's urine(pot), at the centre and the pots containing curds, ghee, milk and urine, respectively in east, south-west and north and pots containing sandal-paste-scented water in the south-east, sour water (of lemon juice) in south-west, turmeric-water-pot in north-west and pot containing water mixed with Kuśa-blades in north-east corner, he should worship respective presiding deities over those pots as under : Gaṅgā in cow's urine; Yajurveda in curds, Sāmaveda in milk, Atharvaveda in cowdung. These are respective presiding deities. He should combine cow's urine with Gāyatrī hymn, curds with the chant *dadhikrāvan* etc. ghee with the chant *śukram asi* etc. milk with the chant *āpyāyasva...,* cow dung with the hymn *gandhadvārām* and the water mixed with Kuśa grass with the chant *devasya tvā* in due order. The priest should bathe the deity with the five cow products along with chants from four Vedas. He should clean the icon with acidic juice and bathe the deity: Hari with turmeric water with the chant Sinīvāli and by sandal-water with *Bhūr anila* and by sweet cold water, along with Puruṣa-sūkta.

The chants enjoined for collection of five cow-products are as under: the Gāṅgeya chant for cow's urine; *īśānam* chant

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



for cow-dung; the chant; *hiraṇyapāṇim* etc. for milk ; *Iṣe tvā* for curds and *ayam te.,* etc. for ghee.

## 14. Ablution with (water containing) Penta-nector items

The priest should invoke moon, Atharvaveda, Yajurveda, Sāmaveda and Ṛgveda, respectively in five main pitchers, filled with five nector-items; jaggary, curds, milk, ghee and honey. Then he should invoke in five ablution-pitchers, ancillary thereto, Sun, two Aśvins, Rudra, Years as well as five winds in respective order. Thereafter, the priest should worship the king Soma with feet-washing water etc. and then he should sprinkle five nector-items, while reciting the chants; *śaṁ no devīḥ, iṣetvorjetvā, Agna āyāhi* and *Agnimīle* and sprinkle all the ablutional waters, while reciting the chant: *vāriścatasra*.............. Such penta-nector-ablution is atoner of all sins. The remnant of penta-nector-items and penta-cow-products when consumed is eradicater of all mega-sins and petty sins and becomes grantor of all worldly pleasures and final union with God.

## 15. Mega-Ablution

The priest should sketch a globe of the earth, in the hall, meant for ablution, and then he should design a lofty mount Meru at the centre. Having fashioned the Meru mountain of one hand-metre height, and of the shape of the musical drum called Mṛdaṅga, the preceptor should construct one buffer-mount on each of the four cardinal directions; east, west, south and north, having four respective colours; white, red,

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



yellow and black and make them overall decorated with gold and jewels.

At that place, having invoked the mega-Meru mountain, and having adored, the priest should worship the Lord of gods, in the form of hog, on the top of the mount and facing the eastern direction. The priest should worship sun at the centre, four-faced Brahmā, in the east, Bhūdevī in the north, and Jāmun tree in the south. He should depict white coloured Himalaya mountain, tawny Hemakūṭa mountain and red-coloured Niṣadha in the south. In the north of Meru, the priest should design blue-coloured Nīlācala mountain, white coloured Śvetagiri and golden-coloured Sata-śṛṅga (centa-peaked) mountain. Everywhere, he should paint those with metallic colours. This is the topography of Jambu-dvīpa island. Thereafter, he should draw the sketch of seven seas beginning with salty ocean and six islands: Plakṣa and others. He should depict Lokāloka mountain surrounding it, that is Jambu-dvīpa and he should also sketch the topography of the globes, pertaining to the directional guards: Indra etc. (Indra, Yama, Varuṇa and Kubera) on the (four) main directions.

Having completed the ceremony of mega-ablution, the host-kings obtain the rulership of the land encircled by seas. By this feat alone, the guardian of directional zones achieved that guadianship, by the grace of Lord Hari. The Kings:Pṛthu, Janaka and Māndhāta protected the earth for a prolonged period of time. For that reason, the king should arrange the mega-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



ablutional ceremony for Lord Viṣṇu. During six months of the northern solistice, at the juncture of rise of auspicious day, white lunar fortnight and auspicious lunar date and stable Zodiac, the priest should celebrate mega-ablution, after appropriate sowing of seeds and subsequent sprouting.

In the frontage of the temple, in the north, having constructed a pavilion, having respectively twelve hand-metres breadth and sixteen hand-metres length and four hand-metres height, the host-performer should decorate it with arches and canopies etc., and should draw, a globe of the earth. At the centre, a mega-mount Meru is to be made of clay and one hand-metre height and studded with gems. To all its four sides, directions, other mountains are to be fashioned: On the southern side, there should be Himālaya mountain, Hemakūṭa and Niṣadha. In the north, three mountains:Nīla, Śveta and Śata-sṛṅga are to be constructed. Having so constructed the Jambu island, on its exterior periphery, in circular mode, the preceptor should settle the islands:Plakṣa etc. and seven seas: salt-sea etc. On the cardinal directions, he should settle the globes of the directional guardians: Indra etc. He should also settle the mountain named Lokāloka, to surround it. Then the priest should arrange the fire-oblation-rite on the earlier night and adoration of directional guards on the next day. He should then arrange the ablution by preceptor and others . The preceptor should faithfully adore the mega-Meru with four iconic

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



chants : 1. Mahā-Meru, 2. Mahī-bhartā, 3. Devāvāsa and Śailendra and then he should worship Lord Hari in the form of Hog, facing east, on its top, with four chants: 1. Ādi-varāham 2. Yajñeśvaram, 3. Urvī-sandhāraṇam and 4. Veda-vādam. At the centre of Meru, he should worship sun-god, in the east four-faced Brahmā, in the north earth goddess and in the south, the branch of the Jamun tree. The priest should bathe the Lord of gods, with water from twelve pitchers filled with the ingredients, such as five cow-products etc., after tying the Kautuka band on His person and having retained in Adhivāsa mode. Then on the western sector of Meru, the priest should at first, fumigate the stream of ghee in the sacred fire called Aupasana. Then, he should offer oblation in Homa, respectively addressed to Varāha, Viṣṇu, Puruṣa, Satya, Acyuta etc., and to global guardians, mountains, islands, seven seas, netherworlds, directional elephants, and also Kapila. Thereafter, he should offer fire-oblation, along recitation of the hymn accompained by Mahā-vyāhrti (*Om bhūḥ, bhuvaḥ, suvaḥ*)

On the northern sector of Meru, having installed Mauli i.e. crown, on an altar, made of corn, the priest should worship Him with flowers, the six-course pattern with the chant: 'To Makuta i.e. crown made of gold, the leader of the team, the Infinite' and such other names. Then after the conclusion of the ablution, the priest should place the crown by the side of God and cover with cloth. Yajamāna i.e. the host-performer

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



should lift the crown and he should hand it over to the preceptor. The priest should recite the hymns: Viṣṇu-sūkta, Dhruva-sūkta etc. and simultaneously, he should place it either on the head of stationary idol or on the service-idol and worship the god of gods. The four installatory priests should recite the hymns:Dhruva-sūkta, Puruṣa-sūkta etc. on four directions. Thereafter, the preceptor should adore the God and having offered food-oblation: sweet gruel etc., he should offer final fire oblation and five salutations.

The devotee king who arranges to celebrate the mega-oblation offered to Lord Viṣṇu, with devotion, would become sovereign emperor and reign over the earth extending upto four seas, without impediment. By the grace of the two goddesses, he would obtain both wealth and land. He would enjoy pleasures in this world and finally attain spiritual bliss.

**Prof. P. Prabhakara Apte**
**Dr. Korada Suryanarayana**
*Assisted by*
**Smt. Sanjeevani Prabhakara Apte**

***

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

## वैखानसागमकोशे परामृष्टानां ग्रन्थानां सङ्केताः विवरणानि च ।

| सङ्केतः | ग्रन्थः | प्रवक्ता | संस्करणम् |
|---|---|---|---|
| स. | समूर्तार्चनाधिकरणम् | अत्रिः | तिरुमलतिरुपतिदेवस्थानेन १९४८ क्रिस्तुवर्षे देवनागर्यां मुद्राप्य प्रकाशितम् । |
| ज्ञा. | ज्ञानकाण्डः | कश्यपः | तिरुमलतिरुपतिदेवस्थानेन १९६० क्रिस्तुवर्षे देवनागर्यां मुद्राप्य प्रकाशितः । |
| अ. | अर्चनाधिकारः | भृगुः | १. आकुलमन्नाडु आर्. पार्थसारथि-भट्टाचार्याणाम् आन्ध्रलिप्यां लिखितः करगजमातृकारूपः । २. तिरुवनन्तपुरकेरलविश्वविद्यालयस्य हस्तलिखितग्रन्थालयस्य देवनागर्यां लिखितः करगजमातृकारूपः । |
| क्रि. | क्रियाधिकारः | भृगुः | तिरुमलतिरुपतिदेवस्थानेन १९५३ क्रिस्तुवर्षे देवनागर्यां मुद्राप्य प्रकाशितः । |
| खि. | खिलाधिकारः | भृगुः | तिरुमलतिरुपतिदेवस्थानेन १९६१ क्रिस्तुवर्षे देवनागर्यां मुद्राप्य प्रकाशितः । |
| नि. | निरुक्ताधिकारः | भृगुः | आकुलमन्नाडु आर्. पार्थसारथि-भट्टाचार्याणाम् आन्ध्रलिप्यां लिखितः करगजमातृकारूपः । |

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



| | | | |
|---|---|---|---|
| **प्र.** | प्रकीर्णाधिकारः | भृगुः | मद्रास् हिन्दूरत्नाकरगोपालकृष्ण - मुद्राणालयाभ्याम् १९२९ क्रिस्तुवर्षे आन्ध्रलिप्यां मुद्राप्य प्रकाशितः। |
| **य.** | यज्ञाधिकारः | भृगुः | मद्रास् हिन्दूरत्नाकर मुद्राणालयेन १९३१ क्रिस्तुवर्षे आन्ध्रलिप्यां मुद्राप्य प्रकाशितः। |
| **वा.** | वासाधिकारः | भृगुः | आकुलमन्नाडु आर् . पार्थसारथि-भट्टाचार्याणाम् आन्ध्रलिप्यां ग्रन्थलिप्यां च पार्थक्येन लिखितः तालपत्रमातृकाद्वयरूपः। |
| **वि.** | विमानार्चनाकल्पः | मरीचिः | मद्रास् वेंकटेश्वरमुद्रणालयेन १९२६ क्रिस्तुवर्षे देवनागर्यां मुद्राप्य प्रकाशितः। |

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

श्रीः

# वैखानसागमकोशः

## नवमं सम्पुटम्

# ८. स्नपनप्रकरणम्

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

श्रौतस्मार्तादिकं कर्म निखिलं येन सूत्रितम् ।
तस्मै समस्तवेदार्थविदे विखनसे नमः ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

श्रीः

# वैखानसागमकोशः

## नवमं सम्पुटम्

# ८. स्नपनप्रकरणम्

## १. स्नपनप्रभेदाः

### ८.१.१ देवेशस्य स्नपने निमित्तानि

**वा.३५**

प्रतिष्ठान्तोत्सवान्तेषु सर्वोपद्रवनाशनम्।
विष्णुपञ्चदिने चैव ग्रहणे चन्द्रसूर्ययोः।।

अयने विषुवे चैव उत्तरायण एव च।
गुरुशुक्रोदये चैव तथैवास्तमयेऽपि च।।

मासर्क्षे यजमानर्क्षे अन्यसङ्क्रमणेषु च।
दुःस्वप्ने व्याधिसम्बाधे दुर्भिक्षे शत्रुपीडिते।।

भूकम्पेऽशनिपाते च दिग्दाहे पांसुवर्षके।
देवस्य हसिते चैव रुदिते स्वेदके तथा।।

चलिते चान्त्यजातीयसूतिकोदक्यसंस्पृशे।
श्वकाककुक्कुटान्तस्थे सर्पगोधास्तथैव च।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



अकाले पूर्णचन्द्रे तु तथैवास्य क्षयेपि च।
गन्धर्वनगरे दृष्टे प्रतिसूर्ये तथैव च।।

अनावृष्ट्यल्पवृष्ट्योश्च अन्येषूत्पातकादिषु।
एवमादौ समुत्पन्ने स्नपनं चात्र कल्पयेत्।।

**वि.४८. ३२३**

प्रतिष्ठान्ते चोत्सवान्ते अयने विषुव्यतीपाते अन्यसङ्क्रमणेष्वब्दान्ते युगान्ते राहुसंप्लवे गुरुशुक्रोदये मासर्क्षेषु विष्णुपञ्चदिनेषु राज्ञो ग्रामस्य यजमानस्य च जन्मर्क्षे अनावृष्ट्यां महाव्याधिकोपे अन्यस्मिन् काम्ये च देवेशस्य स्नपनं कारयेत्।

**स.४९. १ - ४**

**य.३४. १ - ५ ; ३५.३९, ४०**

अत ऊर्ध्वं प्रवक्ष्यामि देवेशस्नपनक्रमम्।
प्रतिष्ठान्ते चोत्सवान्ते अयने विषुवद्वये।।

सूर्येन्द्वोर्ग्रहणे चापि यत्नेन स्नपनं चरेत्।
विभवे सति पञ्चर्क्षे मासर्क्षे चान्यसङ्क्रमे।।

दुर्निमित्तादिशान्त्यर्थं दर्शनेऽप्यवलक्षणे।
यजमानस्य नक्षत्रे राज्ञो जन्मर्क्ष एव वा।।

देवस्य स्नपनं कुर्यात् तत्तकाले विशेषतः।
विषुद्वये वर्तमाने ग्रहणे सूर्यचन्द्रयोः।।

अयने चोत्तरेऽतीते आरब्धे दक्षिणे तथा।
अन्येषु चैव ----------------------।।
-----------------------------------

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



अवग्रहादिदुर्भिक्षे स्नापनेनाशुभानि च।।

नश्यन्ति कुर्यात्तस्माच्च प्रयत्नात् स्नपनं प्रभोः।

**ज्ञा.७७. १६४**

प्रतिष्ठान्तोत्सवान्तविषुवायनेषु सूर्यस्य चन्द्रस्य वा राहुग्रहणे च यत्नतो देवेशं संस्नापयेत्। विभवे सति श्रवणद्वादशीमासनक्षत्रादौ अन्यसंक्रमणेषु च दुर्निमित्तदुःस्वप्नावग्रहदुर्भिक्षव्याध्यादिसर्वोपद्रवशान्त्यर्थं च राज्ञो यजमानस्य वा जन्मनक्षत्रेऽपि देवस्य स्नपनं कारयेत्।

**क्रि.१३. १ - ४**

अतः परं प्रवक्ष्यामि स्नपनं वै समासतः।
प्रतिष्ठोत्सवयोरन्ते विषुवायनयोरपि।।

देवस्य स्नपनं कुर्यात् ग्रहणे सूर्यचन्द्रयोः।
विभवे सति कुर्वीत विष्णुपञ्चदिनेषु च।।

मासर्क्षेष्वन्यसङ्क्रान्त्यां जन्मर्क्षे कर्तृभूपयोः।
ग्रहकोपेऽवग्रहे च दुःस्वप्ने दुर्निमित्तके।।

व्याध्याद्यैर्जनपीडायां तत्तच्छान्त्यै प्रकल्पयेत्।
अब्दान्ते च युगान्ते च व्यतीपातादिषु क्रमात्।।

**खि.२९. १ - ३**

**अ.२५**

अयने विषुवे चैव ग्रहणे विष्णुपञ्चके।।

सङ्क्रान्तौ च प्रतिष्ठान्ते वर्षान्ते चोत्सवान्तके।
मासर्क्षेऽन्ये शुभर्क्षे च स्नपनं सम्यगाचरेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



प्रारम्भातीतकाले च दक्षिणोत्तरकेऽयने।
विषुवद्वयकाले च वर्तमाने तु सर्वदा।।

## ८.१.२ प्राप्ते स्नपननिमित्ते स्नपनस्य लोपे फलम्

**प्र.३५. ५७७, ५७८**

निमित्ते यदि सम्प्राप्ते स्नापयेच्चेन्न माधवम्।
तस्य पापफलं वक्तुं न केनापि हि शक्यते।।

राज्ञो राष्ट्रस्य च भवेत् सर्वत्रात्याहितं ध्रुवम्।

## ८.१.३ निमित्तद्वयसन्निपाते स्नपनकालनिर्णयः

**क्रि.१३. ५२ - ५७**

यदि नक्षत्रयुग्मं स्यात् एकमासे विशेषतः।।

परस्मिन्नेव दिवसे स्नापयेत् पुरुषोत्तमम्।
तिथिद्वयं यदि भवेत् द्वयोरपि समाचरेत्।।

वारद्वयानुषक्तं चेत् निमित्तर्क्षं तिथिस्तु वा।
परस्मिन्नेव दिवसे स्नपनादीनि कारयेत्।।

एकस्मिन्नेव दिवसे निमित्तर्क्षतिथिद्वयम्।
नक्षत्रस्नपनं पूर्वं तिथिकर्म ततश्चरेत्।।

पूर्वकर्मावसाने तु कृत्वा सद्योऽङ्कुरार्पणम्।
सद्यः प्रतिसरं बद्ध्वा द्वितीयं स्नपनं चरेत्।।

एष एव विशेषः स्यात् अन्यत् सर्वं खिलोक्तवत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



## ८.१.४ स्नपनस्य कालविवेकः

**स.६४. ६, ७**

अयने चोत्तरे चैव शुभर्क्षे श्रवणादिके।।
शुभवारे तिथौ शुक्ले स्थिरराशौ समाचरेत्।

**अ.२५**

ग्रसमानावुभौ त्याज्यं त्याज्यं तस्मिन्निशाकरम्।।

एषु ध्यक्षगतेषु स्यात् नाधिक्योधिक्यवद्यथा(?)।
उषः प्रधानमिति वा केचिदाहुर्मनीषिणः।।

उत्सवस्नपनादीनि दिवाधिक्ये चरेत् सुधीः।

**य.३४. ५ - ७**

---------------- मध्याह्ने दिनद्वयगते सति।।

तयोरप्यधिकं श्रेष्ठं मासर्क्षे द्विगुणं यदि।
सम्भवेच्चेत् परं श्रेष्ठं स्नपने तु विशेषतः।।

पूर्वस्मिन् पूर्णयोगश्चेत् तस्मिन्नेवापरे (चरेत्) तथा।

## ८.१.५.० स्नपनत्रैविध्यम् नित्यादिभेदेन

**वि.६७.४१६**

स्नपनं च त्रिविधम् - नित्यं, नैमित्तिकं, काम्यं चेति।।

**प्र.२७.१९९ ; य.४६.२५, २६**

## ८.१.५.१ स्नपनं नित्यम्

**वि.६७.४१६**

अयनद्वये तथा विषुवे च स्नपनं यत् तन्नित्यम्।

**प्र.२७.२०० ; य.४६.२६**

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



**८.१.५.२ स्नपनं नैमित्तिकम्**

**प्र.२७. २००**

चन्द्रसूर्योपरागे यत् नैमित्तिकमिति स्मृतम्।।

**य.४६.२६ ; वि.६७.४१६**

**८.१.६ स्नपनं काम्यम्**

**वि.६७. ४१६**

[1]शेषेषु यत् स्नपनं तत् काम्यम्।

**प्र.२७. २०१ ; य.४६.२७**

**८.१.७ नित्यस्नपनस्य द्वैविध्यम्**

**वा.५**

नित्यं तद्द्विविधं प्रोक्तं स्नानं चाभ्युक्षणं तथा।

**८.१.८ द्विविधनित्यस्नपनस्य विषयविवेकः**

**वा.५**

अरूपे वर्णयुक्ते च अभ्युक्षणमथाचरेत्।।

सरूपे प्रतिमादीनां स्नानं चैवात्र कारयेत्।
स्नानं त्रिषवणं कुर्यात् वर्णहीने समाचरेत्।।

वर्णयुक्ते ध्रुवे कुर्यात् हविरन्तं च पूजयेत्।

---

1. नित्यनैमित्तिकस्नपनकालभिन्नेषु।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



८.१.९ **नित्यपूजानैमित्तिकस्नपनयोर्युगपत्प्राप्तौ कर्तव्यक्रमः**

**वि.६७. ४१६**

सन्ध्याकाले नैमित्तिके स्नपने प्राप्ते तन्नैमित्तिकं समाप्य, पश्चान्नित्यपूजां समाचरेत्।

**प्र.२७. २०७, २०८ ; य.४६. ३०, ३१**

८.१.१० **स्नपनस्य त्रैविध्यं श्रेष्ठादिभेदेन**

**अ.२५**

अत ऊर्ध्वं विधानेन देवेशस्नपनक्रमम्।
अष्टाधिकशतं श्रेष्ठं चत्वारिंशाष्टमध्यमम्।।
अधमं पञ्चविंशं च त्रिविधं स्नपनं भवेत्।

८.१.११ **स्नपनस्य नवविधत्वम्**

**ज्ञा.९०.१७१**

अथ स्नपनं नवविधम्।

**स.५२.१**

**वा.३६**

अतः परं नवविधं कलशैः स्नपनक्रमम्।
शताधिकसहस्रान्तम् उत्तमाधममध्यमम्।।
एकैकं त्रिविधं ज्ञेयं नवधामार्गमुच्यते।

८.१.१२.० **अधमाधमं स्नपनम्**

**वि.४८.३२७**

एकैकप्रधाना एकैकोपस्नानाश्चेति चतुर्विंशतिकलशैः स्नपनमधमाधमम्। एतद्द्वारिप्रचूर्णसहितमित्येके।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



**खि.२९. १८७**

पञ्चगव्यादिकलशैरेकोपस्नानसंयुतैः।
चतुर्विंशतिभिश्चैव कलशैःस्नापयेद्धरिम्।।

**ज्ञा.९०. १७२**

प्राग्द्रव्यैरनुद्रव्यैरपि विना द्वादशप्रधानैः द्वादशोपस्नानैः चतुर्विंशतिकलशैः स्नपनमधमाधमम्।

### ८.१.१२.१ अधममध्यमं स्नपनम्

**वि.४८. ३२७**

एकैकप्रधानास्त्रिस्त्रिरुपस्नानाश्चेत्यष्टचत्वारिंशत्कलशैः प्राक्करणैरनुकरणैश्च अधममध्यमम्।

**ज्ञा.९०.१७२**

प्राग्द्रव्यैश्च सहितमष्टचत्वारिंशत्कलशैः स्नपनमधममध्यमम्।

### ८.१.१२.२ अधमोत्तमं स्नपनम्

**ज्ञा.९०. १७२**

तीर्थोदकपूर्णाश्चत्वारः हरिद्राचूर्णार्थास्तदुपस्नानार्थाः अष्टौ कलशाः प्राग्द्रव्यैरनुद्रव्यैश्च सहितमेवं शताष्टकलशैः स्नपनमधमोत्तमम्।

**वि.४८. ३२७**

द्विद्विप्रधानाः सप्तसप्तोपस्नानाश्चेति प्राक्करणैरनुकरणैः सामान्यद्रव्यैः संयुक्तम् अष्टोत्तरशतकलशैः स्नपनमधमोत्तमम्। एकैकप्रधानाष्टोपस्नानाश्चेति केचित्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



**खि.२९. ६६, ६७**

इदानीं सम्प्रवक्ष्यामि स्नपनं त्वधमोत्तमम्।।

क्लृप्तमष्टोत्तरशतकलशैर्विस्तरेण वः।

### ८.१.१२.३ मध्यमाधमं स्नपनम्

**वि.४८. ३२७**

शताष्टकाद्द्विगुणं[1] मध्यमाधमम्।

**ज्ञा.९०. १७२**

**स.५२. ३० - ३२**

[2]पूर्वोक्तेन विधानेन प्राग्द्रव्यैश्च समायुतैः।

अनुद्रव्यैश्च संयुक्तैः(द्विगुणैः ?)शताष्टकलशैस्तथा।।

द्रव्यैर्मृदादिभिः सर्वैर्मन्त्रैरेव यथोदितैः।

स्नापयेद्देवदेवं तं श्रद्धाभक्तिसमन्वितः।।

तत्त्वेन स्नपनं त्वेतन्मध्यमाधममुच्यते।

### ८.१.१२.४ मध्यममध्यमं स्नपनम्

**वि.४८.३२७**

त्रिगुणं[3] मध्यममध्यमम्।

**ज्ञा.९०.१७२**

---

1. शतष्टद्विगुणकलशम्।
2. अधमोत्तमोक्तेन।
3. शताष्टत्रिगुणकलशम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



**स.५२. ३२ - ३४**

प्राग्द्रव्यैर्द्विगुणैः सर्वैरनुद्रव्यैस्तथैव च।।

शताष्टकाच्च (त्रिगुणैः?) कलशैश्च विधानतः।

यथा षोडशभिर्युक्तैर्द्विशतैः कलशैरपि।।

पूर्वोक्तेन विधानेन स्नापयेद्भक्तितो हरिम्।

मध्यमान्मध्यमं प्रोक्तं स्नपनं द्विजसत्तमाः।।

## ८.१.१२.५ मध्यमोत्तमं स्नपनम्

**स.५२. ३५ - ३७**

प्राग्द्रव्यैरनुद्रव्यैश्च [1]तथा चैव चतुर्गुणैः।

शताष्टभिर्विशेषेण कलशैश्च चतुर्गुणैः।।

द्वात्रिंशत्कलशैर्युक्तैश्चतुर्भिश्च शतैरपि।

पूर्वोक्तविधिना सर्वैः सम्पूर्णं स्नापयेद्विभुम्।।

एतत् तु स्नपनं प्रोक्तं मध्यमादुत्तमं बुधाः।

**वि.४८. ३२७**

चतुर्गुणं मध्यमोत्तमम्।

**ज्ञा.९०. १७२**

[2]पञ्चगुणं मध्यमोत्तमम्।

1. मध्यमोत्तमोक्तचुर्तुर्दशकलशैः

2.शताष्टकलशं पञ्चगुणम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



### ८.१.१२.६ उत्तमाधमं स्नपनम्

**स.५२.३७ - ३९**

तथैव [1]षड्गुणैर्युक्तैः प्राग्द्रव्यैश्च तथैव च।।

षड्गुणैरप्यनुद्रव्यैः कलशैरपि षड्गुणैः।
चत्वारिंशद्भिरष्टाभिः सहितैः षट्छतैरपि।।

पूर्वोक्तेन विधानेन स्नपनं चोत्तमाधमम्।

**ज्ञा.९०.१७२**

षड्गुणमुत्तमाधमम्।

**वि.४८.३२७**

[2]पञ्चगुणमुत्तमाधमम्।

### ८.१.१२.७ उत्तममध्यमं स्नपनम्

**स.५२.३९, ४०**

प्राग्द्रव्यैरनुद्रव्यैस्तु [3]तथैवाष्टगुणैरपि।

तथैवाष्टशतैस्तद्वच्चतुःषष्टिसमायुतैः।
कलशैः स्नपनं चैत्तदुत्तमान्मध्यमं स्मृतम्।।

**ज्ञा.९०.१७२**

अष्टगुणमुत्तममध्यमम्।

---

1. शताष्टषड्गुणैः।
2. शताष्टपञ्चगुणम्।
3. शताष्टाष्टगुणैः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



**वि.४८.३२७**

[1]षड्गुणमुत्तममध्यमम्।

### ८.१.१२.८ उत्तमोत्तमं स्नपनम्

**स.५२. ४१ - ४४**

शताष्टकैः दशगुणैः प्राग्द्रव्यैरपि सर्वशः।
दशगुणैरनुद्रव्यैः कलशैश्च तथैव च।।

दशगुणैः प्रधानैश्च सोपस्नानसमन्वितैः।
पूर्वोक्तेन विधानेन सर्वैर्दशगुणैरपि।।

अशीतिभिः सहस्रैस्तु कलशैश्च प्रयत्नतः।
स्नापयेद्देवदेवं तं भक्त्या च परया मुदा।।

उत्तमोत्तममेतत्तु स्नपनं परमं विदुः।

**ज्ञा.९०.१७२**

[2]दशगुणमुत्तमोत्तमम्। सहस्रकलशैः स्नपनमुत्तमोत्तममिति भृगुः।

**वि.४८.३२७**

[3]सप्तगुणमुत्तमोत्तमम्। चत्वारिंशद्द्वयाधिकसहस्रकलशैः स्नपनमुत्तमोत्तममित्येके।।

---

1. शताष्टषड्गुणम्।
2. शताष्टककलशात्।
3. शताष्टसप्तगुणकलशम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



## ८.१.१३ अशक्तानां स्नपनं नवविधम्

### वि.४८. ३२८

अथ विभवहीनाशक्तस्य स्नपनं नवधा भवति।

## ८.१.१४ अशक्तानाम् अधमाधमं स्नपनम्

### वि.४८. ३२८

प्रमुखे चतुरश्रामेव पङ्क्तिं कृत्वा ; मध्ये पञ्चगव्यम्, उत्तरे तस्योपस्नानं, दक्षिणे गन्धोदकं, पूर्वे तस्योपस्नानं, पश्चिमे हरिद्राचूर्णम् - एतैः पञ्चभिः कलशैः स्नपनमधमाधमम्।

## ८.१.१५ अशक्तानाम् अधममध्यमं स्नपनम्

### वि.४८. ३२८

मध्ये पञ्चगव्यं, दक्षिणे गन्धोदकम्, उत्तरे कुशोदकं, तत्तत्पूर्वे तत्तदुपस्नानं, पश्चिमे हरिद्राचूर्णम् - इत्येतैः सप्तभिः कलशैः स्नपनमधममध्यमम्।

## ८.१.१६ अशक्तानाम् अधमोत्तमं स्नपनम्

### वि.४९. ३२८

पूर्ववत्पञ्चगव्यगन्धोदककुशोदकान् तदुपस्नानांश्च विन्यस्य पश्चिमे अक्षतोदकं, वायव्ये तस्योपस्नानं, नैर्ऋते हरिद्राचूर्णम् एतैर्नवभिः कलशैः स्नपनमधमोत्तमम्।।

## ८.१.१७ अशक्तानां मध्यमाधमं स्नपनम्

### वि.४८. ३२८

[1]पूर्ववन्नवकलशान् विन्यस्य, पूर्वे जप्योदकं न्यसेत्। एतैर्दशकलशैर्मध्यमाधमम्।

---

1. अधमोत्तमवत्

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



## ८.१.१८ अशक्तानां मध्यममध्यमं स्नपनम्

### वि.४८. ३२९

पूर्ववन्नवकलशान् विन्यस्य ; पूर्वे मधु, तदुत्तरे तस्योपस्नानं , तद्दक्षिणे जप्योदकं एतैर्द्वादशभिः कलशैः स्नपनं मध्यममध्यमम्।

## ८.१.१९ अशक्तानां मध्यमोत्तमं स्नपनम्

### वि.४८. ३२९

प्रमुखे दक्षिणोत्तरं दण्डवत् पङ्क्तिं कृत्वा, दक्षिणाद्युत्तरान्तं पञ्चगव्यघृतमधु-दधिगन्धोदकाऽक्षतोदककुशोदकान् विन्यस्य, तत्पूर्वे तदुपस्नानं विन्यस्य, एतैश्चतुर्दशभिः कलशैः स्नपनं मध्यमोत्तमम्।

## ८.१.२० अशक्तानाम् उत्तमाधमं स्नपनम्

### वि.४८. ३२९

[1]एतैः सह क्षीरं तदुपस्नानं च विन्यस्य, एतैः षोडशभिः कलशैः स्नपनमुत्तमाधमम्।

## ८.१.२१ अशक्तानाम् उत्तममध्यमं स्नपनम्

### वि.४८.३२९

[2]एतैः सह दधि, तस्योपस्नानं च विन्यस्य, एतैरष्टादशभिः कलशैः स्नपनमुत्तममध्यमम्।

1. उत्तममध्यमोक्तैः षोडशकलशैः।

2. उत्तममध्यमोत्तमोक्त चतुर्दशकलशैः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



**८.१.२२ अशक्तानाम् उत्तमोत्तमं स्नपनम्**

**वि.४८.३२९**

[1]एतैः सह सर्वौषध्युदकं च, तदुपस्नानं च, विन्यस्य ; एतैः विंशतिकलशैः स्नपनमुत्तमोत्तममिति विज्ञायते।।

**८.१.२३ स्नपनस्य द्वैविध्यम् भद्रक्षुद्रभेदेन**

**वा.३६**

स्नपनं द्विविधं प्रोक्तं भद्रं क्षुद्रमिति द्वयम्।।

**८.१.२४ भद्रस्नपनम् उत्तमोत्तमादिभेदेन नवविधम्**

**वा.३६**

------------------ भद्रं चात्र शृणु द्विजाः।
शताधिकं यदि स्यात् तु यथावित्तानुसारतः।।

विस्तृतं दशहस्तं तु पङ्क्तिं कृत्वा प्रदक्षिणम्।
यथोक्तवच्चतुर्द्वारं कल्पयेद्देशिकोत्तमः।।

पञ्चावरणवत् स्थाप्य पूर्ववच्चेच्छतद्वयम्।
एवं सहस्रकलशैः स्थापयित्वाऽभिषेचयेत्।।

अथवा कल्पयेद्विद्वान् दशपङ्क्त्या प्रकल्पयेत्।
प्रतिपङ्क्त्यन्तरे तस्य मार्गान्तं ? तद्द्वितालकम्।।

सर्वं प्रधानद्रव्यं च स्थापयित्वा प्रति प्रति।
अष्टाधिकशतं स्थाप्य पृथक् चैवात्र कारयेत्।।

---

1. उत्तममध्यमोक्तैः अष्टादशभिः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



चतुर्विंशति संस्थाप्य अनुप्राग्द्रव्यमाचरेत्।
अधमाधममित्युक्तं ज्ञात्वा चैव विचक्षणः।।

अनुप्राग्द्रव्ययुक्तन्तु शतमष्टाधिकं चरेत्।
अधमं मध्यमं प्रोक्तमधमोत्तममुच्यते।।

कलशैश्शतद्वयं प्रोक्तमधमोत्तममुच्यते।
कलशैश्शतद्वयं प्रोक्तं सर्वद्रव्ययुतं पुनः।।
देवेशं चाभिषिच्यैव अधमोत्तममुच्यते।
शतद्वयं मध्यमं स्यादधमन्तु शताष्कम्।।

अथ वा चेद्विशेषेण सर्वद्रव्ययुतं क्रमात्।
अनुप्राग्द्रव्ययुक्तञ्च चत्वारिंशाष्टकैर्युतम्।।

अधमं मध्यमं ज्ञेयमुत्तमन्तु विशेषतः।
तत्क्रमं द्विगुणं कुर्यादुत्तमं तदुदाहृतम्।।

त्रयस्त्रयः प्रधानादि उपस्नानादि पञ्चकम्।
एवं चैवाभिषिच्यैव मध्यमं चेति कीर्त्यते।।

द्वौ द्वौ प्रधानमेवात्र उपस्नानं गुणद्वयम्।
एवं चैवाभिषिच्याथ अधमं तदुदाहृतम्।।

प्रधानञ्चैकमुद्दिष्टमुपस्नानन्तु सप्तकम्।
एवंक्रमेण संस्नाप्य केचिच्चैवोत्तमं भवेत्।।

अथ वा कारयेद्विद्वान्विशेषश्चात्र वक्ष्यते।
चतुस्तीर्थोदकैर्युक्तमुपस्नानाष्टकैर्युतम्।।

अनुप्राग्द्रव्ययुक्तन्तु अष्टोत्तरशतं क्रमात्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



अष्टोत्तरशतैः स्नाप्यमधमोत्तममुच्यते।।

शताष्टद्विगुणं स्नाप्यं मध्यमाधममीरितम्।
त्रिगुणं मध्यमं प्रोक्तं पञ्चभिर्गुणयेत्तथा।।

मध्यमोत्तममित्याहुष्षड्गणं चोत्तमं तथा।
अहिसङ्ख्याभिषिच्यैव उत्तमान्मध्यमं स्मृतम्।।
दशभिर्गुणयेस्नाप्यमुत्तमोत्तममीरितम्।

अथ केचिद्वदन्त्यस्मिन् स्नपनं चोत्तमं भवेत्।।

अशीत्युत्तरसाहस्रकलशैस्नापयेद्बुधः।

**८.१.२५ त्रिविधं क्षुद्रस्नपनमुत्तममध्यमाधमभेदेन**
**वा.३६**

क्षुद्रं चात्र प्रकुर्वीत देवस्य प्रमुखे कृते।
पूर्वान्तमुत्तरान्तं तु वेदाख्यं सूत्रमालिखेत्।।

एवं नवपदं कृत्वा मध्यमादीनि कारयेत्।
नन्दारव्यं कलशं ग्राह्य कारयेदुक्तवारिणा।।

निक्षिप्य कूर्चं प्रत्येकम् उपस्नानयुतं बुधः।
एवमष्टादशैः स्थाप्य मध्यमाद्यादिना कृतम्।।

सुवर्णं रत्नबीजं च कुशं पुष्पं तथैव च।
क्षीरगन्धाक्षतं तत्र मध्यमादीनि निक्षिपेत्।।

नववस्त्रेण सञ्छाद्य कलशान् प्रति चाचरेत्।
वैष्णवं विष्णुगायत्र्या आपोहिष्ठेति चोच्चरन्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



हिरण्यपवमानाभ्यां पुरुषसूक्तयुतं पुनः।
ऋतं सत्यं परमिति श्रीभूसूक्तद्वयं क्रमात्।।

यथाक्रमेण संस्थाप्य दीपान्तं तत्र चार्चयेत्।
अभिषेकं ततः कृत्वा तत्तन्मन्त्रेण कारयेत्।।

'नमो वरुणे'ति मन्त्रेण तदुपस्नानमाचरेत्।
कलशैश्चतुर्दशैः स्थाप्य प्रतिष्ठोक्तक्रमेण वै।।

देवेशं चाभिषिच्यैव पुरुषसूक्तं सवैष्णवम्।
कलशैः पञ्चविंशद्भिः स्थापयित्वा विचक्षणः।।

प्रधानमेकं तत्रैवमुपस्नानैकमुच्यते।
पदमेकं द्वयं स्थाप्य एकं हारिद्रचूर्णकम्।।

एवमेव क्रमेणैव कलशैः पञ्चविंशतिः।
अर्चयित्वाभिषिच्यैव मध्यमोत्तममाधमम्।।

एवं तु त्रिविधं क्षुद्रम् ------------------।

## ८.१.२६ प्रतिष्ठाङ्गं सप्तकलशस्नपनम्

### क्रि.७. ५३. ५६ - ५८

क्षीराज्यमधुसिद्धार्थाक्षतोदकुशचन्दनैः।
पूरितांश्च सकूर्चांश्च सोपस्नानान्यथाक्रमम्।।

--------------------------------------

अथर्वसामऋग्वेदाः आदित्यः काश्यपस्तथा।।

ऋतवो मुनयश्चैव सप्त द्रव्याधिदेवताः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



अश्विनौ वत्सरा वायुः अप्सरा मरुतस्तथा।।

तक्षको वायवश्चैव सप्तोपस्नानदेवताः।

**स.३२. १ - ६**

धान्यैस्तु प्रमुखे पङ्क्तिं दक्षिणाद्युत्तरान्तकाम्।
कल्पयित्वा तु कलशानुत्तरादि च सन्यसेत्।।

क्षीरेणैकं घृतेनैकं मधुनैकं प्रपूर्य च।
सिद्धार्थकोदकेनैकमक्षतोदेन च क्रमात्।।

गन्धोदेन कुशोदेन कलशौ संप्रपूर्य च।
अष्टाढकादहीनानि सिद्धार्थादीनि निक्षिपेत्।।

प्रधानान् सप्त विन्यस्य शुद्धौदैः सप्त पूरितान्।
उपस्नानाश्च कलशान् तत्तत्पार्श्वे सुसंन्यसेत्।

अथर्वं सामवेदं च यजुर्वेदमनन्तरम्।
आदित्यं काश्यपं चैव मुनिं चैव ऋतून् पुनः।।

अयनान् वत्सरांश्चैव वायुमप्सरसस्तथा।
मरुतस्तक्षकं चैव बृहस्पतिमिति क्रमात्।।

## ८.१.२७ शुद्धस्नपननिमित्तानि

**वि.४७. ३१८**

नित्यार्चनायां स्नपने चोत्सवे अन्यर्क्षेषु पुण्यर्क्षेषु च शुद्धस्नपनं समाचरेत्।

## ८.१.२८ नित्यार्चनाङ्गं शुद्धस्नपनम्

**वा.२५**

सहस्रधारामादायापरभागे च सुस्थितः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



मूर्धोपरि च हस्ताभ्यां धृत्वा देवमनुस्मरन्।।

शङ्खं पद्मं चूळिकां च गृहीत्वोभयपार्श्वयोः।
एलालवङ्गोशीरादि गन्धयुक्तं सुशीतलम्।।

चषकस्थं घटस्थं वा तोयमादाय चात्वरः।
जलं शुद्धं च संगृह्य पुरुषसूक्तमनुस्मरन्।।

अभिषेकं शनैःकृत्वा पश्चादाचमनं ददेत्।

## ८.१.२९ उत्सवपूर्वाङ्गस्नपनम्

### वि.५२. ३४६

ततो देवालयं प्रविश्य, देवं प्रणम्य, उत्सवबिम्बं देव्यौ च तदलाभे स्नापनं तदलाभे कौतुकं वा आहृत्य मध्याह्नार्चनान्ते स्नपनोक्तविधानेन यथाशक्तिकलशैः स्नापयित्वा, अथवा शुद्धोदकैरभिषिच्य, हविर्निवेदयेत्।

## ८.१.३० उत्सवाङ्गमवभृथस्नपनम्

### प्र.२५. २३८ - २५५

देवखातं यदि भवेत्तीर्थं तत्र प्रशस्यते।
नद्यादितीरे संस्थाप्य देवीभ्यां सह वा विना।।

चक्रादीन् पूर्ववत् स्थाप्य प्रमुखे स्थण्डिलं चरेत्।
द्रव्येणापूर्य कलशान् गायत्रीमन्त्रमुच्चरन्।।

मध्ये सिद्धार्थकं न्यस्य प्राच्यां स्यादक्षतोदकम्।
दक्षिणे गन्धतोयं स्यात्पश्चिमे तु कुशोदकम्।।

जप्योदकं चोत्तरे स्याद्विदिशासु च मध्यतः।
उपस्नानानि विन्यस्य क्रमात्तदधिपान् गुरुः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



आदित्यानप्सरसश्च काश्यपं च गुरुं तथा।
ऋतूंश्च मरुतश्चैव मुनींस्तक्षकमेव च।।

मन्त्रान्विद्याधरांश्चैव क्रमेणावाह्य चार्चयेत्।
'पूतस्तस्येति' मन्त्रेण 'इमा ओषधय' इत्यपि।।

'अभित्वा शूर' 'चत्वारि पूतस्तस्ये'ति च क्रमात्।
कलशैः पञ्चभिःस्नाप्य तत्तद्द्रव्यान्तरे क्रमात्।।

'वारीश्चतस्र' इत्युक्त्वा चोपस्नानं समाचरेत्।
शिष्टाभिः कलशाद्भिश्च चक्रादीनभिषिच्य च।।

प्रविश्य तु जलं तत्र वरुणं चार्चयेत्क्रमात्।
हस्ताभ्यां चक्रमादाय देवं भक्तैस्समन्वितः।।

आचार्यः प्रथमं तीर्थे चक्रं स्पृष्ट्वाऽवगाहयेत्।
नाभिदघ्नजले तत्र जलमध्ये तु सुस्थितः।।

चक्रं देवं हृदि स्थाप्य हस्ताभ्यां धारयन् दृढम्।
'ये ते शतं' समुच्चार्य प्राङ्मुखो वाऽप्युदङ्मुखः।।

निमज्जयेत्तदा चक्रं सर्ववाद्ययुतं गुरुः।
जनास्सर्वे च तत्तीर्थे स्नात्वा विगतकल्मषाः।।

भवेयुरश्वमेधस्य फलं च समवाप्नुयुः।
ततस्तीरे प्रतिष्ठाप्य विष्टरे चक्रमुत्तमे।।

कुर्यादवभृथस्नानं शुद्धस्नानोक्तमार्गतः।
ततो विसृज्य वस्त्रादीन् देवं चान्यैर्विभूष्य च।।

तत्रैव स्नानसम्भारान् संभृत्य विधिना गुरुः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



देवीभ्यां सहदेवेशं स्नापयेत्पूर्ववत्प्रभुम्।।

अलंकृत्य विशेषेण कुर्यादर्घ्यान्तपूजनम्।
पश्चाद्देवं समादाय सर्वालङ्कारसंयुतम्।।

शाकुनं सूक्तमुच्चार्य नीत्वा ग्रामं प्रदक्षिणम्।
देवालयं प्रविश्याथ स्थाप्य चास्थानमण्डपे।।

पाद्यादिभ्स्समभ्यर्च्य वेदानध्यापयेत्क्रमात्।
मुहुः पुष्पाजलिं दत्वा जीवस्थाने निवेशयेत्।।

**८.१.३१ पञ्चामृतस्नपननिमित्तानि**

**क्रि.३३. १ - ३**

अथ पञ्चामृतस्नानं देवदेवस्य तु प्रियम्।
विष्णुपञ्चदिनेष्वेवम् अयने विषुवद्वये।।

चन्द्रसूर्योपरागे च व्यतीपाते विशेषतः।
प्रतिष्ठान्ते चोत्सवान्ते सर्वशान्त्यर्थमेव च।।

पञ्चामृताभिषेकस्तु देवदेवप्रियंकरः।

***

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

## २. स्नपनालयादिकल्पनम्

### ८.२.१ स्नपने स्नपनालयादिकल्पनम्

**वि.४८.३२६, ३२७**

अथ देवालयाभिमुखे पश्चिमे चोत्तरे च ऐशान्यां वा, यथोक्तं स्नपनागारं मण्टपं, कूटं वा, प्रपां वा, कृत्वा, सर्वत्र वितानध्वजदर्भमालातरङ्गवेष्टनाद्यैः ; द्वारेषु तोरणपूर्णकुम्भाद्यैरलङ्कृत्य, परितः प्रावरणं कृत्वा, अभ्यन्तरं गोमयेनोपलिप्य, पिष्टतोययुतेन सूत्रेण पञ्चविंशतिभागं कृत्वा, तन्मध्ये चैकपदे स्नानवेदिं लोहोपलेष्टकादारुमृत्तिकानामन्यतमेन तद्वेरपीठाद् बहिः प्रतिदिग्भागमष्टाङ्गुलं, तालं वा, यथोचितायामविस्तारां, समचतुरश्रां, द्विमेखलां, लोहजां षडङ्गुलोत्सेधां, लोहजाद्द्विगुणां शिलां, शिलाद्विगुणामैष्टकां, ऐष्टिकाद्द्विगुणां दारवीं, दारवीद्विगुणां मृण्मयीं, लोहजोत्सेधां, पादुकादिकरणैर्युक्तां, वियुक्तां, गोमुखे रसाङ्गुलायत-वारिमार्गयुतां मध्ये गोलकाऽवगाढयुतां, तद्द्विगुणविस्तारां च कारयति।

तां वेदिं वस्त्रेणाच्छाद्य ; कदल्यादिपत्रैराच्छाद्य, परितः कुशकूर्चान् विन्यस्य ; तां परितोऽष्टौ पदान् शय्यादेशं हित्वा ; तद्बहिः षोडशभागेषु प्रागादिचतुर्दिक्षु चत्वारि पदानि द्वारार्थं त्यजेत्। शेषेषु द्वादशभागेषु द्वादशप्रधानद्रव्यन्यासार्थं व्रीहिभिस्तण्डुलैर्वा गोलकोन्नतां यथालाभोन्नतां वा वेदिं कृत्वा, बहिरिन्द्रादिदेवानां तत्तत्स्थाने द्वादशाङ्गुलविस्तृतानि पीठानि कृत्वा, पश्चिमद्वारवामे पङ्क्तीशस्य, उत्तरद्वारदक्षिणे विष्वक्सेनस्य च, पीठं कृत्वा, वेद्योपरिष्टादीशानान्तं जयादीनर्चयेत्।

धान्यवेदिं गायत्र्या प्रोक्ष्य, 'सुमित्रा न' (तै० आ० ४) इति पङ्क्तिस्थलमुल्लिख्य,

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



'हिरण्यपाणि'मिति प्रागग्रानुत्तराग्रान्वा दर्भानास्तीर्य, कलशानाहृत्य, त्रिगुणेनैकेन वा सूत्रेण यवान्तरमङ्गुल्यन्तरं वा, परिवेष्ट्य, अद्भिः प्रक्षाल्य, 'धारास्वि' त्युदकं गृहीत्वा, 'इदमापः शिवा' इत्युत्पवनं कुर्यात् रात्रौ चेदग्निसन्निधौ जलं गृह्णीयात्।

**खि.२९. ६७ - ७५ ; ७९ - ८४**

आलयात्प्राच्युत्तरे वा ऐशान्यां वा यथाविधि।।

मण्डपं वाथ कूटं वा प्रपां वापि विधानवित्।
स्नपनार्थं यथाशक्ति कारयेन्निलये हरेः।।

मानं चतुर्विंशतिभिः किष्कुभिस्स्याच्चतुर्दिशम्।
तथा षोडशभिर्द्वाभ्यां दशभिर्वाथ किष्कुभिः।।

षोडशस्तम्भसंयुक्तं द्वादशस्तम्भमण्डितम्।
सर्वालङ्कारसंयुक्तं वितानादिविभूषितम्।।

पूर्णकुम्भाङ्कुरोपेतं चतुर्द्वारसमायुतम्।
दर्भमालाविलसितं द्वारतोरणसंयुतम्।।

एवं निर्माय तन्मध्ये शिलयेष्टकयापि वा।
मृदा वा कल्पयेच्छ्वभ्रं जलनिर्गमसंयुतम्।।

औपासनानलाकारं स्नानश्वभ्रमुदाहृतम्।
बिम्बपीठप्रमाणात्तु प्रतिदिक्चतुरङ्गुलम्।।

विशालं वेदियुगलयुतं श्वभ्रं प्रकल्पयेत्।
कुल्यां ततः प्रकुर्वीत ततो गच्छेज्जलादिकम्।।

श्वभ्रोत्तरादधः कुल्यां कारयेत्तु विचक्षणः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



अश्वत्थफलकां श्वभ्रे बैल्वीं वा निक्षिपेच्छुभाम्।।

-------------------------------------

व्रीहिभिस्तण्डुलैश्चैव चतुः प्रस्थप्रमाणकैः।
श्वभ्राद्बहिः समन्ताच्च कलशस्थापनाय वै।।

नवकिष्कुप्रमाणेन पङ्क्तिं कुर्यात्प्रयत्नतः।
द्वितालमात्नविस्तीर्णां यथायोगसमुच्छ्रिताम्।।

पङ्क्तिस्स्यात् द्वारमाना वै चतुर्दिक्षु द्वितालका।
शुद्धैस्तु कदलीपत्रैः पद्मपत्रैरथापि वा।।

हारिद्रैर्वाथ पत्रैर्वा पत्रैर्वा कुमुदस्य च ।
श्वभ्रमाच्छाद्य तत्रैव कूर्चांश्चोपरि विन्यसेत्।।

सावित्रीमन्त्रमुच्चार्य पूर्वादिषु यथाक्रमम्।
ऐन्द्रादीशानपर्यन्तमूर्ध्ववेद्यां यथाक्रमम्।।

जयां च विजयां विन्दां पुष्टिकां नन्दकामपि।
कुमुद्वतीमुत्पलकां विशोकां च प्रपूजयेत्।।

**स.४९. ३२ - ५८**

आलयाभिमुखे तस्मादैशान्ये चोत्तरेऽथवा।
यथोक्तेन विधानेन कारयेत् स्नपनालयम्।।

मण्टपं वाथ कूटं वा प्रपां वा शुभदर्शनाम्।
कारयित्वैव तन्मध्ये चौपासनविधानतः।।

शिलयाऽथेष्टकाभिर्वा सुधयाऽथ मृदैव वा।
उत्तरे जलमार्गेण युक्तं श्वभ्रं च कारयेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



अधिके बेरपीठे तु परितस्तु चतुर्दिशम्।
चतुरङ्गुलमुत्सृज्य श्वभ्रवेदिं तथाऽऽचरेत्।।

श्वभ्रं तत् कदलीपत्रैः पद्मस्याथोत्पलस्य च।
कुमुदस्य हरिद्रस्य पत्रैर्वाऽच्छादयेत् ततः।।

ऊर्ध्वे वितानेनाच्छाद्य स्थूणानां वेष्टनं चरेत्।
ध्वजैः पताकैर्दीपैश्च धूपैस्तद्दर्भमालया।।

मुक्तादामाङ्कुरैश्चान्यैरलङ्कुर्युर्यथोचितम्।
परितः श्वभ्रवेद्यास्तु चर्यादेशं व्यपोह्य च।।

श्वभ्रस्य परितश्चैव व्रीहिभिस्तण्डुलैरपि।
पङ्क्तिं द्वितालविस्तारां चतुरङ्गुलकोच्छ्र्याम्।।

अथवा त्र्यङ्गुलोत्सेधां व्द्यङ्गुलोच्छ्र्यसंयुताम्।
कृत्वा तत्र चतुर्दिक्षु प्रागादिषु यथाक्रमम्।।

द्वितालविस्तृतद्वारं निर्गमाय च कल्पयेत्।
कलशेऽधिके तथा कुर्युः पङ्क्ती द्वे तिस्र एव वा।।

यावन्तः कलशाः सन्ति तेषां न्यासार्हमेव च।
तावद्विस्तारसंयुक्तामेकां वा पङ्क्तिमाचरेत्।।

नीलवारुणमध्ये तु पङ्क्तौ पङ्क्तीशपीठिकाम्।
व्रीहिभिस्तण्डुलैर्वाऽथ तालविस्तारसंयुताम्।।

षडङ्गुलोन्नतां कृत्वा कुबेरेशानयोर्बुधः।
मध्ये तु विष्वक्सेनस्य पीठं कुर्याच्च पूर्ववत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



तत्पङ्क्तौ तु मृदादीनि सर्वद्रव्याणि विन्यसेत्।
तथा पङ्क्तिबहुत्वेऽपि कलशेषु बहुष्वपि।।

तत्तत्स्थाने यथोक्ते वा तत्तद्द्रव्याणि विन्यसेत्।
प्रधाने पञ्चगव्याद्यैर्द्रव्यैर्द्वादशभिः क्रमात्।।

सम्पूर्णाः कलशास्सर्वे प्रधानकलशाः स्मृताः।
शुद्धोदकैः सुगन्धैश्च सम्पूर्णाः कलशाश्च ये।।

ते तु प्रधानोपस्नानादुपस्नाना इतीरिताः।
पञ्चगव्यादिभिर्द्रव्यैः पूरयित्वा पृथक् पृथक्।।

चतुरश्चतुरश्चैव प्रधानान् कलशान् क्रमात्।
द्वौ द्वौ वाऽप्यथवैकैकमाहरेत स्वशक्तितः।।

उत्तमं मध्यमं चेति कनिष्ठं त्रिविधं स्मृतम्।
उपस्नानांश्च कलशांश्चतुरश्चतुरोऽथवा।।

षट् षट् सप्त सप्ताथ कलशान् वाहरेत्तथा।
तन्तुना कलशान् सर्वान् वेष्टयेच्च यवान्तरम्।।

अथाङ्गुल्यन्तरं वापि कलशान् परिवेष्टयेत्।
प्रधानद्रव्यसम्पूर्णाः प्रधानकलशास्तु ते।।

पञ्चगव्यादिकलशा उपस्नानसमन्विताः।
अष्टावष्टाविति प्रोक्ताः सर्वे चापि पृथक् पृथक्।।

हरिद्राचूर्णसम्पूर्णाः कलशाश्च तथैव च।
उपस्नानयुतास्सम्यगष्टौ तु कलशाः स्मृताः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



नद्यादिजलसम्पूर्णाश्चत्वारः कलशास्तथा।
अष्टोत्तरशतं प्रोक्तं कलशानां तु संख्यया।।

दिवैव शुद्धपात्रे च गृह्णीयादुदकं शुभम्।
'धारास्वि'ति च संगृह्य वस्त्रोणोत्पवनं चरेत्।।

'इदमापश्शिवे'त्युक्त्वा जलं तदभिमन्त्रयेत्।
रात्रौ जलं न गृह्णीयाद्गृह्णीयादग्निसन्निधौ।।

मधु क्षीरं घृतं सम्यगुत्पूयैव समाहरेत्।

**अ.२५**

आलयाभिमुखे कुर्यात् सौम्ये चैशान्य एव वा।।

अष्टहस्तं तु विस्तीर्णं चतुरश्रं समन्ततः।
पादान्तरं त्रिहस्तं च मध्ये पादविवर्जितम्।।

चतुर्द्वारसमायुक्तं चतुस्तोरणभूषितम्।
एकहस्तं तलोत्सेधम् एवं कृत्वा तु सुन्दरम्।।

पदमेकोनपञ्चाशत् कल्पयित्वा विधानतः।
नाभिमध्ये तु गर्तं स्यात् नाभ्यन्तं चतुरश्रकम्।।

फलका बैल्वमेवोक्तम् ऊर्ध्ववेदिद्वयं भवेत्।
गोमयेनोपलिप्यैव प्रोक्षयेत् पञ्चगव्यकैः।।

वितानस्तम्भवेष्टैश्च ध्वजैश्च परिशोभितम्।
द्वारतोरणसंयुक्तं पूर्णकुम्भसमायुतम्।।

कदलीक्रमुकसंयुक्तं मुक्तादामाद्यलङ्कृतम्।
क्रमुकैर्नारिकेलैश्च फलपुष्पैः प्रलम्बितम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



धूपदीपसमायुक्तं दर्भमालाभिरावृतम्।
द्रव्यन्यासं च कृत्वा तु चतुर्दिशं पङ्क्तिमाचरेत्।।

पङ्क्तीशं पश्चिमेऽभ्यर्च्य विष्वक्सेनं तथोत्तरे।
धान्यवेदिं च कृत्वा तु कलशानां पृथक् पृथक्।।

आढकं चोत्तमं शाली मध्यमं च तदर्धकम्।
अधमं प्रस्थमेकं तु त्रिविधं च समाचरेत्।।

शाल्यर्धं तण्डुलं कुर्यात् तण्डुलार्धं तिलं भवेत्।
दर्भैरुपरि विन्यस्य पुष्पैरुपरि विन्यसेत्।।

कदली पद्मपत्रं वा श्वभ्रस्याच्छादनं भवेत्।
कूर्चैरुपरि विन्यस्य इन्द्रादीनि नयेत् क्रमात्।।

जयादीनर्चयित्वा तु वेद्योपरि दिशासु च।
स्नानार्थं जलं सङ्ग्राह्य पङ्क्तेरुत्तरतो न्यसेत्।।

पाश्वके घटमेकं तु जलपूर्णं नयेत् क्रमात्।
क्षीरं मधु घृतं चैव गोमूत्रं चैव शोधयेत्।।

प्रत्येकं वस्त्रमेवोक्तम् एकवस्त्रं न चाचरेत्।
यदि चेदेकवस्त्रेण आभिचारं तु तद्ध्रुवम्।।

कलशं पूरितं द्रव्यैः प्रदक्षिणमथाचरेत्।

**ज्ञा.८७. १६६, १६७**

अथ देवालयस्याभिमुखे शयनमण्डपमुत्तरस्यामैशान्यां वा सप्तभिः द्वादशभिः षोडशभिः चतुर्विंशतिभिर्वा हस्तैः विस्तृतायतं चतुर्भिः द्वादशाभिः षोड भिर्वा स्तम्भैश्च सहितमशक्तः, शक्तश्चेदधिकैर्वा मण्डपं प्रपां वा कुर्यात्। तत्र चतुर्द्वारेषु

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



तोरणपूर्णकुम्भपताकाभिरन्तरे वितानध्वजदर्भमालावेष्टनाद्यैः यथाशक्त्यलङ्कृत्य तन्मध्ये श्वभ्रं चतुरश्रं परितश्चौपासनवत् द्विवेदिसहितं कृत्वा मध्ये तालमात्रनिम्नयुतम् उत्तरतो जलनिर्याणमार्गयुतं श्वभ्रं कुर्यात्। तत्प्रमाणाधिकं बेरपीठे तत्परितश्चतुरङ्गुलायतविस्तारयुतं श्वभ्रं कर्तव्यम्। तन्मध्ये बैल्वफलकां न्यसेत्। वेदिं कदलीपद्मकुमुदोत्पलादिपत्रैराच्छाद्य परिस्तरणकूर्चान् न्यसेत्।

तच्छ्वभ्रस्य परितः तण्डुलैः व्रीहिभिर्वा द्वितालविस्तारादहीनां भागोन्नतां कोलकोन्नतां वा चतुर्दिशं द्वितालविस्तारद्वारयुतां पङ्क्तिं कृत्वा तत्र इन्द्रादिदिग्देवानां तत्तत्स्थाने, पङ्क्तीशस्य नैरृतवारुणयोर्मध्ये, विष्वक्सेनस्य सोमेशानयोर्मध्ये, द्वादशाङ्गुलविस्तृतानि षडङ्गुलोन्नतानि पीठानि कुर्यात्। तत्पङ्क्तिं गायत्र्या प्रोक्ष्य 'सुमित्रा न' इति स्थलमुल्लिख्य 'हिरण्यपाणि'मिति दर्भानास्तरेत्। 'धारा स्वि'त्युदकं गृहीत्वा वस्त्रेणोत्पवनं कुर्यात्। रात्रौ चेदग्निसन्निधावेवोदकं ग्राह्यम्। कलशानाहृत्य यवान्तरमङ्गुल्यन्तरं वा तन्तुना परिवेष्ट्य अद्भिः प्रक्षाल्य यथोक्तैः पञ्चगव्यादिद्रव्यैः कलशान् सम्पूर्य तान् पिधानाद्यैरपिदधाति। तत्पङ्क्त्यां यथोक्ते स्थाने मृदादिद्रव्याणि सन्यसेत्।

**क्रि.१३. ३२ - ३८**

आलयाभिमुखे कुर्यात् उत्तरैशान्ययोस्तथा।।

मण्डपं वा प्रपां वाथ कूटं वा स्नपनालयम्।
षोडशस्तम्भसंयुक्तं चतुर्द्वारसमन्वितम्।।

श्रीवत्सं पद्मकं वापि स्वस्तिकं वा यथाविधि।
तण्डुलैर्व्रीहिभिर्वाऽथ पङ्क्तिं कुर्यात् तदन्तरे।।

द्वितालाहीनविस्तारं युगाग्र्यक्ष्यङ्गुलोच्छ्रयम्।
चतुर्दिक्षु तथा हस्तविस्तारं द्वारसंयुतम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



लिखेत् पत्रलताकारं 'सुमित्रा न' इति स्थलम्।
इन्द्रादीनां दिगीशानां पङ्क्तीशस्यामितस्य च।।

तत्तत्स्थानेषु पीठानि पङ्क्तावेव प्रकल्पयेत्।
पङ्क्तिबाह्योत्तरे वापि कुर्याच्चेदाभिचारिकम्।।

तन्मध्ये स्नपनश्वभ्रमौपासनविधानतः।
कल्पयित्वा परिस्तीर्य जयादीनपि पूजयेत्।।

प्र.२२. १ - १९ ; २२ - २५

अथातः स्नपनागारं प्रमुखे चोत्तरे तथा।
ऐशान्यां वा विशेषेण प्रपां वा मण्डपं तु वा।।

वितानोपरि संवीतं लम्बमानं परिष्कृतम्।
स्तम्भान् संवेष्ट्य वस्त्रैश्च दुकूलैस्तान्तवैरपि।।

मुक्तादामसमायुक्तं पूर्णकुम्भसमन्वितम्।
सत्त्वं रजस्तमश्चैव ऐश्वर्यं चाधिदैवतम्।।

चतुर्वेदादिकैर्मन्त्रैः तोरणान् स्थापयेत् क्रमात्।
उभयोः पार्श्वयोश्चैव कदलीक्रमुकान्वितम्।।

पूर्वान्तमुत्तरान्तं च षट्सूत्रं सम्प्रसार्य च।
कल्पयेदायतसमं पदानां पञ्चविंशतिम्।।

मध्ये ब्राह्मं पदं हित्वा चर्यार्थं परितोऽष्ट च।
पूर्वादिचत्वारि पदं द्वारार्थं परिकल्पयेत्।।

शिष्टांश्च द्वादशपदान् द्रव्यन्यासार्थमाहरेत्।
मध्ये श्वभ्रं तु कर्तव्यम् औपासनविधानतः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



मध्ये निम्नं च कृत्वा तु तालमात्रप्रमाणतः।
श्वभ्रस्य मध्यमे चैव बिल्वजं फलकं न्यसेत्।।

तत्प्रमाणाधिकं पीठं परितश्चतुरङ्गुलम्।
मध्ये हित्वा प्रतिष्ठाप्य द्विवेदिसहितं क्रमात्।।

ततः पावनमार्गेण जलं गच्छेदुदङ्मुखम्।
मण्डपात्तु बहिःस्थाने जलस्थानं तु खानयेत्।।

आच्छाद्य कदलीपत्रैः पद्मपत्रैरथापि वा।
हारिद्रैश्चाथ पत्रैर्वा पत्रैः क्रमुकजैस्तु वा।।

'अतो देवादि'मन्त्रेण कुशदर्भांस्तु शोधयेत्।
यावच्छ्वभ्रप्रमाणं तु तावत् कृत्वा समाहरेत्।।

हस्तमात्रं तथाऽऽयामं प्रोक्षणार्थं तु कूर्चकम्।
मार्जनार्थं तु कुर्चं च षडङ्गुलमिति स्मृतम्।।

पञ्चभिर्वा त्रिभिर्वाऽथ द्वादशाङ्गुलमायतम्।
कलशार्थं तु कुर्वीत यथाकलशसंख्यया।।

तण्डुलैर्व्रीहिभिश्चैव सतिलैश्च त्रिवेदिकम्।
व्रीह्यर्धं तण्डुलं प्रोक्तं तदर्धं च तिलानपि।।

उत्तमं द्रोणमित्युक्तं मध्यमं तु तदर्धकम्।
अधमं चाऽढकं चैव पङ्क्तिं कुर्याद्विचक्षणः।।

सम्यक् दग्ध्वा तु कलशानभिन्नांत्संप्रगृह्य च।
शरावाणां प्रमाणं तु कुडुबं समुदाहृतम्।।

षट्प्रस्थमात्रं करकं कुम्भं तु द्रोणमेव च।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



'देवस्य त्वे'ति कलशान् कुम्भादींत्संप्रगृह्य च।।

यवान्तरं तु तन्तूनां संवेष्ट्य कलशानपि।
पूर्वरात्रौ विशेषण देवेशं संप्रणम्य च।।

---

नृत्तैर्गेयैश्च वाद्यैश्च रात्रिशेषं नयेत् क्रमात्।
ततः प्रभाते धर्मात्मा यजमानयुतो गुरुः।।

श्वभ्रमध्ये प्रतिष्ठाप्य कूर्चांत्सम्यङ्न्यसेत् क्रमात्।
जयादीरपि तत्रैव चैन्द्राद्यैशान्तमर्चयेत्।।

पङ्क्तीशमर्चयेत्पूर्वं नीलवारुणमध्यमे।
विष्वक्सेनं समभ्यर्च्य सोमेशानान्तरेपि च।।

लोकपालांत्समभ्यर्चेद्विग्रहैर्दशभिस्त्रिभिः।
नदीतीरे मृदं गृह्य सस्यक्षेत्रे तटाकके।।

**य.३४. ५० - ५६**

अथातः स्नपनागारं प्रमुखे चोत्तरे तथा।।

ऐशान्यां वा विशेषेण प्रपां वा मण्डपं तु वा।
कारयेत् तां निरुक्तोक्तं भूषयेत् स्नपनोक्तवत्।।

मध्यमे ब्रह्मपङ्क्तौ तु श्वभ्रं कृत्वा सलक्षणम्।
तस्यैव परितः पङ्क्तिं चतुर्द्वारसमायुताम्।।

व्रीहिभिः कारयेद्धीमान् पङ्क्तीशामितयोस्तथा।
दिक्पालानां च पीठानि कुर्याद् भूम्यां तु वार्चयेत्।।

पङ्क्तिं गायत्रिया प्रोक्ष्य 'सुमित्रा ने'ति मन्त्रतः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



समुल्लिख्य 'हिरण्ये'ति दर्भानत्र समास्तरेत्।।

'धारास्वि'ति च मन्त्रेण गृहीत्वैवोदकं तथा।
वस्त्रेणोत्पवनं कृत्वा रात्रौ चेदग्निसन्निधौ।।

संगृह्य कलशान् पश्चात् तन्तुनाऽऽवेष्ट्य मंगलम्।
अद्भिः प्रक्षाल्य पूर्वोक्तद्रव्यैरपि सुपूरयेत्।।

**वा.३५**

अथ वक्ष्ये विशेषेण स्नपनस्यालयक्रमम्।।

प्रमुखे चोत्तरे चैव ऐशान्यां वा प्रकल्पयेत्।
द्वादशैष्षोडशैः स्तम्भैः चतुर्विंशतिरेव वा।।

द्वात्रिंशत्स्तम्भसंयुक्तां शतान्तं वाऽथ कारयेत्।
मण्डपं तत्र कुर्वीत कूटं वाथ प्रपामपि।।
सूत्रस्यारोपणोक्तेन वितानाद्यैरलङ्कृतम्।।

चतुर्द्वारसमायुक्तं मध्ये श्वभ्रं समाचरेत्।
द्विवेदिसहितं श्वभ्रम् उन्नतं तु युगद्वयम्।।

अङ्गुलैश्च चतुस्त्रिंशद्विस्तारमिति संज्ञितम्।
विस्तारादि्द्वगुणं दीर्घम् उत्तरे जलमार्गकम्।।

वेद्योर्भागं तु विस्तारम् एकैकं भारमुन्नतम्।
मृदा वा सिकताभिर्वा श्वभ्रं कुर्याद्विचक्षणः।।

अथवा कारयेच्चैव शिलया चेष्टकाथवा।
सुधया परिसंलेप्यमिति शास्त्रस्य निश्चयः।।

परिस्तरणकूर्चं तु मध्यवेद्युपरि न्यसेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



पश्चाद्बैल्वफलकादि मध्ये क्षिप्त्वा विचक्षणः।।

पद्मस्य कुमुदस्यैव मोचपत्रं प्रगृह्य च।
तद्वेद्युपरि चास्तीर्य स्वासस्थं चेति चोच्चरन्।।

तच्छ्वभ्रस्यैव परितः ऐशान्यादिप्रदक्षिणम्।
द्वितालविस्तारयुतं भागोन्नतयुतं क्रमात्।।

तण्डुलैर्व्रीहिभिर्वाथ पङ्क्तिं कृत्वा यथाक्रमम्।
द्वारार्थं तु चतुर्दिक्षु द्वितालं तद्व्यपोह्य च।।

एतैस्तु पङ्क्तिं कृत्वाऽथ गोलकं तत्र चोन्नतम्।
अथवाथ विशेषेण सूत्रस्य पदमाचरेत्।।

पूर्वान्तमुत्तरान्तं च षट्सूत्रं तु प्रसार्य च।
एवं तु पञ्चविंशद्भिः पदमत्र प्रकल्पयेत्।।

मध्ये श्वभ्रं च कर्तव्यं परितोऽत्र विशेषतः।
अष्टौ पदानि परितः लोपयेद्देशिकोत्तमः।।

पूर्वं तु दक्षिणं चैव पश्चिमं चोत्तरं क्रमात्।
चतुः परं (पदं) विलुप्येत द्वारमेतद्विचक्षणः।।

अन्यैर्द्वादशभिः कोष्ठैः द्वारमत्र प्रकल्पयेत्।
द्वितालविस्तृतं चैव उन्नतं तु षडङ्गुलम्।।

त्रिवेदिसहितं पीठं अहिसंरव्यं प्रकल्पयेत्।
पङ्क्तीशस्यार्धपीठं तु नीलवारुणमध्यके।।

ईशानसोमयोर्मध्ये शान्तपीठं प्रकल्पयेत्।
तद्बहिश्चैव सङ्कल्प्य जयादीनां प्रकल्पयेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



प्रागादीशानपर्यन्तं पृथक् पीठं प्रकल्पयेत्।

प्रोक्षयित्वा तु तत्पङ्क्तिं गायत्रीञ्च समुच्चरन्।
'सुमित्रा'इति मन्त्रेण स्थलं चोल्लेखयेद्बुधः।।

दर्भानास्तीर्य मन्त्रज्ञो हिरण्यपाणिमुच्चरन्।
उक्तोदकञ्च संगृह्य 'धारस्वि'ति समुच्चरन्।।

वस्त्रेणोत्पवनं कृत्वा प्रणवं मन्त्रमुच्चरन्।
तन्तुना परिवेष्ट्यैव प्रादक्षिण्यक्रमेण वै।
यवान्तरन्तु संवेष्ट्य चांगुळ्यंतरमेव वा।।

द्रव्यैः यथोक्तैस्संपूर्य कलशं प्रतिकारयेत्।
धान्यस्योपरि संस्थाप्य प्रतिद्रव्यं समाहरेत्।।

### ८.२.२ स्नपने ऋत्विग्वरणम्

**वि.४९. ३२९**

अथ आचार्यो यजमानयुतो द्रव्यदेवाराधनार्थमेकं, कलशोद्धरणार्थं द्वौ चत्वारो वा, अभिषेकार्थमेकं , होमार्थमेकं होतारमेकं वरयित्वा पूजयेत्।

***

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

## ३. स्नपनसम्भारसङ्ग्रहणम्

### ८.३.१ स्नपने अङ्कुरार्पणम्

वि.४७. ३२३

यद्दिने कर्तुमुद्योगस्तद्दिनात् पूर्वं नवमे सप्तमे तृतीये वा अह्नि अङ्कुरार्पणं कुर्यात्। अङ्कुरार्पणादूर्ध्वं द्रव्याण्याहरेत्।

स.४९. ५

स्नपनोक्तदिनात् पूर्वं नवमे वाथ सप्तमे।
पञ्चमेऽहनि वा कुर्याद् विधिनैवाङ्कुरार्पणम्।।

अ.२५; खि.२९.४; ज्ञा.८७.१६४;
य.३४.७, ८; वा.३५

### ८.३.२ अङ्गचतुष्टययुक्तस्य स्नपनस्य पुष्कलत्वम्

खि.३०.१८ - २०

विद्यात्प्राक्करणानीति मृदादीनान्तु पञ्चकम्।
पञ्चगव्यादिद्रव्याणि प्रधानानि तु द्वादश।।

पुण्यपुष्पादिनवकं तथाऽनुकरणं स्मृतम्।
धात्वादिकं त्रिकं विद्याद्भूषणं प्रियदर्शनम्।।

एवं चतुर्भिरङ्गैस्तु स्नपनं स्यात्सुपुष्कलम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



### ८.३.३ स्नपनार्थं सम्भारसङ्ग्रहणम्

**खि.२९.५ - ९**

ततः परं तु सम्भारान् यथोक्तान् सुसमाहरेत्।
मृदोऽचलांश्च धान्यानि अङ्कुरांश्चाष्टमङ्गलान्।।

पञ्चगव्यं घृतं चैव मधु चाथ ततो दधि।
क्षीरं गन्धोदकं चैव अक्षतोदकमेव च।।

फलोदकं कुशोदं च रत्नजप्योदकें तथा।
सर्वौषध्युदकं चेति क्रमेणैतान् समाहरेत्।।

पुण्यपुष्पाणि चूर्णानि कषायं तीर्थवारि च।
(सर्वगन्धान् ततः प्लोतं मूलगन्धांस्तथैव च।।)

वनौषधीश्च हारिद्रं चूर्णं सूक्ष्मं मनोहरम्।
धातून् वस्त्रं भूषणानि सर्वाणि च पृथक् पृथक्।।

### ८.३.४ स्नपनोक्तानि प्राग्द्रव्याणि

**स.४९.६, ७ ; ५२.१, २**

अङ्कुरानर्पयित्वैव द्रव्याण्यपि समाहरेत्।
मृदं च पर्वतांश्चापि धान्यान्यप्यङ्कुरांस्तथा।।

मङ्गलान्यप्यथैतानि प्राग्द्रव्याणि विदुर्बुधाः।

---------------------------------------

मृत्पर्वतश्च धान्यं चाप्यङ्कुरो मङ्गलं तथा।।

प्रधानद्रव्यपूर्वत्वात् प्राग्द्रव्याणीति वै विदुः।

**ज्ञा.९०.१७१ ; वा.३५**

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



**खि.३०.१८**

विद्यात् प्राक्करणानीति मृदादीनां तु पञ्चकम्।

**क्रि.१३.५ - ८**

अङ्कुरार्पणकादूर्ध्वं द्रव्याण्यपि समाहरेत्।
नादेयादिमृदोऽष्टौ च हिमवत्प्रमुखाचलान्।।

शाल्यादीन्यपि धान्यानि तत्तद्धान्याङ्कुराणि च।
श्रीवत्सं पूर्णकुम्भं च भेरीमादर्शनं तथा।।

मत्स्ययुग्माङ्कुशे शङ्खमावर्तं चाष्टमङ्गलम्।
(आवर्तं स्वस्तिके नीलेशानलानिललाहलम् ?)

बृहद्धानुपुरद्वन्द्वमावर्तमभिधीयते।।
युक्त्यान्यानि प्रकुर्वीत प्राग्द्रव्याण्यथ पञ्च वै।

## ८.३.५ अष्टविधायाः मृदः सङ्ग्रहणम्

**वि.४८.३२३**

नदी, सस्यक्षेत्र, तटाक, दर्भमूल, गजदन्तोद्धृत, गोविषाणोद्धृत, कुलीरवास, वल्मीकेषु अष्टौ मृदो यथालाभं वा गृह्णीयात्।

**स.५०.३,४ ; ज्ञा.८७.१६४ ; अ.२५ ;**
**खि.२९.१०,११, ३०.१-३ ; वा.३५**

**य.३४. ८ - १०**

नद्यां वाथ तटाके वा क्षेत्राद्वा दर्भमूलतः।।

गजदन्तोद्धृतं वापि गोशृङ्गोद्धृतमेव वा।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



कुलीरवासे वल्मीके तुलसीमूलमाश्रिते।।

शुद्धां मृदं च गृह्णीयात् तत्पूर्वदिवसे तथा।

**प्र.२२.२५ - २७**

नदीतीरे मृदं गृह्य सस्यक्षेत्रे तटाकके।।

दर्भमूले च सङ्गृह्य गजदन्ते तथैव च।
गोशृङ्गे कर्कटावासे वल्मीकस्य तु मध्यमे।।

महीं देवीमनुज्ञाप्य ताश्चाहृत्य पृथक् पृथक्।
आतपेनाथ संशोष्य विश्वामित्रान् परिह्रसेत्।।

### ८.३.६ अष्टविधाया मृदः अलाभे प्रतिनिधिः

**स.५०.५**

सर्वालाभे तु नादेयदर्भमूलमृदं तु वा।

### ८.३.७ मृदा स्नापने फलम्

**प्र.३५.४०८**

मृद्भिः संस्नापनाद् भूमिः सर्वसस्यान्विता भवेत्।।

### ८.३.८ स्नपने मृल्लोपे फलम्

**प्र.३५.५७९**

मृत्सु हीनासु नाशः स्यात् सस्यानां तु न संशयः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



### ८.३.९ स्नपनोपयुक्तानामष्टकुलपर्वतानां कल्पनम्

**ज्ञा.८७.१६५**

हिमवदूर्जविन्ध्यविदूरवेदपर्वतमहेन्द्रहरिश्चन्द्रशतशृङ्गाख्यानिमान् अष्टकुलपर्वतान् प्रागादिचतुर्दिक्षु क्रमेण श्वेतपीतरक्तकृष्णवर्णयुतान् अष्टाङ्गुलोच्छ्रयान् मूले षडङ्गुलायतविस्तारान् अग्रे त्र्यङ्गुलविस्तृतान् चतुरश्रांश्च कारयति। ------------- तथा पर्वतांश्च कारयेत्। तथैव पर्वतानामपि पीठं कुर्यादिति केचित्।

**य.३४.११,१२,१५ ; वा.३५; अ.२५**

**वि.४८.३२३**

हिमवन्मेरु, विन्ध्य, विडूर, वेदपर्वत, महेन्द्र, महाहरिश्चन्द्र, शतशृङ्गान् एतान् कुलपर्वतान् अष्टौ यथाक्रमेण धूमश्वेतपीतरक्तश्यामनीलपिङ्गलकृष्णवर्णान् द्वादशाङ्गुलोत्सेधान् पञ्चाङ्गुलविशालान् अग्रे त्र्यङ्गुलविस्तृतान् चतुरश्रान् याज्ञिकैर्वृक्षैः मृदा वा कारयेत्।

**स.५०.७ - १०, १९, २०**

हिमवान् दुर्जयो विन्ध्यो विदूरो वेदपर्वतः।
महेन्द्रश्च हरिश्चन्द्रः शतशृङ्गश्च पर्वताः।।

याज्ञिकैरेव वृक्षैस्तु करयेत्पर्वतानिमान्।
अष्टाङ्गुलोच्छ्रयान् मूले विस्तारस्तु षडङ्गुलः।।

ऊर्ध्वे च त्र्यङ्गुलं चैव चतुरश्रान् क्रमात्कृशान्।
एवमष्टौ तु वृक्षैस्तु मृदा वा पर्वतान् कृतान्।।

ऐन्द्रादि च तदैशान्तं पङ्क्तिं बाह्ये तु विन्यसेत्।

----------------------------------

चतुरङ्गुलमुत्सेधं तेषां पीठं विधीयते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



उक्तवृक्षैर्मृदा वाथ कारयेत विधानतः।।
पर्वतान् मङ्गलांश्चापि मृण्मयानाहरेत् दृढम्।

**अ.२५**

हिमवान् हेमकूटश्च निषधो नीलपर्वतः।
महेन्द्रो हेमधूमश्च ? शतशृङ्गानिमान् गिरीन्।।

**खि.२९.१२ - १५**

हिमवानूर्जकौ विन्ध्यो विदूरो वेदपर्वतः।
महेन्द्रश्च हरिश्चन्द्रः शतशृङ्गश्च पर्वतः।।

पलाशैस्तु तथाश्वत्थैः बिल्वैर्वा खादिरैरपि।
मृद्भिर्वा कारयेदष्टौ पर्वतानुक्तमानतः।।

अष्टाङ्गुलसमुत्सेधांश्चतुरश्रान् समन्ततः।
मूले षडङ्गुलघनानग्रे चैव त्रियङ्गुलान्।।

मूलादग्रं क्रमेणैव कर्शितान् पर्वतान् नयेत्।
श्वेतः पीतोऽसितो रक्तो वर्णस्तेषां दिशां क्रमात्।।

**खि.३०. ३**

**प्र.२२. ३० - ३४**

अश्वत्थेन पलाशेन बिल्वेन खदिरेण वा।
कुर्यादष्टाङ्गुलोत्सेधं चतुरश्रं समन्ततः।।

मूलं षडङ्गुलं चाग्रात् त्र्यङ्गुलं समुदाहृतम्।
अनेन वा मृदा वापि कुर्याद्वै पर्वतान् क्रमात्।।

हिमवानूर्जवान्विन्ध्यो विदूरो वेदपर्वतः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



महेन्द्रश्च हरिश्चन्द्रश्शतशृङ्गश्च पर्वताः।।

एषां वर्णस्तथैवोक्तः कुर्याद्वर्णेन संयुतान्।
श्वेतं पीतं च कृष्णं च रक्तं वै श्वेतमेव च।।

पीतं कृष्णं च रक्तं च क्रमाद्वर्ण उदाहृतः।

### ८.३.१० पर्वतप्रदक्षिणफलम्

**प्र.३५.४०९**

नगैः प्रदक्षिणादेव गोत्रस्य स्थितिराप्यते।।

### ८.३.११ स्नपने पर्वतलोपे फलम्

**प्र.३५.५८०**

पर्वतेषु विहीनेषु स्थैर्यं तस्य[1] विलुप्यते।

### ८.३.१२ स्नपनोपयुक्तानि धान्यानि

**स.५०.१० - १२**

शालिव्रीहियवा मुद्गास्तिलमाषाः प्रियङ्गवः।।

गोधूमाश्चणकास्तिल्वा मसूराश्चातसी तथा।
कुलुत्थाः सर्षपाश्चैव षष्टिनिष्पाव एव च।।

धान्यानि -----------------------------।

1. यजमानस्य।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



**प्र.२२.३५ - ३७**

[अत्र 'सर्षपाश्चैव' इत्यस्य स्थाने 'माषकाश्चैव' इति दृश्यते। ]

**ज्ञा.८७.१६५**

शालिव्रीहियवमुद्गमाषप्रियङ्गुगोधूमचणकतिलतिल्वमसूरसर्षपाणि धान्या न्याहरेत्।

**अ.२५ ; खि.२९.१६, १७ ; ३०.४,५**

**य.३४.१३, १४**

शालिव्रीहियवामुद् गास्तथा माषाः प्रियङ्गवः।
गोधूमकं च तिल्वं च तिलं चैव मसूरकम्।।

सर्षपं चैव धान्यानि अङ्कुरार्थं समाहरेत्।

**वा.३५**

शालिव्रीहियवावांश्चैव मुद्गगोधूमतिल्वकम्।
तिलं मसूरचणकसर्षपांश्च दशैव तु।।

एवं चैवाङ्कुरार्थं तु गृहीत्वा तु विशेषतः।

**वि.४८.३२३**

शालिव्रीहियवमुद्गमाषप्रियङ्गुतिलतिल्वसर्षपाण्यष्टौ धान्यानि, सर्वालाभे यथालाभं वा आहृत्य

**८.३.१३ स्नपने विहितधान्याभावे प्रतिनिधिः**

**खि.३६.११, १२**

धान्यानामप्यलाभे तु यवं प्रतिनिधिं हरेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



ततो वारुणमन्त्रांस्तु वैष्णवं विष्णुसूक्तकम्।।
तद्द्रव्याधिपदेवत्यं जुहुयात् सा हि निष्कृतिः।
पुनर्यथोक्तद्रव्यैस्तु सम्भृतैः स्नपनं चरेत्।।

**स.५०.१३**

धान्यानामप्यलाभे तु यवं प्रतिनिधिं हरेत्।
तस्याप्यलाभे मुद्गं वा गृह्णीयादिति केचन।।

## ८.३.१४ धान्यस्नापने फलम्

**प्र.३५.४०९**

धान्यैः संस्नापनाद्विष्णोः धान्यानां वृद्धिराप्यते।।

## ८.३.१५ स्नपने धान्यलोपे फलम्

**प्र.३५.५८०**

धान्येषु तु विहीनेषु धान्यनाशो भवेत् तथा।।

## ८.३.१६ स्नपनोपयुक्तानामङ्कुराणामाहरणम्

**वि.४८.३२३**

अङ्कुरार्पणोक्तधान्यानाम् अङ्कुरांश्च,[1]

**ज्ञा.८७.१६५ ; खि.२९.१७**

1. आहरेदित्यग्रिमेणान्वयो वक्तव्यः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



**८.३.१७ अङ्कुरालाभे प्रतिनिधिः**

**खि.३६.१३, १४**

अङ्कुराणामलाभे तु पुष्पैः पद्मैस्तथेतरैः।
प्रपूर्य पालिकास्तानि कल्पयेदङ्कुराणि वै।।

कुशदूर्वाङ्कुरैर्वापि कुर्याच्चूतादिपल्लवैः।

**स.५०.१५, १६**

**वि.४८.३२३**

तदभावे दूर्वाग्राणि वा आहरेत्।

**८.३.१८ अङ्कुरैरर्चने फलम्**

**प्र.३५.४१०**

अङ्कुरैरर्चनाद्विष्णोः प्रजावृद्धिर्भविष्यति।

**८.३.१९ अङ्कुरलोपे फलम्**

**प्र.३५.५८१**

अङ्कुराणामभावे तु प्रजाहानिश्च सम्भवेत्।

**८.३.२० स्नपनोपयुक्तानि अष्टमङ्गलानि**

**स.५०.१६, १७**

श्रीवत्सं पूर्णकुम्भं च भेरीमादर्शनं तथा।।
मत्स्ययुग्मं तथा सम्यगङ्कुशं शङ्खमेव च।
आवर्तं च तथैतांश्च मङ्गलान् विधिना तथा।।

**अ.२५ ; क्रि.१३, ६, ७ ; खि.२९.१८ , ३०.४;**
**प्र.२२.४२ ; य.३४.१४**

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



**वि.४८.३२३, ३२४**

श्रीरूपोदकुम्भभेरीदर्पणमत्स्ययुग्माङ्कुशशङ्खावर्तानि अष्टमङ्गलानि।

## ८.३.२१ स्नपनार्थम् अष्टमङ्गलानां कल्पनम्

**खि.२९.१९ - २३**

पर्वतोक्तैर्दारुभिर्वा मृदा वा कारयेद् बुधः।
मात्राङ्गुलप्रमाणेन सप्ताङ्गुलसमुच्छ्रयान्।।

सर्वेषां पीठमानं स्याद् भागाङ्गुलसमुन्नतम्।
एवमेतानुक्तमानान् स्वस्वरूपान् प्रकल्पयेत्।।

सुवर्णवर्णं श्रीवत्सं शङ्खभेर्यौ च लौहितौ।
दर्पणं श्वेतवर्णं स्यात् मत्स्ययुग्मं सितं भवेत्।।

ऊर्ध्वास्यं रक्तनेत्रं च कृष्णपक्षं प्रकल्पयेत्।
अङ्कुशं रक्तदण्डं स्यात् कृष्णवर्णा सृणिर्भवेत्।।

शङ्खं शङ्खनिभं कुर्यादावर्तं रक्तमेव च।

**ज्ञा.८७.१६५**

रुक्माभं श्रीवत्सं रक्ताभां भेरीं श्वेताभमादर्शं रक्तनेत्रं कृष्णपक्षयुतमूर्ध्वाननं श्वेताभं मत्स्ययुग्मं कुष्णसृणीयुक्तं रक्ताभमङ्कुशं शङ्खाम्भं शङ्खं रक्ताभमावर्तं, एतान् सप्ताङ्गुलोच्छ्रयपीठयुतान् अष्टमङ्गलान् ।

**वा.३५**

श्रीवत्सं रुक्मवर्णं तु रक्ताभं घटमुच्यते।
भेरीं रागनिभां विद्यात् पीतं चादर्शनं क्रमात्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



श्वेताभं मत्स्ययुग्मं तु तन्नेत्रं रक्तमुच्यते।
असितौ तस्य पक्षौ तु मत्स्ययुग्मं प्रचक्षते।।

सृणिं कृष्णसमायुक्ताम् अङ्कुशं रागमेव च।
तद्वर्णवर्णं शङ्खं च तथावर्तं तु रक्तकम्।।

सप्ताङ्गुलोच्छ्रयं तत्र तन्मूलं चतुरङ्गुलम्।
एवं कृतेऽष्टमङ्गल्ये वृक्षैर्यज्ञोक्तवत् कृते।।

अथवा मृत्कृतं दग्धं तद्वदुक्तस्य वर्णकम्।

**वि.४८. ३२४**

यथाक्रमेण हेमार्कबिम्बफलश्वेतपीतरक्तशङ्खातिरि (र) क्तवर्णान् अष्टाङ्गुलोत्सेधान् चतुरङ्गुलोच्छ्रयपीठयुतान् कारयेत्।

**स.५०.१७ - २०**

---------------- मङ्गलान् विधिना तथा।।

याज्ञिकैरेव वृक्षैस्तु सप्ताङ्गुलसमुच्छ्रयान्।
यथैव तत्तद्रूपं तु तथारूपांस्तु कारयेत्।।

चतुरङ्गुलमुत्सेधं तेषां पीठं विधीयते।
उक्तैर्वृक्षैर्मृदा वाथ कारयेत विधानतः।।

पर्वतान् मङ्गलांश्चापि मृण्मयानाहरेद्दृढम्।

## ८.३.२२ अष्टमङ्गलद्रव्यैः पूजने फलम्

**प्र.३५.४१०**

मङ्गलैः पूजनात् सर्वमङ्गलानि भवन्ति वै।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



## ८.३.२३ अष्टमङ्गललोपे फलम्

**प्र.३५.५८१**

मङ्गलेष्वथ हीनेषु तस्य भूयादमङ्गलम्।।

## ८.३.२४ स्नपने प्रधानद्रव्याणि

**स.४९.७ - ९**

पञ्चगव्यं घृतं चैव मधु चातः परं दधि।।

क्षीरं गन्धोदकं तद्वदक्षतोदफलोदकम्।

कुशोदकं च रत्नोदं जप्योदकमतः परम्।।

सर्वौषध्युदकं चापि पञ्चगव्यादिकानि च।

प्रधानानीति चोक्तानि द्वादशापि पुरातनैः।।

**स.५२.२ - ४; ज्ञा.८७.१६५ ; ९०.१७१, १७२ ;**

**खि.३०.६, १८ ; य.३४.१५, १६ ; वा.३५**

**वि.४८.३२४**

पञ्चगव्यघृतमधुदधिक्षीरगन्धोदकाक्षतोदकफलोदककुशोदकरत्नोदक-जप्योदकसर्वौषध्युदकानि द्वादश प्रधानानि।

## ८.३.२५ पञ्चगव्यादीनां स्नपनद्रव्याणां प्रमाणम्

**य.३४.१७**

द्रव्याणि द्वादशैतानि गृह्णीयादाढकं पृथक्।

**ज्ञा.८७.१६५ ; अ.२५ ; वा.३५**

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



**वि.४८.३२४**

पञ्चगव्यादीनि प्रत्येकमाढकं तदर्थं यथालाभं वा सङ्गृह्य शेषं जलेन पूरयेत्।

**क्रि.१३.८, ९**

**८.३.२६ गव्यग्रहणे पात्रं प्रशस्तम्**

**वि.४८.३२४**

मृण्मयपात्रेण ग्राह्यं गव्यम्।[1]

**८.३.२७ स्नपने पञ्चगव्यम्**

**वि.४८.३२४**

षोडशांशं [2]कृत्वा 'शुक्रमसी'त्येकांशं घृतं, 'दधिक्रावण' इति व्द्यंशं दधि, 'आप्यायस्व'ति त्रिगुणांशं क्षीरं, 'शन्नो देवी'रिति वेदांशं गोमयं, सावित्र्या रसांशं गोमूत्रम् एवं योजयेत्, एवं पञ्चगव्यम्।।

**ज्ञा.९०.१७१ ; स.५०.१३, १४ ; खि.२९.२३, २४**

**प्र.२२.५०, ५२, ३३. २१, २२, ५३.५५ - ५७**

पञ्चगव्यक्रमं वक्ष्ये देवस्य स्नपनं प्रति।

------------------------------------।।

प्रस्थपादं घृतं चैव द्विगुणं दधिसंयुतम्।
गृहीत्वा त्रिगुणं क्षीरं गोमयं तु चतुर्गुणम्।।

1. पाठान्तरम् - मृण्मयपात्रे न ग्राह्यं गव्यम्। [वै.मु.सं.पृ.२९९.]
2. अपेक्षितप्रमाणमित्यध्याहार्यम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



षड्गुणं चैव गोमूत्रं पञ्चगव्ययुतं क्रमात्।
-------------------------------------।।

'गङ्गे'यं' मन्त्रमुच्चार्य गोमूत्रं पूर्वमाहरेत्।
तत्परं तु शकृद् ग्राह्यं 'ईशान'मिति मन्त्रतः।।

'हिरण्यपाणि'मित्युक्त्वा पय आदाय निक्षिपेत्।
'इषे त्वे'ति दधि युञ्ज्यात् घृतं चा'यन्त' इत्यपि।।

इत्येवं पञ्चभिर्मन्त्रैः पञ्चगव्यं समाहरेत्।

**खि.२९.२३, २४**

**वा.३५**

आढकात् षोडशांशं तु घृतं चैवात्र योजयेत्।
दधि त्रियंशं(द्व्यंशं)? गमयेत् त्र्यंशं क्षीरं तथैव च।।

गोमयं चतुरंशं च गोमूत्रं चतुरंशकम्।
प्रधानैर्द्वादशद्रव्यैः मन्त्रं जप्त्वा यथाक्रमम्।।

'शुक्रमसी'ति मन्त्रेण 'दधिक्राव्ण्ण' इत्यपि।
'आप्यायस्वे'ति चोच्चार्य 'गन्धद्वारं' तथैव च।।

गायत्र्या च क्रमेणैव गोमूत्रादीनि योजयेत्।

**अ.२५**

आढकार्धं तु गोमूत्रं गोमयं तु तदर्धकम्।
क्षीरं तत्प्रस्थमेवोक्तं तदर्धं दधिरेव च।।?

कुडुबं च घृतं चैव पञ्चगव्यं सुयोजयेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



### ८.३.२८ गव्यानि प्रशस्तानि

**क्रि.३३.२०,२१.२३,२४**

कपिलायाः वरं क्षीरं श्वेतायाः दधि शस्यते।
रक्तायाश्च घृतं ग्राह्यं कृष्णाया गोमयं तथा।।

गोमूत्रं नीलवर्णायाः पञ्चगव्यं शुभप्रदम्।

------------------------------------

पतितं गोमयं श्रेष्ठं गोमूत्रं चाप्यपातितम्।
धारोष्णं क्षीरमादेयं सद्यस्तप्तं घृतं तथा।।

दधि चाप्यनतीताहम् एतद् गव्यस्य लक्षणम्।

**प्र.२२.५०,५१,५३,५४**

[अत्र 'दधि चाप्यनतीताहम्' इत्यस्य स्थाने 'अशुक्तं दधि गृह्णीयात्' इति निर्दिश्यते।]

**क्रि.२५.३४ - ३६**

कपिलाया घृतं श्रेष्ठं रक्ताया दधि चाहरेत्।।

श्वेतायास्तु तथा क्षीरं कृष्णाया गोमयं भवेत्।
कपोतगलवर्णाया गोमूत्रमपि चाहरेत्।।

अलाभे चोक्तवर्णानां यथालाभमथापि वा।

### ८.३.२९ श्रेष्ठं घृतम्

**ज्ञा.९०.१७१**

शुद्धं नवनीतं सद्यः समपक्वं सुवर्णाभं घृतं श्रेष्ठम् अनतीतपञ्चदशाहं वा।

**वि.४८.३२४**

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



स.५०.२५

सद्यः पक्वं घृतं श्रेष्ठं मासादूर्ध्वं तु वर्जयेत्।

खि.२९.२५

सद्यस्तप्तं सुवर्णाभं समपक्वं घृतं हरेत्।

अ.२५

८.३.३० घृतस्नापनस्य फलम्

प्र.३५.४११

घृतेन स्नापनाद् भूयात् सामाध्ययनजं फलम्।।

८.३.३१ घृतलोपे फलम्

प्र.३५.५८२

घृतहीने बुद्धिनाशः ---------------

८.३.३२ स्नपने प्रशस्तं मधु

स.५०.२६

मधु शुद्धं फलोद्भूतं पुष्पजं वा समाहरेत्।।

वा.३५

खि.२९.२५, २६

पुष्पद्रावणकं वापि फलद्रावणकं तथा।।

माक्षिकं वा मधु -------------------

-----------------------------------

ज्ञा.९०.१७१ ; वि.४८.३२४

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



## ८.३.३३ मधुनः अलाभे प्रतिनिधिः

**स.५०.२७, २८**

मधूक्ते तत्र तोयं वा नारिकेलजलं तु वा।
नारिकेलजलैश्चेत्तु स्नापयेत् सद्य एव तत्।।

---------------------------------------- ।
ग्राहयेन्मृण्मये पात्रे नारिकेलाम्बु विन्यसेत्।।

**वा.३५ ; वि.४८.३२४ ; ज्ञा.१०.१७९**

**खि.२९.२६**

------ भवेदलाभे कापिलं घृतम्।
अथवा नालिकेराम्बु -----------।।

## ८.३.३४ मध्वादिग्रहणे नियमविधानम्

**स.४९.५८**

मधु क्षीरं घृतं सम्यगुत्पूयैव समाहरेत्।

## ८.३.३५ मधुस्नापने फलम्

**प्र.३५.४१२**

मधुना स्नापयेद्विष्णुं मधुस्यन्दि भवेद्वचः।।

## ८.३.३६ मधुलोपे फलम्

**प्र.३५.५८३**

मधुहीने महान् व्याधिः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



**८.३.३७ स्नपने प्रशस्तं दधि**

**स.५०.२९**

दधि ग्राह्यमशुक्तं चेत् द्व्यहाभ्यन्तरगं शुभम्।

**खि.२९.२७**

न शुक्तं दधि गृह्णीयाद् गृह्णीयात् प्रियदर्शनम्।

**प्र.२२.६३**

न शुक्तं दधि गव्यं च सम्पूर्णकलशं तथा।

**वि.४८.३२४**

न शुक्तं दधि।

**ज्ञा.९०.१७१**

**८.३.३८ दधिस्नापनफलम्**

**प्र.३५.४१३**

दध्ना संस्नापयेद्देवम् अच्छं तस्य भवेद्यशः।।

**८.३.३९ दधिलोपे फलम्**

**प्र.३५.५८३**

--------------- दधिहीने तु संज्वरः।

**८.३.४० स्नपने प्रशस्तं क्षीरम्**

**खि.२९.२७, २८**

क्षीरं गव्यं च यत्नेन सद्यो दुग्धं समाहरेत्।।

गव्यमेव तु सङ्ग्राह्यं वर्ज्यमाजं च माहिषम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



**स.५०.३०**

सद्यो दुग्धं पयः श्रेष्ठं यामातीतं परित्यजेत्।

**प्र.२२.६४**

सद्यो दुग्धं पयो ग्राह्यम् अक्षतैः पूरितं तथा।

**वि.४८.३२४**

सद्योदुग्धं क्षीरं श्रेष्ठम्।

**ज्ञा.९०.१७१**

**८.३.४१ क्षीरेण स्नापने फलम्**

**प्र.३५.४१२**

क्षीरेण स्नापयेद्विष्णुं गाश्च क्षीरवतीरियात्।

**८.३.४२ क्षीरलोपे फलम्**

**प्र.३५.५८२, ५८३**

-------------- अनायुष्यं क्षीरहीनके।।

------------------------------------।

क्षीरहीने भवेत् तस्य मलिना कीर्तिरेव हि।।

**८.३.४३ स्नपने गन्धोदकम्**

**स.५०.३१**

सर्वगन्धयुतं तोयं गन्धोदकमिति स्मृतम्।

**खि.२९.२८**

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



**ज्ञा.९०.१७१**

चन्दनकोष्ठूशीरैलालवङ्गादिगन्धैः मिश्रं गन्धोदकम्।

**क्रि.१३.१०**

[अत्र 'आढकाहीनमेव च' इत्यधिकम्।]

**वा.३५**

**वि.४८.३२४**

जलपिष्टचन्दनादिगन्धद्रव्ययुतं गन्धोदकम्

**अ.२५**

कुङ्कुमं च प्रसूनं च मृगगन्धं च रोचनम्।।

कोष्ठं च श्यामकर्पूरं एलोशीरसमन्वितम्।

लवङ्गेन समायुक्तम् अष्टगन्धं सुसङ्ग्रहेत्।।

चन्दनेन च संवेष्ट्य आढकं पूर्णमाहरेत्।

**८.३.४४ गन्धोदकेन स्नापने फलम्**

**प्र.३५.४१३**

गन्धोदस्नापनाद्विष्णोः सर्वसम्पद्वृतो भवेत्।।

**८.३.४५ गन्धोदकलोपे फलम्**

**प्र.३५.५८४**

गन्धोदकविहीने तु दुर्गन्धो जायते भृशम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



## ८.३.४६ अक्षतोदकलक्षणम्

**स.५०.३२,३३**

अक्षतैर्मिश्रितं तोयमक्षतोदकमुच्यते।
यवसर्षपसव्रीहिमाषैस्तण्डुलमक्षतम्।।

अक्षतानि च तद्द्रव्यं जलाष्टांशं विनिक्षिपेत्।

**क्रि.१३.११**

**वि.४८.३२४**

माषयवसर्षपव्रीहितण्डुलैर्युक्तं जलम् अक्षतोदकम्।

**ज्ञा.९०.१७१**

यवसर्षपमाषैर्युक्तं व्रीहिभिस्तण्डुलैर्वा युक्तम् अक्षतोदकम्।

**वा.३५**

व्रीहितण्डुलसंमिश्रमक्षतोदकमुच्यते।।

**खि.२९.२९**

अक्षतैर्मिश्रितं तोयमक्षतोदकमुच्यते।
यवसर्षपकव्रीहिमाषैर्युक्तं तथाऽक्षतम्।।

**अ.२५**

**प्र.२२.६६, ६७**

व्रीहिमाषयवैर्युक्तं सर्षपं चाक्षतं विदुः।।

तूर्यघोषसमायुक्तं मिश्रितं चाक्षतोदकम्।

## ८.३.४७ अक्षतोदकेन स्नापने फलम्

**प्र.३५.४१४**

स्नापयेदक्षतोदैस्तु प्रजा तस्याक्षता भवेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



### ८.३.४८ अक्षतोदकलोपे फलम्

**प्र.३५.५८४**

अक्षतो‍‍ हीने तु क्षतिस्तस्य प्रजायते।।

### ८.३.४९ स्नपने फलोदकस्य लक्षणम्

**क्रि.१३.१२, १३**

कदलीचूतपनसनारिकेलफलैर्युतम्।
नारङ्गमातुलुङ्गाभ्यां त्रिफलैर्मौञ्जकेन च।।

भव्यहव्यकुरुन्दैश्च कामरेणापि संयुतम्।
फलोदकमिति प्रोक्तं जलाष्टांशफलैर्युतम्।।

**वि.४८.३२४**

कदलीपूगपनसनालिकेरमातुलुङ्गाद्यैः फलैर्यथालाभैर्युक्तं फलोदकम्, चन्दनाद्यमष्टांशादहीनं प्रक्षिपेत्।

**प्र.२२.६८ - ७०**

कदलीमातुलुङ्गाम्रपनसैः नालिकेरकैः।।

आर्द्रादिभिः फलैश्चान्यैः यथालाभं समाहृतैः।
फलैरर्धांशसंयुक्तं शेषं तोयेन पूरितम्।।

फलोदकमिति प्रोक्तं --------------।

**स.५०.३४, ३५**

कदल्या नारिकेलस्य चूतस्य पनसस्य च।
फलैश्च कामरस्यापि नारङ्गस्य तथैव च।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



कुरुन्दोत्तमकुञ्ज्यादिफलैः शुद्धैः शुभैरपि।
फलैः सुमिश्रितं तोयं फलोदकमिति स्मृतम्।।

**वा.३५**

**खि.२९.३०, ३१**

कदलीचूतपनसकपित्थामलकैस्तथा।
बिल्वैस्तथा मातुलुङ्गैः कामरैश्च तथा फलैः।।

नारिकेलोदकेनापि मिश्रं स्यात् तत् फलोदकम्।
फलोदकं फलैर्मिश्रं पनसाद्यैः स्मृतं जलम्।।

**ज्ञा.९०.१७१, १७२**

कदलीचूतपनसनालिकेरनारङ्गमातुलुङ्गोत्तममौञ्जकामरभव्यकुशादीनां फलैः यथालाभैर्युक्तं फलोदकम्।

**अ.२५**

कदली चूतपनसमातुलुङ्गकपित्थकम्।
नारिकेलं च बैल्वं च नारङ्गीत्रयमेव च।।

साधितं चैव जम्बूकं यथालाभं फलोदकम्।

**८.३.५० फलोदकेन स्नापने फलम्**

**प्र.३५.४१४**

फलोदकस्नापनेन शुभानीयात् फलानि तु।।

**८.३.५१ फलोदकलोपे फलम्**

**प्र.३५.५८५**

फलोदकविहीने तु विफलं तस्य जीवितम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



८.३.५२ स्नपने कुशोदकस्य लक्षणम्

**प्र.२२.७१**

कुशाग्रैरथवा दूर्वैः अक्षतैश्च समन्वितम्।

कुशोदकमिति प्रोक्तं ----------------।।

**वा.३५**

कुशदूर्वाग्रदर्भैर्वा मिश्रितं वा कुशोदकम्।

**अ.२५**

कुशदर्भाग्रमेवोक्तं कुशोदकमिति स्मृतम्।।

**स.५०.३६**

कुशाग्रैर्मिश्रितं तोयं कुशोदकमितीरितम्।।

**क्रि.१३, १४ ; खि.२९.३२**

**वि.४८.३२४**

कुशैः सहितं [1] कुशोदकम्।

**ज्ञा.९०.१७२**

८.३.५३ कुशोदस्नापनस्य फलम्

**प्र.३५.४१५**

स्नापनात्तु कुशोदेन ब्रह्मवर्चसमाप्नुयात्।

1. जलमित्यनुवर्तते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



## ८.३.५४ स्नपने कुशोदकलोपस्य फलम्

**प्र.३५. ५८५**

कुशोदकविहीने च नैधेत ब्रह्मवर्चसम्।।

## ८.३.५५ स्नपने रत्नोदकस्य लक्षणम्

**स.५०.३७ - ३९**

पद्मरागं च वज्रं च वैडूर्यं मौक्तिकं तथा।।

प्रवालं च विदुः पञ्च पञ्चरत्नानि वै बुधाः।
पुष्यरागं मरतकं गोमेधं चेन्द्रनीलकम्।।

पूर्वैरेतैश्च युक्तानि नवरत्नानि वै विदुः।
नवरत्नयुतं तोयं रत्नोदकमिति स्मृतम्।।

**खि.२९.३२ - ३४**

**प्र.२२.७२ - ७४**

वज्रं नीलं प्रवालं च शङ्खजं शुक्तिजं तथा।।

एतानि पञ्चरत्नानि ततो मरतकं तथा।
वैडूर्यं पुष्यरागं च गोमेधिकमिति क्रमात्।।

रत्नोदकमिति प्रोक्तं ------------------।

**वा.३५**

पद्मरागं च पुष्यं च वैडूर्यं वज्रसंयुतम्।।

मौक्तिकं च प्रवालं च माणिक्यं मरतकं तथा।
गोमेदं चेन्द्रनीलादियुतं रत्नोदकं भवेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



**ज्ञा.९०.१७२**

पद्मरागपुष्यकान्तवज्रवैदूर्यमौक्तिकप्रवालमरतकगोमेदेन्द्रनीलानीति नवैतानि रत्नानि। पूर्वाणि पञ्चरत्नानि। नवभिः पञ्चभिर्वा रत्नैर्युक्तं रत्नोदकम्।

**क्रि.१३.१४ ; वि.४८.३२४**

**अ.२५**

पद्मरागं च वज्रं च मौक्तिकं चन्द्रकान्तकम्।
प्रवालं पञ्चरत्नानि संग्रहेच्च विधानतः।।

**८.३.५६ रत्नोदकस्यालाभे प्रतिनिधिः**

**स.५०.४०**

यथालाभयुतं वाथ सुवर्णनाऽथवा युतम्।

**खि.२९.३५ ; क्रि.२२.६५ ; वि.४८.३२४**

**८.३.५७ रत्नोदकेन स्नापने फलम्**

**प्र.३५.४१५**

रत्नोदकस्नापनेन मणिरत्नादि वर्धयेत्।

**८.३.५८ रत्नोदकलोपे फलम्**

**प्र.३५.५८६**

रत्नोदकविहीने च धनधान्यविनाशनम्।

**८.३.५९ स्नपने जप्योदकस्य लक्षणम्**

**वा.३५**

वैष्णवं विष्णुसूक्तं च पुरुषसूक्तयुतं जपेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



द्वादशावर्त्य जप्यं तु जप्योदकमिति स्मृतम्।।
कैश्चिदुक्तं विशेषेण 'आपोहिष्ठा'दिभिः त्रिभिः।
अष्टोत्तरशतं जप्यं जप्योदकमिति स्मृतम्।।

**प्र.२२.७५, ७६**

वैष्णवं विष्णुसूक्तं च पुरुषसूक्तयुतं जपेत्।।
तथाभिमन्त्रितं तोयं जप्योदकमिति स्मृतम्।

**क्रि.१३.१५, १६**

'आपोहिष्ठे'ति मन्त्रान् त्रीनावर्त्याष्टोत्तरं शतम्।
अतो देवादिभिः षड्भिः वैष्णवैः सकृदेव वा।।
जप्त्वाऽभिमन्त्रितं तोयं जप्योदकमिति स्मृतम्।

**स.५०.४१**

'अतो देवादि'षण्मन्त्रान् जपेत् तत्कलशोदकम्।
दर्भैश्च संस्पृशन्नेव तज्जप्योदकमुच्यते।।

**वि.४८.३२४, ३२५**

'अतो देवा'दिभिः षड्भिर्मन्त्रैः प्रणवशतेनाभिमन्त्रितं[1] जप्योदकम्।

**ज्ञा.९०.१७२**

दर्भैः जलं स्पृष्ट्वा 'आपोहिष्ठामयादीन्' मन्त्रानावर्त्य अष्टोत्तरशतं जप्त्वा अभिमन्त्रितं जप्योदकम्।

---

1. जलमित्यध्याह्रियते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



**खि.२९.३५, ३६**

स्पृष्ट्वा तु वैष्णवान् मन्त्रान् कलशं जलपूरितम्।।

जपेदुदङ्मुखो भूत्वा तज्जप्योदकमुच्यते।

**अ.२५**

जपन् वै विष्णुगायत्र्या भवेज्जप्योदकं स्मृतम्।

## ८.३.६० जप्योदकेन स्नापने फलम्

**प्र.३५.४१६**

जप्योदकस्य स्नानेन सर्वजापफलं लभेत्।

## ८.३.६१ स्नपने सर्वौषध्युदकस्य लक्षणम्

**वि.४८.३२५**

ओषधयः फलपाकान्ताः, सर्वैः त्रिभिरधिकैर्वा संयुक्तं[1] सर्वौषध्युदकम्।

**क्रि.१३.१६, १७**

ओषध्यः फलपाकान्तास्ताभिः सर्वाभिरन्वितम्।।

तोयाष्टांशप्रमाणाभिः सर्वौषध्युदकं स्मृतम्।

**स.५०.४२, ४३**

सर्वौषधिसमायुक्तं सर्वौषध्युदकं भवेत्।।

यथालाभौषधीयुक्तं तण्डुलैरथ संयुतम्।

1. जलमित्यध्याह्रियते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



**ज्ञा.९०.१७२**

ओषध्यः फलपाकान्ताः प्रियङ्गुसर्षपमुद्गाद्याः, ताभिः सर्वाभिर्मिश्रितं सर्वौषध्युदकम्।

**खि.२९.३६, ३७ ; प्र.२२.७७**

**वा.३५**

सर्वबीजानि सङ्क्षिप्य सर्वौषध्युदकं भवेत्।

### ८.३.६२ सर्वौषध्युदकेन स्नापने फलम्

**प्र.३५.४१६**

भवन्त्योषधयः सर्वाः सर्वौषध्युदकाप्लुवात्।।

### ८.३.६३ सर्वौषध्युदकलोपे फलम्

**प्र.३५.५८६**

अभावे चौषधीनां तु व्याधिपीडा भविष्यति।

### ८.३.६४ उष्णोदकस्य लक्षणम्

**खि.२९.४९**

नात्युष्णं नातिशीतं च क्वथितं शुद्धवारि च।
पूरयित्वा च करके तत्काले चाहरेत् पुनः।।

### ८.३.६५ उष्णोदकलोपे फलम्

**प्र.३५.५८७**

उष्णाम्भसामभावे तु भवेदुष्णशरीरता।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



**८.३.६६ उपस्नानलोपे फलम्**

**प्र.३५.५८७**

उपस्नानविहीने तु मलिनं जायते कुलम्।

**८.३.६७ पञ्चगव्यादीनां स्नपनद्रव्याणां प्रमाणम्**

**वा.३५**

प्रत्येकमाढकं ग्राह्यं न्यूनं चेदाभिचारिकम्।।

देवानां च ऋषीणां च नृपाणां च कृतं यदि।
द्रोणैर्द्रोणार्धकैर्युक्तम् इति शास्त्रस्य निश्चयः।।

**८.३.६८ स्नपनद्रव्यमानादीनां खिलाधिकारोक्तनामतिदेशः**

**य.३५.४०, ४१**

एतेषामपि द्रव्याणां मानं योगं प्रतिक्रिया।।

उत्पत्तिर्नवभेदाश्च मया प्रोक्ताः पुरा खिले।
तथा चरेदनुक्तानि सर्वाण्यन्यानि मन्त्रतः।।

**८.३.६९ स्नपनोपयोगीन्यनुद्रव्याणि**

**ज्ञा.९०.१७२**

पुण्यपुष्पजातीफलादिचूर्णकषायचूर्णतीर्थोदकवनौषधिहारिद्रचूर्णसर्वगन्धचूर्णमूलगन्धप्लोतवस्त्रोत्तरीयाभरणयज्ञोपवीतधातव इति द्वादशैतानि अनुद्रव्याणि।

**स.४९.१०, ११**

पुण्यपुष्पं च चूर्णं च कषायं तीर्थवारि च।
वनौषधिसमायुक्तं हारिद्रं चूर्णमेव च।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



तथैव सर्वगन्धं च मूलगन्धमतः परम्।
आत्मद्रव्याणि चैतानि पुण्यपुष्पादिकानि वै।।

**स.५२.५, ६**

**वा.३५**

चूर्णं च पुण्यपुष्पं च तीर्थवारि कषायकम्।

तथा वनौषधीयुक्तं चूर्णं हारिद्रमेव च।।
मूलगन्धं च सर्वं च अनुद्रव्याणि कीर्त्यते।

**खि.३०.१९**

पुण्यपुष्पादिनवकं तथाऽनुकरणं स्मृतम्।

**क्रि.१३.१७ - २०**

बिल्वपत्राश्वदूर्वाब्जनन्द्यावर्तशमीप्रियाः।।

पुण्यपुष्पाणि चोक्तानि यथालाभं समाहरेत्।
बिल्वपत्रसमं रात्रौ कपित्थदलमुच्यते।।

चूर्णं जातीफलादीनां कषायं तीर्थवारि च।
वनौषधिनिशाचूर्णं सर्वगन्धमतः परम्।।

प्लोतं च मूलगन्धं च धातूनपि समाहरेत्।
वस्त्रोत्तरीयोपवीत भूषणानि तथाऽऽहरेत्।।

**वि.४८.३२५**

पुण्यपुष्पाणि नानाद्रव्याणि प्रत्येकं समस्तम् अर्धं यथालाभं वा गृह्णीयात्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



**खि.२९.३७ - ४०**

बिल्वं च करवीरं च पद्मं कुमुदमेव च।।

नन्द्यावर्तं चैकपद्मं तुलसीं क्रान्तमाहरेत्।
अष्टौ वै पुण्यपुष्पाणि स्नपनेऽस्मिन् समाहरेत्।।

दिवा वै करवीराख्यं रात्रौ श्वेतं समाहरेत्।
श्वेतं च कुमुदं श्रेष्ठं रक्तं पुष्पं विवर्जयेत्।।

दिवा रात्रौ पद्मयुगं रक्तं श्वेतं च पूज्यते।

**प्र.२२.८१ - ८४**

नन्द्यावर्तं च पद्मं च तुलसी विष्णुपर्णिका।
बिल्वं च करवीरं च पद्मं कुमुदमेव च।।

अष्ट वै पुण्यपुष्पाणि ग्राह्याणि तु यथाक्रमम्।
दिवा शुद्धं तुं बिल्वं च कपित्थं बिल्ववन्निशि।।

करवीरं दिवा शुद्धं निशि सितं तथा शुचि।
शरावेषु समाहृत्य पुष्पाणि तु पुथक् पृथक्।।

'इमास्सुमनस' इति मन्त्रेण यमनीलान्तरे न्यसेत्।
तस्योपस्नानमेकन्तु तत्पार्श्वे कलशं न्यसेत्।

**खि. ३०. ६, ७**

**स.५०.४६, ४७**

बिल्वं च करवीरं च पद्मं कुमुदमेव च।
नन्द्यावर्तं चैकपद्यं तुलसी विष्णुपर्णिका।।

अष्टौ च पुण्यपुष्पाणि चत्वार्याद्यानि चाथवा।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



एतान्यपि शरावेषु सम्यगेव प्रगृह्य च।।

यमनैऋतयोर्मध्ये पुण्यपुष्पाणि विन्यसेत्।

**वा.३५**

पद्मं च कुमुदं चैव बिल्वपत्रं तथैव च।।

करवीरं तु तुलसी पुण्यपुष्पेति संज्ञितम्।

**वि.४८.३२५**

बिल्वपत्रकरवीरनन्द्यावर्तपद्मकुमुदानि पुण्यपुष्पाणि।

**ज्ञा.८७.१६५**

**अ.२५**

करवीरं बिल्वपत्रं पद्मपुष्पादि चाहरेत्।।

**य.३४.१७**

बिल्वपत्रं च पुष्पाणि पुण्यानि च समाहरेत्।

## ८.३.७० पुण्यपुष्पैरर्चने फलम्

**प्र.३५.४१७**

पुण्यपुष्पार्चनेनैव पुण्यवान् जायते नरः।

## ८.३.७१ पुण्यपुष्पलोपे फलम्

**प्र.३५.५८८**

पुण्यपुष्पविहीने तु पापीयान् जायते नरः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



## ८.३.७२ स्नपने उद्वर्तनचूर्णम्

**प्र.२२.८५, ८६**

श्रीवेष्टकं यवं मुद्गमुशीरं चैव रत्नकम्।
तथा मसूरं दमनं जातीफलयुतं तथा।।

लवङ्गं च समाहृत्य चूर्णयित्वा क्रमेण वै।
समाराध्यैव तच्चूर्णं शरावेषु च पूरयेत्।।

पङ्क्तीशाद्दक्षिणे चूर्णं 'वन्द्यो न' इति विन्यसेत्।

**वा.३५**

जातीफलं च कर्पूरं श्रीवेष्टोशीरमेव च।।

मसूरं दमनं चैव मुद्गं च लवनं तथा।
एतैरष्टैस्तु सच्चूर्णं अङ्गोद्वर्तार्थमुच्यते।।

**ज्ञा.८७.१६५**

जातीफलकर्पूरश्रीवेष्टकोशीरमसूरदमनकमुद्गचणकानां चूर्णम्।

**य.३४.१८**

**वि.४८.३२५**

[अत्र श्रीवेष्टकं न निर्दिश्यते इति विशेषः]

**स.५०.४८, ४९**

श्रीवेष्टकमुशीरं च मसूरं चैकमुद्गकम्।।

दमनकं तथा मुद्गं चणकांश्च तथैव च।
चूर्णयित्वा तु सर्वान् वै शरावेषु प्रपूरयेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



**अ.२५**

जातीफलं च कर्पूरं श्रीवेष्टं चाप्युशीरकम्।।

मसूरं दमनकं मुद्गमेतद् गन्धार्थमाहरेत्।

**खि.२९.४०, ४१**

श्रीवेष्टकं मसूरं च उशीरं चैव चन्दनम्।।

एलालवङ्गकादीनि चूर्णार्थं च समाहरेत्।

**खि. ३०. ८**

## ८.३.७३ श्रीवेष्टकादि चूर्णस्यालाभे प्रतिनिधिः

**प्र.२२.८७**

[1]एषामलाभे चूर्णानां ग्राह्यमेलादिचूर्णकम्।।

## ८.३.७४ उद्वर्तनचूर्णार्पणे फलम्

**प्र.३५.४१७**

चूर्णैः श्रीवेष्टकादीनाम् अर्पणाद्वृद्धिरायुषः।।

## ८.३.७५ उद्वर्तनचूर्णलोपफलम्

**प्र.३५.५८८**

जातीफलादिचूर्णस्य चाभावे तु विपद्भवेत्।।

1. श्रीवेष्टकादि चूर्णानाम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



८.३.७६ स्नपने कषायचूर्णम्

खि.२९.४१, ४२

अश्वत्थस्य वटस्यापि मधूकस्यासनस्य च।।

खदिरस्य कषायस्य वञ्जुलस्यार्जुनस्य च।
पितृद्रुमस्य पट्टानि कषायार्थं समाहरेत्।।

खि.३०. ९, १०

य.३४.१९, २०

अश्वत्थवटयोश्चैव पितृद्रुमार्जुनयोरपि।
खदिरस्य मधूकस्य वञ्जुलासनयोरपि।।

त्वक्चूर्णं च कषायार्थं नद्यादौ तीर्थमाहरेत्।
सिंही च नकुली व्याघ्री नन्दाऽदित्या च साह्वया।।

स.५०.५१ - ५३

अश्वत्थस्य मधूकस्य खदिरस्य वटस्य च।।

वञ्जुलासनयोश्चापि तथैवोदुम्बरस्य च।
त्वच आहृत्य शुष्कांश्च कृत्वा सञ्चूर्णयेत् ततः।।

तच्चूर्णानां कषायाणि शरावेषु प्रगृह्य च।

प्र.२२.८८ - ९०

अश्वत्थस्य मधूकस्य खदिरस्य वटस्य च।।

वञ्जुलासनयोश्चापि चित्रवृक्षस्य च त्वचः।
हत्वोलूखलमध्ये च 'उदुत्य'मिति विन्यसेत्।।

------------------------------।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



कषायं परिकल्प्यैव ------------------।।

**अ.२५**

अश्वत्थादि चतुर्वृक्षं खादिरं वञ्जुलासनम्।।

त्वक् चूर्णयोः कषायार्थम् -------------।

**वि.४८.३२५**

अश्वत्थवटमधूकखदिरवञ्जुलासनानां त्वक् चूर्णकषायम्।

**ज्ञा.८७.१६५**

**वा.३५**

मधूकाश्वत्थन्यग्रोधखदिरं चासनैर्युतम्।

वञ्जुलं चेति षट्चूर्णं कषायं चेति कथ्यते।।

## ८.३.७७ कषायोदकस्यालाभे प्रतिनिधिः

**प्र.२२.९०**

उक्तचर्मण्यलाभे तु अश्वत्थस्य विधीयते।

## ८.३.७८ कषायोद्वर्तने फलम्

**प्र.३५.४१८**

उद्वर्तनात् कषायेण चूर्णेनावाप्यते रुचिः।

## ८.३.७९ कषायचूर्णलोपे फलम्

**प्र.३५.५८९**

कषायचूर्णहीने तु कान्तिहीनो भवेन्नरः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



८.३.८० स्नपने तीर्थोदकाहरणम्

स.५०.५४

नद्यां तटाके कूपे च पल्वले तीर्थमाहरेत्।

ज्ञा.८७.१६५ ; प्र.२२.९४ ; य.३४.२० ;

वा.३५ ; वि.४८.३२५ ; अ.२५

खि:२९.४३

नदीतटाकवापीषु पल्वले निर्झरेषु च।

सद्यो गृहीतमुदकं तीर्थोदकमिहोच्यते।।

खि.३०. ११

८.३.८१ स्नपने तीर्थोदकसङ्ग्रहणकालः

वा.३५

एतैस्तीर्थं दिवा ग्राह्यं विपरीतं न कारयेत्।।

निशि स्नानं यदि स्यात्तु जलं ग्राह्याग्निसन्निधौ।

८.३.८२ तीर्थोदस्नापने फलम्

प्र.३५.४१८

तीर्थोदस्नापनेनैव तीर्थयात्राफलं भवेत्।।

८.३.८३ स्नपने वनौषधिचूर्णानि

खि.२९.४४ - ४६

सिंही च नकुली व्याघ्राऽनन्ता चादित्यसाह्वया।

पाठा च सहदेवी च दूर्वा चैव जलाम्बुजम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



अपामार्गा वशा तिक्तं कण्टकारिः कृशा तथा।
कुरुण्डं च मरीचं च सूर्यबोधी च सर्षपम्।।

वनौषधय उक्तास्ताश्चूर्णार्थं तु समाहरेत्।

**खि.३०.१२**

**प्र.२२.९२, ९३**

सिंही च नकुलव्याघ्रनन्दादित्यं च पुष्करम्।
दूर्वा च सहदेवी च पाठा साह्वयमेव च।।

एवं वनौषधीर्गृह्य ---------------------।

**स.५०.५५, ५७**

सिंही च नकुली व्याघ्रानन्ता चादित्यचम्पया।।

पाठा च सहदेवी च दूर्वेत्यौषधयः स्मृताः।
एता वनौषधीश्चापि शरावेषु निधाय च।।

उदानसोमयोर्मध्ये विन्यसेच्च वनौषधीः।

**ज्ञा.८७.१६५**

सिंहीनकुलव्याघ्रनन्दादित्यसहपाठासहदेवीदूर्वा वनौषधीः।

**य.३४.२०, २१ ; वि.४८.३२५**

**अ.२५**

सिंही च नकुली व्याघ्री नतोदीत्यश्च(अनन्तादित्य?) साह्वया।।

पाठा च सहदेवी च दूर्वा चैव वनौषधीः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



**वा.३५**

दूर्वा च सहदेवी च पाठासाह्वयमेव च।।

सिह्मी च नकुली व्याघ्री अनन्तादित्यसंयुतम्।

एतानौषधिसंग्राह्यं नवसङ्ख्या तु संज्ञितम्।।

### ८.३.८४ वनौषधिचूर्णेन स्नापने फलम्

**प्र.३५.४१९**

वनौषधीभिः संस्पर्शात् भवेन्नित्यमरोगता।

### ८.३.८५ वनौषधिलोपे फलम्

**प्र.३५.५८९**

वनौषधीनां चालाभे रोगी भवति निश्चयः।

### ८.३.८६ स्नापने हरिद्राचूर्णम्

**य.३४.२१, २२**

हरिद्राणां च हेमाभं हारिद्रं चूर्णमेव च।।

षड्भागतण्डुलस्यापि चूर्णयुक्तमथाहरेत्।

**ज्ञा.८७.१६५ ; वि.४८.३२५**

**प्र.२२.१००, १०१**

नवस्य स्निग्धवर्णस्य हारिद्रस्य प्रकल्पयेत्।।

चूर्णं तु कलशे क्षिप्त्वा सम्पूर्णं कलशं चरेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



**अ.२५**

अन्ते हारिद्राचूर्णं च स्वर्णचूर्णेन मिश्रितम्।

**खि.२९.४६ ; वा.३५**

### ८.३.८७ हरिद्राचूर्णस्नापने फलम्

**प्र.३५.४१९**

हारिद्रचूर्णस्नानेन प्रीतो भवति चाच्युतः।

### ८.३.८८ हरिद्राचूर्णलोपे फलम्

**प्र.३५.५९०**

हारिद्रचूर्णहीने तु गतश्रीर्जायते नरः।

### ८.३.८९ हरिद्रादीनां चूर्णनप्रकारः

**स.४९.२१ - २६**

प्रमुखे चोत्तरे सम्यगैशान्ये च विशेषतः।
प्रोक्ष्योपलिप्य तत्स्थानमलङ्कृत्य च तत्र वै।।

धूपदीपसमायुक्तो धान्यान्यपि विकल्प्य च।
संस्थाप्योलूखलं शुद्धं मुसलं च सुसंन्यसेत्।।

सोमं चोलूखलेऽभ्यर्च्य मुसले च सुदर्शनम्।
हरिद्राणां सिनीवालीमर्चयेत यथाविधि।।

दासीः सम्पूजयेन्नारीर्जयादीन् मनसा स्मरन्।
ताभिः सञ्चूर्णयित्वैव सुवर्णं तत्र निक्षिपेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



चूर्णयित्वा पुनश्चूर्णं कलशेन समाहरेत्।
मृदं चूर्णं कषायं च सर्वगन्धं तथैव च।।

संशोध्य चूर्णयित्वैव शरावेषु समाहरेत्।

**८.३.९० सर्वगन्धचूर्णस्य लक्षणं प्रमाणं च**

**वा.३५**

हरेणुकं च स्थौणेयं पात्रंव्या घ्रनखा गुरु।।

मरुर्दमनकश्चैव मेरुवालयुतं तथा।
जातीफलं च मांसी च कर्पूलालवङ्गकम् ।।

चन्दनोशीरसंयुक्तं स्थिरनादरसादरम्।
कुस्तुम्बुरादिभिर्द्रव्यैः विंशत्येकोनमुच्यते।।

सर्वगन्धमिति ज्ञेयं प्रमाणमिह उच्यते।
सप्ताष्टपञ्चनिष्कं वा प्रमाणं तत्प्रगृह्य च।।

उत्तमं चाष्टनिष्कं तु मध्यमं सप्तनिष्ककम्।
अधमं पञ्चनिष्कं तु प्रतिद्रव्यं समाहरेत्।।

अथवा त्रयनिष्कं वा न्यूनं चेदाभिचारिकम्।
इति क्रमेण ग्राह्यं तु न ग्राह्यं विपरीतकम्।।

प्राण्यङ्गादि पुरीषादि वर्ज्यमन्यत् प्रगृह्य च।

**प्र.२२.९५ - ९९**

हरेणुकं च स्थौणेयं पत्रं व्याघ्रनखं तथा।।

पर्णागरुं च श्यामाकं कचोरं चेरुवालकम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



मांसीजातिफलैलांश्च लवङ्गं चन्दनं तथा।।

कर्पूरं च बलोशीरस्थिरनारदमेव च ?।
कुस्तुम्बुरुं तथान्यानि सुगन्धीनि शुचीनि च।।

प्राण्यङ्गं च पुरीषं च वर्जयित्वा समाहरेत्।
एतेषामपि यच्चूर्णं सूक्ष्ममुत्पीड्य कल्पितम्।।

सर्वगन्धमिति प्रोक्तम् --------------------।

**ज्ञा.८७.१६५ ; खि.२९.४७, ४८ ; य.३४.२२, २३**

**स.५०.५७ - ५९**

स्थौणेयकं हरेणुं च पत्रव्याघ्रनखागरु।।

षण्णां तु ध्यामकं चोचमेरुवालं च चोरकम्?।
मांसीमपि त्वचं चैलं स्थिरा नारदसादनम्।।

जातीफलं तथा चैव सर्वगन्धार्थमाहरेत्।

**वि.४८.३२५**

हरेणुस्थैणेयकपत्राऽगरुश्यामाककचोरचैरुवालमांसिचन्दनैलालवङ्गकर्पूरोशीर-स्थिरानारदसावनकुस्तुरूणां चूर्णं, सर्वगन्धानां चूर्णम्,

## ८.३.९१ सर्वगन्धमार्जने फलम्

**प्र.३५.४२०**

मार्जनात् सर्वगन्धैश्च श्रीर्भवत्यचला चला।

## ८.३.९२ स्नपने मूलगन्धस्य लक्षणम्

**खि.२९.५०, ५१**

नन्द्यावर्तमपामार्गं पलाशकुशभूस्तृणान्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



तुलसीं करवीरं च बिल्वमामलमालती।
मूलगन्धांस्तु गृह्णीयान्मार्जनार्थं विशेषतः।।

**ज्ञा.८७.१६५**

पलाशदूर्वापामार्गभूर्जकनन्द्यावर्तकरवीरकुशपत्रानिमान् मूलगन्धान्।

**प्र.२२.१०२, १०३ ; वा.३५**

**वि.४८.३२५**

[अत्र पद्मपत्रमधिकतया निर्दिश्यत इति विशेषः।]

**स.५०.६०, ६१**

नन्द्यावर्तमपामार्गं पालाशं च तथैव च।।
करवीरस्य पत्रं च दौर्वाण्यपि समाहरेत्।
एतानि मूलगन्धानि ------------------।।

## ८.६.९३ मूलगन्धेनार्चने फलम्

**प्र.३५.४२०**

मार्जनान्मूलगन्धैश्च कुलमेधेत नित्यशः।।

## ८.६.९४ मूलगन्धलोपे फलम्

**प्र.३५.५९०**

मूलगन्धविहीने तु वार्धक्यं भवति ध्रुवम्।।

## ८.६.९५ प्लोतवस्त्राहरणम्

**प्र.२२.१०४, १०५**

वस्त्रयुगमं नवं सूक्ष्मं कृतं कार्पासतन्तुना।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



प्लोतार्थं तु समाहृत्य शुद्धपात्रे तु निक्षिपेत्।

**खि.२९.५०**

**स.५०.६२**

श्वेतं शुद्धं नवं सूक्ष्मं प्लोतवस्त्रं च धीयते।।

**वि.४८.३२५**

नवं सूक्ष्ममहतं प्लोतम्

**ज्ञा.८७.१६५**

कार्पासकृतं श्वेतं प्लोतवस्त्रम्।

**वा.३५**

कार्पासेन कृतं वस्त्रखण्डं प्लोतार्थमाहरेत्।।

### ८.३.९६ वस्त्रादीनां संग्रहणम्

**खि.२९.५३, ५४**

शुद्धं कौशेयकं वस्त्रं कार्पासं वा समाहरेत्।

चित्रकक्ष्यादिकांश्चैव भूषणानि च शक्तितः।।

अलाभे चोक्तवस्तूनां यथालाभं समाहरेत्।

**वि.४८.३२५**

नवं सूक्ष्ममहतं वस्त्रमुत्तरीयं च सौवर्णाभरणानि मणिमुक्तामयं च यज्ञोपवीतं सौवर्णं तान्तवं वाऽऽहृत्य –

**ज्ञा.८७.१६५**

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



**प्र.२२.१०९**

अहतं च सुसूक्ष्मं च वस्त्रयुग्ममखण्डितम्।
वस्त्रं यज्ञोपवीतं च पवित्रं भूषणादिकम्।।

**वा.३५**

कार्पासेन कृतं ------------------------।।

वस्त्रं यज्ञोपवीतं च पवित्रं भूषणादिकम्।

**य.३४. २४**

पुष्पाण्यन्यानि गन्धानि प्लोतान्याभरणानि च।
अर्चनोक्तं यथामार्गमाहरेन्मतिमान् पुनः।।

**८.३.९७ विहितवस्त्रालाभे कर्तव्यक्रमः**

**य.४६.४०, ४१**

यथोक्तवस्त्रालाभे तु अष्टौ चत्वार एव वा।।

संभृत्य स्नपनं पश्चाद्विधिनैव समाचरेत्।

**८.३.९८ प्लोतवस्त्रोत्तरीयभूषणलोपे फलम्**

**प्र.३५.५९१, ५९२**

प्लोतवस्त्रोत्तरीयाणां भूषणानां विहीनके।।

कर्मनाशो भवेदेव न तुष्यति रमापतिः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



### ८.३.९९ स्नपने धातूनां सङ्ग्रहणम्

**अ.२५**

मनश्शिला हरीतालमञ्जनं श्याममेव च।।

जातिहिङ्गुलकं चैव सौराष्ट्रं रोचनं हरेत्।

एवं ध्यात्वा सुसङ्ग्राह्य यत्नेन च सुसङ्ग्रहेत्।।

**प्र.२२.१०६, १०७**

जातिं हिङ्गुलिकं चैव अञ्जनं च मनश्शिलाम्।।

गोरोचनं च गिरिकम् इति धातून् समाहरेत्।

**ज्ञा.८७.१६५ ; खि.२९.५२ ; य.३४.२५;**

**वा.३५ ; ७९ वि.४८.३२५**

**स.५०.६३, ६४**

जातिहिङ्गुलकं शुद्धमञ्जनं च मनश्शिला।।

गोरोचनं च धातूंस्तान् शरावेषु प्रगृह्य च।

### ८.३.१०० धातुभिः अलङ्कारे फलम्

**प्र.३५.४२१**

धातुभिश्चाप्यलङ्कारात् धातुवृद्धिर्भविष्यति।

### ८.३.१०१ धातुलोपे फलम्

**प्र.३५.५९१**

धातूनामप्यभावे तु निर्धातुर्जायते नरः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



**८.३.१०२ स्नपने प्लोतादीनां सामान्यद्रव्याणामाहरणम्**

**स.४९.१२ - १५**

प्लोतवस्त्रोत्तरीये च धातुराभरणं तथा।
पुष्पमाला च गन्धं च सप्तैतानि तथैव च।।

स्नपनेषु च सर्वेषु सामान्यानि भवन्ति वै।
पुष्पद्रव्याणि धान्यानि गन्धद्रव्याणि चाक्षतान्।।

तन्तुदर्भान् कुशांश्चापि वस्त्राणि च विशेषतः।
धूपद्रव्यं फलं चापि मधु क्षीरं घृतं दधि।।

उक्तानि स्नपनार्थं तु द्रव्याण्यन्यानि चाहरेत्।

**स.५२.७, ८**

प्लोतवस्त्रोत्तरीयाणि धातुराभरणानि च।
पुष्पमाला च गन्धं च नवभेदेषु चैव हि।।

स्नपनेषु च सर्वत्र सामान्यानि भवन्ति वै।

**अ.२५**

प्लोतं शुक्लाम्बरं चैव नानावस्त्रं सुसङ्ग्रहेत्।
शुक्लाम्बरं चोत्तरीयं सौवर्णं चोपवीतकम्।।

नानाभूषणसंयुक्तं नानागन्धसमायुतम्।

**८.३.१०३ स्नपने चतुरङ्गभूषणसङ्ग्रहणम्**

**खि.३०.१९**

धात्वादिकं त्रिकं विद्याद् भूषणं प्रियदर्शनम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



### ८.३.१०४ स्नपने हविरादिसङ्ग्रहणम्

**अ.२५**

पायसं कृसरं गौल्यं यावकं चतुरो हविः।।

अपूपादि निवेद्यैव पानीयेन समायुतम्।
सिद्धार्थकं कुशाग्राणि तिलतण्डुलव्रीहिकम्।।

दधिक्षीराक्षतं तोयम् अर्घ्यमष्टाङ्गमुच्यते।
पूर्वोक्तं च ? मनुद्रव्यं धूपदीपादिद्रव्यकान्।।

द्रव्यन्यासं च कृत्वा तु मुखवासं च सङ्ग्रहेत्।

### ८.३.१०५ हविर्लोपे फलम्

**प्र.३५.५९३**

हीने हविषि देवस्य निष्फलं स्नपनं भवेत्।।

### ८.३.१०६ द्रव्यालाभे प्रतिनिधिः

**नि.३५**

तोयोचितं तु यद्द्रव्यं तज्जलेनैव पूरयेत्।।

अन्येषामप्यलाभे तु तत्तत्प्रतिनिधिं हरेत्।

**खि.३६.१०**

द्रव्यहीने तु तोयं तु द्रव्यप्रतिनिधिं हरेत्।।

**ज्ञा.१०३.१९५**

### ८.३.१०७ कलशाद्याहरणम्

**स.४९. १५ - २०**

पक्वबिम्बफलाकारान् खण्डस्फुटितवर्जितान्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



आढकैः परिपूर्णांश्च कलशानाहरेच्छुभान्।
----------------------------------------।।

कलशानां पिधानार्थं शरावांश्च यथोचितान्।
द्रव्यसङ्ग्रहणार्थं तु शरावांश्च यथोचितान्।।

द्रोणार्धपूर्णान् करकान् द्रोणपूर्णान् घटानपि।
उदधानीं च षड्द्रोणसंपूर्णामपि कारयेत्।।

सम्यग्दग्धान् नवान् सर्वान् पूर्वमेव समाहरेत्।
कलशाश्चाढकैः पूर्णाः ग्राह्यास्तु मनुजैः शुभाः।।

द्रोणार्धपूर्णा ऋषिभिः सङ्ग्राह्याः कलशाः स्मृताः।
द्रोणपूर्णास्तु कलशा देवैर्ग्राह्यास्तथैव च।।

**क्रि.१३. २१, २२ ; य.३४. २६, २७**

**वि.४८.३२५, ३२६**

स्नानार्थान् सम्भारांश्च संभृत्य, आढकपूर्णकलशान् तद्द्विगुणपूर्णकलशान् तद्द्विगुणपूर्णघटान् तत्षड्गुणपूर्णामुदधानीं, प्रस्थपूर्णान् शरावान् कलशानां पिधानानि यथोचितानि अन्यानि भाण्डानि खण्डस्फुटितकालरहितानि नवानि च आहरेत्।

**ज्ञा.८७. १६६**

आढकपूर्णान् कलशान् प्रस्थपूर्णान् शरावान् द्रोणार्धपूर्णान् करकान् द्रोणपूर्णान् घटान् चतुर्द्रोणपूर्णामुदधानीमन्यानि च भाण्डानि खण्डस्फुटितकालरहितानि समाहरेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



**वा.३५**

एवमादीनि सङ्गृह्य मृद्भाण्डादीनि चाहरेत्।।

शरावं प्रस्थसंपूर्णं कुम्भं द्विद्रोणपूर्णकम्।
द्रोणार्धं करकं विद्यात् कलशैरर्धसंयुतम्।।

उदधानीं चतुर्द्रोणपूर्णामपि समाहरेत्।

**खि.२९. ५४ - ५९**

मृदादिद्रव्याण्याहर्तुं प्रतिद्रव्यं पृथक्पृथक्।।

पात्राण्याढकपूर्णान्येवाहरेन्न कृशानि वै।
सुवर्णरौप्यताम्राणि अलाभे मृण्मयानि वा।।

पक्कालर्कफलाकारं कलशं सुमनोहरम्।
सुपक्कं खण्डस्फुटितकृष्णमण्डलवर्जितम्।।

ईदृग्विधं प्रशंसन्ति कुम्भमाढकपूरितम्।
कलशानां पिधानार्थं शरावानपि सम्भरेत्।।

ये वै शरावा अत्रोक्ताः प्रस्थप्रस्थार्धपूरणाः।
षट्प्रस्थमेव करकं कुम्भा वै द्रोणपूरणाः।।
उदधानी तु सङ्ग्राह्या चतुर्द्रोणप्रपूरिता।

**प्र.२२. १७, १८**

शरावाणां प्रमाणं तु कुडुबं समुदाहृतम्।।

षट्प्रस्थमात्रं करकं कुम्भं तु द्रोणमेव च।

**प्र.२३. ५७ - ६०**

एतदाढकपूर्णं तु कलशे दृश्यते पृथक्।।

सौवर्णं राजतं ताम्रं कांस्यं मृण्मयमेव वा।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



द्वादशाङ्गुलविस्तारं षोडशाङ्गुलनाहकम्।।

द्व्यङ्गुलं संभवेत् कण्ठं मुखं पञ्चाङ्गुलं भवेत्।
पक्वबिम्बफलाकारं खण्डस्फुटितवर्जितम्।।

एवं कलशमादाय ---------------------।

**८.३.१०८ स्नपने द्विविधाः कलशाः**

**ज्ञा. १०.१७२**

एतैः प्रधानद्रव्यैः सम्पूर्णाः कलशाः प्रधानाः। तत्प्रधानानन्तरं स्नपनार्थं शुद्धोदकपूर्णाः तथोपस्नानाः।

**८.३.१०९ स्नपनकलशाः वर्ज्याः**

**स.४९. १६**

भिन्नान् जीर्णानपक्वांश्च सकालानपि वर्जयेत्।।

**८.३.११० स्नपनकलशेषु उत्तमादित्रैविध्यम् उपादानद्रव्यानुरोधेन**

**अ.२५**

सौवर्णं चोत्तमं विद्यात् मध्यमं राजतं भवेत्।।

ताम्रजं चाधमं विद्यात् त्रिविधं च समाहरेत्।
एवं कर्तुमशक्तश्चेत् मृण्मयं कलशं भवेत्।।

**८.३.१११ स्नपनकलशेषु उत्तमादित्रैविध्यं प्रमाणानुरोधेन**

**अ.२५**

आढकं चोत्तमं विद्यात् मध्यमं तु तदर्धकम्।।

अधमं प्रस्थमेकं तु त्रिविधं कलशं भवेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



## ८.३.११२ लोहजकलशशोधनम्

**अ.२५**

लोहजं कलशं चैव आम्लेन परिशोधयेत्।।

## ८.३.११३ मृन्मयकलशशोधनम्

**अ.२५**

मृण्मयं कलशं स्याच्चेत् गायत्र्या च सुशोधयेत्।।

## ८.३.११४ प्रधानकलशलक्षणम्

**स.४९. ४६, ४७**

प्रधानैः पञ्चगव्याद्यैर्द्रव्यैर्द्वादशभिः क्रमात्।।

संपूर्णाः कलशाः सर्वे प्रधानकलशाः स्मृताः।

**ज्ञा.९०.१८२**

## ८.३.११५ उत्तमादित्रिविधस्नपने प्रधानकलशसङ्ख्या

**स.४९. ४८ - ५०**

पञ्चगव्यादिभिर्द्रव्यैः पूरयित्वा पृथक् पृथक्।।

चतुरश्चतुरश्चैव प्रधानान् कलशान् क्रमात्।
द्वौ द्वौ वाप्यथवैकैकमाहरेत स्वशक्तितः।।

उत्तमं मध्यमं चेति कनिष्ठं त्रिविधं स्मृतम्।

## ८.३.११६ उपस्नानकलशाः

**स.४९.४७, ४८**

शुद्धोदकैः सुगन्धैश्च संपूर्णाः कलशाश्च ये।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



ते तु प्रधानोपस्नानादुपस्नाना इतीरिताः।

**ज्ञा.९०. पृ.१५२**

**वि.४८. ३२५, ३२७**

एतद्द्वादशप्रधानद्रव्यसमीपे शुद्धोदकपूर्णान् कलशान् उपस्नानान्-----
गृह्णीयात्। गन्धोदकैरुपस्नानकलशानापूर्य ---------------

**८.३.११७ उत्तमादित्रिविधस्नपने उपस्नानकलशसङ्ख्या**

**स.४९.५०, ५१**

उपस्नानांश्च कलशांश्चतुरश्चतुरोऽथवा।।

षट्षट् च सप्तसप्ताथ कलशान् वाहरेत् तथा।

**८.३.११८ स्नपनकलशसङ्ख्या**

**स.४९. ५२ - ५५**

प्रधानद्रव्यसंपूर्णाः प्रधानकलशास्तु ते।।

पञ्चगव्यादिकलशा उपस्नानसमन्विताः।
अष्टावष्टाविति प्रोक्ताः सर्वे चापि पृथक् पृथक्।।

हरिद्राचूर्णसंपूर्णाः कलशाश्च तथैव च।
उपस्नानयुताः सम्यगष्टौ तु कलशाः स्मृताः।।

नद्यादिजलसंपूर्णाश्चत्वारः कलशास्तथा।
अष्टोत्तरशतं प्रोक्तं कलशानां तु सङ्ख्यया।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



**८.३.११९ स्नपने कलशसंस्कारः**

**वि.४८. ३२७, ३२८**

धान्यवेदिं गायत्र्या प्रोक्ष्य, 'सुमित्रा न' (तै.आ.४) इति पङ्क्तिस्थलमुल्लिख्य, 'हिरण्यपाणि'मिति प्रागग्रानुत्तराग्रान् वा दर्भानास्तीर्य, कलशानाहृत्य त्रिगुणैकेन वा सूत्रेण यवान्तरमङ्गुल्यन्तरं वा परिवेष्ट्य, अद्भिः प्रक्षाल्य, ------------सप्तभिः पञ्चभिस्त्रिभिर्वा दर्भैः कूर्चान् कृत्वा, कलशेषु प्रक्षिप्य, पिधानैरपिधाय, सोपस्नानान् द्वादशप्रधानान् द्वादशवस्त्रैरावेष्टयेत् - उत्तमम्। अष्टवस्त्रैरावेष्टयेत्- मध्यमम्। चतुर्वस्त्रैरावेष्टयेदधमम्।

**ज्ञा.८७. पृ.१६७**

कलशानाहृत्य यवान्तरमङ्गुल्यन्तरं वा तन्तुना परिवेष्ट्य अद्भिः प्रक्षाल्य यथोक्तैः पञ्चगव्यादिद्रव्यैः कलशान् संपूर्य तान् पिधानाद्यैरपिदधाति। तत्पङ्क्त्यां यथोक्ते स्थाने मृदादिद्रव्याणि संन्यसेत्।

**स.४९. ५१, ५२**

**८.३.१२० स्नपने कलशादिसंस्कारः**

**वा.३५**

प्रोक्षयित्वा तु तत्पङ्क्तिं गायत्रीं च समुच्चरन्।।
'सुमित्रा ने'ति मन्त्रेण स्थलं चोल्लेखयेद्बुधः।
दर्भानास्तीर्य मन्त्रेण 'हिरण्यपाणि'मिति ब्रुवन्।।
-----------------------------------------
कलशादीनि चादाय प्रक्षाल्यैव च बुद्धिमान्।
तन्तुना परिवेष्ट्यैव प्रादक्षिण्यक्रमेण वै।।
यवान्तरं तु संवेष्ट्य चाङ्गुल्यन्तरमेव वा।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



द्रव्यं यथोक्तैः संपूर्य कलशं प्रति कारयेत्।।

धान्यस्योपरि संस्थाप्य प्रतिद्रव्यं समाचरेत्।

**स.४९. ५१, ५२**

तन्तुना कलशान् सर्वान् वेष्टयेच्च यवान्तरम्।।

अथाङ्गुल्यन्तरं वापि कलशान् परिवेष्टयेत्।

**खि.२९.५९, ६०**

'देवस्य त्वे'ति मन्त्रेण कलशादीन् प्रगृह्य च।।

एकाङ्गुलान्तरं विद्वांस्तन्तुना परिवेष्टयेत्।

**प्र.२२. १५ - १९**

तण्डुलैर्व्रीहिभिश्चैव सतिलैश्च त्रिवेदिकम्।
व्रीह्यर्धं तण्डुलं प्रोक्तं तदर्धं च तिलानपि।।

उत्तमं द्रोणमित्युक्तं मध्यमं तु तदर्धकम्।
अधमं चाढकं चैव पङ्क्तिं कुर्यात् विचक्षणः।।

सम्यक् दग्ध्वा तु कलशान् अभिन्नान् संप्रगृह्य च।

---

'देवस्यत्वे'ति कलशान् कुम्भादीन् संप्रगृह्य च।।

यवान्तरं तु तन्तूनां संवेष्ट्य कलशानपि।

## ८.३.१२१ स्नपने कलशन्यासः

**ज्ञा.९०. पृ.१७३**

कलशानां न्यासो यावत् तावद्विस्तारायतां पङ्क्तिं तथैव परितः कु न्।
शताष्टकद्वयाधिके द्वे तिस्रो वा पङ्क्तीः तथैव परितः कुर्यात् इत्ये क।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



तत्तत्पङ्क्तौ [1]पूर्ववद्यथोक्तस्थाने संन्यस्य मृदादिद्रव्याणि तत्क्रमेणादाय [2]तत्तन्मन्त्रैः स्नापयेत्।

## ८.३.१२२ स्नपने कलशार्चनम्

**अ.२५**

शयनस्योद्धृतं देवं श्वभ्रमध्ये स्थितं चरेत्।।

कलशन्यासं कृत्वा तु कृत्वाक्षतसमन्वितम्।
पल्लवं तु शरावाणां पल्लवद्वारविन्यसेत्।।

वस्त्रेण वेष्टयित्वा तु कलशानां पृथक् पृथक्।
द्रव्यं प्रति सुवेष्ट्यैवमेकैकमथवा पुनः।।

पङ्क्तीशं शेषिकं (शै?) चार्च्य कलशानां समर्चयेत्।
चतुर्मूर्तीश्च मन्त्रैश्च द्रव्यस्यैवाधिदैवतम्।।

चतुर्मूर्त्याऽत्र पूजायां स्खलनं भवति ध्रुवम्।
एकमूर्त्या चरेत् तस्मात् देवान् सर्वान् पृथक् पृथक्।।

## ८.३.१२३ स्नपने करकसङ्ख्या

**स.५१. २२**

प्रोक्षणार्थं जलेनैव करकौ द्वौ प्रपूर्य च।
श्वभ्रस्य दक्षिणे चैकं वामे चैकं च संन्यसेत्।।

1. स्थापनोक्तप्रकारेण।
2. स्नपन उक्तैः मन्त्रैः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



## ८.३.१२४ चषकादिपात्रकल्पनम्

**वा.३५**

सुवर्णेन कृतं सर्वं राजतं ताम्रमेव वा।।

पित्तलैर्लोहमिश्रं तु कृत्वा पात्रं तु सुन्दरम्।
चषकं च हविःपात्रं दर्पणं चार्घ्यपात्रकम्।
कांस्यलोहेन ताम्रेण सर्वपात्राणि चाहरेत्।।

## ८.३.१२५ सप्तविधा दर्भाः

**क्रि.१३. २४, २५**

कुशाः काशास्तथोशीरा दूर्वा वै व्रीहयस्तथा।।

विश्वामित्रा यवाश्चापि सप्त दर्भाः प्रकीर्तिताः।

## ८.३.१२६ कूर्चकल्पनम्

**खि.२९.६० - ६४**

सप्तविंशतिदर्भैस्तु कुर्यात् प्रोक्षणकूर्चकम्।।

वेदः षडङ्गुलायामो मार्जनार्थं विधीयते।
दर्भैस्तु पञ्चदशभिः नवभिर्वाथ सप्तभिः।।

दक्षिणावर्तकग्रन्थीन् कूर्चान् कुर्वीत यत्नतः।
ग्रन्थ्यधस्ताद्धस्तमात्रान् दक्षिणावर्तकान् क्रमात्।।

कलशप्रोक्षणायैव कुशान् वापि समाहरेत्।
परिस्तरणकूर्चांश्च अग्निकुण्डे यथा तथा।।

द्वादशाङ्गुलमानेन कलशादिषु कूर्चकाः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



**क्रि.१३. २२ - २४**

साग्रैरगर्भदर्भैश्च पञ्चभिर्दशभिर्युतान्।।

षट्त्रिंशदङ्गुलायामान् परिस्तरणकूर्चकान्।
कलशार्थान् प्रकुर्वीत द्वादशाङ्गुलसंमितान्।।

नवभिः सप्तभिर्वाथ पञ्चभिस्त्रिभिरेव वा।

**प्र.२२. १३, १४**

हस्तमात्रं तथायामं प्रोक्षणार्थं तु कूर्चकम्।
मार्जनार्थं तु कूर्चं च षडङ्गुलमिति स्मृतम्।।

पञ्चभिर्वा त्रिभिर्वाथ द्वादशाङ्गुलमायतम्।
कलशार्थं तु कुर्वीत यथा कलशसङ्ख्यया।।

**वा.३५**

परिस्तरणकूर्चार्थं दश पञ्चोत्तरं पुनः।

**ज्ञा.८७ पृ.१६६**

वेदिपरिस्तरणार्थान् पञ्चदशदर्भैः कलशार्थान् सप्तभिः पञ्चभिर्वा कूर्चान् कुर्यात्।

***

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

# ४. स्नपनद्रव्यन्यासः

## ८.४.१ स्नपनद्रव्यन्यासः

### वि.४९. ३३० - ३३४

अभिमुखे दक्षिणे वा आसीनः तद्बिम्बार्हं तिष्ठन् वा, देवमानम्य, प्राणायामं कृत्वा, ईशानेन्द्रयोर्मध्ये नादेयाद्या मृद एकस्मिन् पात्रे गृहीत्वा 'उदुत्य'मिति संन्यस्य ------------- इन्द्रादीशानपर्यन्तं द्वारवामपार्श्वेषु अष्टकोणेषु च 'इदं विष्णु'रिति हिमवदादीन् पर्वतान् संन्यस्य, ------------- यमपावकयोर्मध्ये 'शुक्रं त' इति शाल्यादीनि धान्यानि एकस्मिन् पात्रे सङ्गृह्य संन्यसेत्। ---- ---------- यमनीलयोर्मध्ये अभ्यन्तरे 'सोम ओषधीना' (वै.म.प्र.९)मिति अङ्कुरान् संन्यस्य ------------- द्वारदक्षिणपार्श्वेषु, कोणेषु च 'शंसानी' (वै.म.प्र.६)ति श्रीवत्सादीन् मङ्गलान् संन्यस्य ------------- ऐशान्यां सोपस्नानं पञ्चगव्यं 'त्र्यम्बक' (वै.म.प्र.३) मिति[1] ------------पूर्वद्वारोत्तरपदे घृतं 'घृतप्रतीक' (वै.म.प्र.१) इति संन्यस्य ------------- पूर्वद्वारदक्षिणे 'यन्मधुन' (वै.म.प्र.३)इति मधु संन्यस्य ------------- आग्नेय्यां 'दधिक्राव्णे'ति दधि संन्यस्य ----------- दक्षिणद्वारपूर्वे 'शंनो देवी' रिति क्षीरं संन्यस्य ------- ------- दक्षिणद्वारपश्चिमे 'सोमं राजान'मिति गन्धोदकं विन्यस्य,---------- नैऋत्यां 'इमा ओषधय' इति अक्षतोदकं संन्यस्य ------------------- पश्चिमद्वारदक्षिणे 'सोमं राजान'मिति फलोदकं संन्यस्य, ------------- पश्चिमद्वारोत्तरे 'यतस्त्वमासा'दिति कुशोदकं संन्यस्य ------------- वायव्यां

1. संन्यस्य इति अनुवर्तते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



'अतो देवा' इति रत्नोदकं संन्यस्य --------------उत्तरद्वारपश्चिमे 'ब्रह्मा देवाना'मिति जप्योदकं संन्यस्य ------------- उत्तरद्वारपूर्वे 'चित्रं देवाना'मिति सर्वौषध्युदकं संन्यस्य ------------- यमनीलयोरन्तरे 'इमाः सुमनस' इति पुण्यपुष्पाण्येकस्मिन् पात्रे सङ्गृह्य, विन्यस्य,------------ वरुणोदानयोरन्तरे 'एते शत'मिति अश्वत्थादि कषायचूर्णं 'वारीश्चतस्र' इति नादेयादितीर्थतोयं च विन्यस्य ------------- सोमोदानयोर्मध्ये 'रुद्रमन्य'मिति सिंहयादि ------वनौषधीर्विन्यस्य ------------- नीलपङ्क्तीशयोः मध्ये 'सिनीवाली'ति हरिद्राचूर्णं संन्यस्य ------------- 'इमे गन्धा' इति ईशसोमयोर्मध्ये हरेणुपूर्वं सर्वगन्धचूर्णं संन्यस्य ------------------ 'नारायणाय विद्महे' इति ऐशान्यां प्लोतवस्त्रोत्तरीयाभरणयज्ञोपवीतं शान्तस्य पश्चिमे पालाशादिमूलगन्धान् तस्य पूर्वे जातिहिङ्गुलिकादिधातूंश्च संन्यस्य

**ज्ञा.८७.१६७**

नादेयाद्यष्टौ मृदः शरावेषु पृथक् चेत् पृथक् गृहीत्वा 'उदुत्यं चित्र' मितीशानेन्द्रयोर्मध्ये सुसंन्यस्य, द्वारेषु वामपार्श्वे कोणेषु च 'इदं विष्णु'रिति हिमवत्पूर्वान्, यमाग्नयोर्मध्ये 'सोम ओषधीना' मित्यङ्कुरान्, ऐन्द्राद्यैशानान्तं द्वारदक्षिणपार्श्वेषु कोणेषु च श्रीवत्सादीन् मङ्गलांश्च तत्तत्स्थाने तथैव 'इन्द्रा विष्णू' इति द्वादश प्रधानान् कलशान्, ऐशान्ये पञ्चगव्यमीशानेन्द्रयोर्मध्ये घृतमग्नीन्द्रयोर्मध्ये मधु पावके दधि यमाग्नयोर्मध्ये क्षीरं यमनैऋतयोर्मध्ये गन्धोदकं नैऋत्यामक्षतोदकं निऋतिवरुणयोर्मध्ये फलोदकं वरुणवाय्वोरन्तरे कुशोदकं वायव्ये रत्नोदकंवायुसोमयोर्मध्ये जप्योदकं सोमेशानयोर्मध्ये सर्वौषध्युदकं तेषां वामपार्श्वे 'स्वादिष्ठये'ति तत्तदुपस्नानार्थ कलशान् 'इमाः सुमनस' इति यमनीलयोर्मध्ये बिल्वपत्रादिपुण्यपुष्पाणि, वारुणनैऋतयोर्मध्ये 'वन्ध्यान एष' इति जातीफलादिचूर्णं, वरुणोदानयोर्मध्ये 'येते शत' मित्यश्वत्थादिकषायचूर्णं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



'वारीश्चतस्र' इति नादेयादितीर्थतोयं सोमोदानयोर्मध्ये 'रुद्रमन्य'मिति सिंह्यादिवनौषधीः नीलपङ्क्तीशयोर्मध्ये 'सिनीवाली'ति हारिद्रचूर्णं 'इमे गन्धा' इतीशानसोमयोर्मध्ये हरेणुपूर्वं सर्वगन्धं 'नारायणाय विद्महे' इत्यैशान्ये प्लोत-वस्त्रोत्तरीयाभरणयज्ञोपवीतानि पलाशादिमूलगन्धान् जातिहिङ्गुलिकादिधातूंश्च संन्यसेत्। प्रणवपूर्वया गायत्र्यैव मृदादिसर्वद्रव्याणां न्यासं केचित् कुर्वन्ति। सर्वाण्येतानि नवैः वस्त्रैः प्रच्छाद्य श्वभ्रस्य द्वितीयवेद्यां प्रागाद्यैशानान्तं जयाद्यप्सरसोऽर्चयेत्।

## य.३४. ५४ - ७४

पङ्क्तिं गायत्रिया प्रोक्ष्य 'सुमित्राने'ति मन्त्रतः।
समुल्लिख्य 'हिरण्ये'ति दर्भानत्र समास्तरेत्।।

'धारास्वि'ति च मन्त्रेण गृहीत्वैवोदकं तथा।
वस्त्रेणोत्पवनं कृत्वा रात्रौ चेदग्निसंनिधौ।।

सङ्गृह्य कलशान् पश्चात् तन्तुनाऽऽवेष्ट्य मङ्गलम्।
अद्भिः प्रक्षाल्य पूर्वोक्तद्रव्यैरपि सुपूरयेत्।।

स्थाने यथोक्तं तत्पङ्क्त्यां मृदादीन् संन्यसेत् क्रमात्।
मृदोऽष्टौ तत्पृथक्पात्रे गृह्णी'त्वोदुत्य'मित्यपि।।

संन्यस्येन्द्रेशयोर्मध्ये द्वाराणां वामपार्श्वके।
कोणेषु विष्णुसूक्तेन अद्रीन् प्रागादि संन्यसेत्।।

यमाग्न्योरन्तरे न्यस्य 'शुक्रन्त' इति मन्त्रतः।
शाल्यादीनि च धान्यानि मध्ये वै यमनीलयोः।।

अङ्कुरान् 'सोम ओषधी'ति इन्द्रादिद्वारदक्षिणे।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



विदिशासु च 'शंसानि' श्रीवत्साद्यष्टमङ्गलान्।।

संन्यसेत् पञ्चगव्यादी'निदं विष्णु'रिति ब्रुवन्।
ईशाने पञ्चगव्यं तद्धृतमीशेन्द्रयोरपि।।

मधु चेन्द्राग्निमध्ये तु संन्यसेत् पावके दधि।
यमाग्न्योरन्तरे क्षीरं याम्यनैरृतयोरपि।।
गन्धोदकं च नैरृत्याम् अक्षतोदकमेव च।
नीलवारुणयोर्मध्ये संन्यसेद्वै फलोदकम्।।

वरुणोदानयोर्मध्यें कुशतोयं तथा न्यसेत्।
वायव्यां रत्नतोयं च सोमवाय्वोश्च मध्यमे।।

जप्योदकं तथा मध्ये कुबेरेशानयोरपि।
सर्वौषध्युदकं पश्चादेतेषां वामपार्श्वतः।।

'स्वादिष्ठये'ति मन्त्रेण उपस्नानान् न्यसेत् क्रमात्।
'इमाः सुमनस' इत्युक्त्वा यमनीलेशमध्यमे।।

पुण्यपुष्पाणि बिल्वादि संन्यसेन्मन्त्रवित्तमः।
जातीफलादिचूर्णं च वरुणनैरृतमध्यमे।।

'वन्ध्यो न एष' इत्युक्त्वा संन्यसेदधिपान् स्मरन्।
वरुणोदानयोर्मध्ये वारुणेनैव मन्त्रतः।।

कषायचूर्णं क्रमशस्तीर्थतोयं च संन्यसेत्।
'वारीश्चतस्र' इत्युक्त्वा वायुसोमेशमध्यमे।।

'रुद्रमन्ये'ति मन्त्रेण संन्यसेद्वै वनौषधीः।
नीलपङ्क्तीशयोर्मध्ये पश्चाद्धारिद्रचूर्णकम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



'सिनीवाली'ति मन्त्रेण 'इमे गन्धे'ति मन्त्रतः।
ईशानसोमयोर्मध्ये सर्वगन्धं हरेणुकम्।।

प्लोतवस्त्रोत्तरीयाणि 'तत्पुरुषाये'ति मन्त्रतः।
ऐशान्ये संन्यसेद्धीमान् मृदादीन् क्रमशः सुधीः।।

केचिद्द्रव्याणि संन्यस्य मृदादीनि विशेषतः।
मन्त्राणां स्खलने विद्वान् प्रणवेन तपोधनाः।।

नववस्त्रैः समाच्छाद्य सर्वाण्येतानि मन्त्रवित्।

**वा.३५**

पङ्क्तौ यथोक्तस्थाने तु न्यसेद्द्रव्यं मृदादिकम्।
ईशानस्य हरेर्मध्ये मृदादीनष्ट संन्यसेत्।।

पृथक् शरावे संन्यस्य 'उदुत्यं चित्र' मुच्चरन्।
द्वारस्य वामकोणे तु 'इदं विष्णु'रिति ब्रुवन्।।

हिमवत्पर्वतादीनि न्यसित्वा देशिकोत्तमः।
इन्द्रपावकयोर्मध्ये 'शुक्रं ते' ति समुच्चरन्।।

शालिधान्यादि यमानिलयोर्मध्यमेतथा।
अङ्कुरं चात्र संन्यस्य 'सोम ओषधि'मुच्चरन् ।।

इन्द्रादीशानकोणेषु द्वारदक्षिणकोणके।
मङ्गलं च सुसंन्यस्य श्रीवत्सादीन् यथाक्रमम्।।

'शंसा नियच्छ' इत्युक्त्वा तेन कर्म समाचरेत्।
इन्द्रादीनि तथा स्थाप्य 'इदं विष्णु'रिति ब्रुवन्।।

प्रधानैर्द्वादश स्थाप्य ऐशान्यादीनि कारयेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



तत्कोणे पञ्चगव्यं तु उपस्नानयुतं न्यसेत्।।

प्रधानस्यैकमुद्दिष्टम् उपस्नानं पृथक् पृथक्।
तत्प्रधानस्य परितः उपस्नानं तु सप्तकम्।।

एवं प्रतिपदं न्यस्य पञ्चगव्यादिषु न्यसेत्।
प्रादक्षिण्यक्रमेणैव सोमेशानान्तमुच्चरन्।।

एवं षण्णवति स्थाप्यमन्यच्चैव ऋतुद्वयम्।
चतुर्हारिद्रचूर्णार्थम् अन्यत् तीर्थोदकं स्मृतम्।।

'स्वादिष्ठये'ति मन्त्रेण उपस्नानेषु संन्यसेत्।
अथवा तस्य वामे तु न्यसित्वा मन्त्रपारगः।।

'इमाः सुमनसे'त्युक्त्वा यमनैऋतमध्यमे।
पुण्यपुष्पाणि निक्षिप्य स्थापयित्वा विचक्षणः।।

नीलवारुणयोर्मध्ये सिंह्याद्यादिवनौषधीः।
चूर्णं जातीफलं तस्य ----------------।।

'वन्द्यो न एषे'त्युच्चार्य एतद्द्रव्यं न्यसेद्बुधः।
वरुणोदानयार्मध्ये 'ये ते शत'मिति ब्रुवन्।।

त्वक्चूर्णमश्वत्थादीनां स्थापयित्वा ततः परम्।
तीर्थतोयं च संन्यस्य वारीश्चतस्रमुच्चरन्।।

सोमोदानयोर्मध्ये सिंह्याद्यादि वनौषधीः।
'रुद्रमन्ये'ति मन्त्रेण तेन द्रव्यं च संन्यसेत्।।

नीलपङ्क्तीशयोर्मध्ये 'सिनीवाली'ति चोच्चरन्।
हारिद्रचूर्णं संस्थाप्य सोमेशानस्य मध्यमे।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



हरेणुकं सर्वगन्धं 'इमे गन्धे' ति कारयेत्।
'तत्पुरुषाये' ति मन्त्रेण ऐशान्येऽत्र विशेषतः।।

भूषणैर्यज्ञसूत्रं तु प्लोतवस्त्रोत्तरीयकम्।
मूलगन्धं पलाशाद्यैः उक्तधातून् न्यसेत् क्रमात्।।

विष्णुगायत्रिमुच्चार्य प्रणवं वा समुच्चरन्।
मृदादीनि च संस्थाप्य अष्टोत्तरशतं क्रमात्।।

प्रच्छाद्य च नवैर्वस्त्रैः द्रव्यं प्रति समाचरेत्।

**स.४९.४५, ४६**

तत्पङ्क्तौ[1] तु मृदादीनि सर्वद्रव्याणि विन्यसेत्।
तथा पङ्क्तिबहुत्वेऽपि कलशेषु बहुष्वपि।।

तत्तत्स्थाने यथोक्ते वा तत्तद्द्रव्याणि विन्यसेत्।

**स.४९. ५६, ५७**

दिवैव शुद्धपात्रे च गृह्णीयादुदकं शुभम्।
'धारास्वि' ति च सङ्गृह्य वस्त्रेणोत्पवनं चरेत्।।

'इदमापः शिवे' त्युक्त्वा जलं तदभिमन्त्रयेत्।
रात्रौ जलं न गृह्णीयात् गृह्णीयादग्निसंनिधौ।।

**स.५०.१, २, ५, ६**

पङ्क्तीशं शैषिकं चापि पङ्क्तौ पीठे समर्चयेत्।
अर्घ्यान्तमर्चयित्वा तु पङ्क्तौ दर्भान् विकीर्य च।।

मृदादिद्रव्यसंयुक्तान् कलशान् विन्यसत् क्रमात्।

---

1. स्नपनालये श्वभ्रे कल्पितपङ्क्तौ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



'नारायणाय विद्म'ेति [1] सर्वान् सम्पूरयेद् बुधः।।

------------------------------------------ ।

ऐशान्यादि मृदोऽष्टौ च सौम्यान्तं संन्यसेत् क्रमात्।।

मृदादिसर्वद्रव्याणि गायत्रीं वैष्णवीं वदन्।
तत्तत् स्थाने यथोक्ते च विन्यसेत् तान्यसङ्करम्।।

**स.५०. १०**

ऐन्द्रादि च तथैशान्तं पङ्क्तिं बाह्ये तु [2]विन्यसेत्।

**स.५०. १२**

धान्यानि प्रस्थमात्राणि शरावेषु प्रपूर्य च।
आग्नेयादि च याम्यान्तं धान्यान्येतानि विन्यसेत्।।

**स.५०. १४, १५**

अङ्कुरार्पणकाले तु स्नपनार्थाङ्कुरानपि।
अर्पयित्वा च पूर्वोक्तान् शरावेषु निधाय च।।

यमनैऋतयोर्मध्ये विन्यसेदङ्कुरांस्तथा।

**स.५०. २० - २३**

प्राग्द्वारे दक्षिणे भागे श्रीवत्सं संन्यसेद्बुधः।।

आग्नेय्यां पूर्णकुम्भं तु दक्षिणे द्वारपश्चिमे।
भेरीं तु नैऋते देशे दर्पणं संन्यसेद्बुधः।।

1. पर्वतान् इति शेषः। 2. पर्वतानिति शेषः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



उत्तरे पश्चिमद्वारान्मत्स्ययुग्मं च संन्यसेत्।
वायव्ये चाङ्कुशं न्यस्य चोत्तरद्वारपूर्वतः।।

शङ्खं संन्यस्य चावर्तमैशान्यां दिशि विन्यसेत्।

**स.५०. २५**

ऐशान्यां पञ्चगव्यैश्च सम्पूर्णान् कलशान् न्यसेत्।।

**स.५०. २६**

घृतसम्पूर्णकलशान् न्यसेदैन्द्रस्य चोत्तरे।

**स.५०. २८**

मधुसम्पूर्णकलशानैन्द्राग्न्योर्मध्यमे न्यसेत्।।

**स.५०. २९, ३०, ३१**

दधिसम्पूर्णकलशानाग्नेय्यां स्थापयेद्बुधः।।

-------------------------------------

कलशान् क्षीरसम्पूर्णान् यमाग्न्योर्मध्यमे न्यसेत्।।

-------------------------------------

यमनैर्ऋतयोर्मध्ये न्यसेद्गन्धोदकं पुनः।।

**स.५०. ३३**

अक्षतोदकसम्पूर्णान् नैर्ऋत्यां कलशान् न्यसेत्।।

**स.५०. ३६**

नीलवारुणयोर्मध्ये संन्यसेत् तु फलोदकम्।

**स.५०. ३७**

वरुणोदानयोर्मध्ये कुशोदकलशान् न्यसेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



**स.५०. ४०, ४२**

रत्नोदकैश्च सम्पूर्णान् वायव्ये कलशान् न्यसेत्।।

---

तान् सोमोदानयोर्मध्ये जप्योदकलशान् न्यसेत्।

**स.५०. ४३ - ४५**

ईशानंसोमयोर्मध्ये सर्वौषध्युदकं न्यसेत्।।

उपस्नानांश्च कलशान् तेषां वामान्तरे न्यसेत्।
सर्वेषु कलशेष्वेव कुशं कूर्चं तु वा क्षिपेत्।।

पिधानैश्च शरावैस्तान् सर्वानेव पिधाय च।
'ऋतं सत्ये'ति मन्त्रेण कलशानभिमन्त्रयेत्।।

**स.५०. ४७, ४८**

एतान्यपि शरावेषु सम्यगेव प्रगृह्य च।।

यमनैऋतयोर्मध्ये पुण्यपुष्पाणि विन्यसेत्।

**स.५०. ४९ - ५१**

चूर्णयित्वा तु [1]सर्वान् वै शरावेषु प्रपूरयेत्।।
नीलवारुणयोर्मध्ये तांश्च चूर्णान् सुविन्यसेत्।
हारिद्रचूर्णैः सम्पूर्णान् कलशानपि तत्र वै।।

तदुपस्नानकलशैः संयुक्तांश्च सुविन्यसेत्।

1. श्रीवेष्टकादीन्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



**स.५०. ५३ - ५५**

वरुणोदानयोर्मध्ये तत् कषायाणि विन्यसेत्।।

------------------------------------

तीर्थोदकैश्च चतुरः कलशानपि पूरयेत्।।

[1]तत्रैव तीर्थकलशान् कषायैः सह विन्यसेत्।

**स.५०. ५६, ५७, ५९, ६०**

एता वनौषधीश्चापि शरावेषु निधाय च।।

उदानसोमयोर्मध्ये विन्यसेच्च वनौषधीः।

------------------------------------

[2]एतांश्च चूर्णयित्वैव शरावेषु प्रपूर्य च।।

कुबेरैशानयोर्मध्ये सर्वगन्धं च विन्यसेत्।

**स.५०. ६१, ६२, ६३**

एतानि मूलगन्धानि शरावेषु प्रगृह्य च।।

शान्तस्य पश्चिमे भागे स्पर्शनार्थानि विन्यसेत्।

------------------------------------

मूलगन्धस्य पार्श्वे तु प्लोतवस्त्रं तु विन्यसेत्।

**स.५०. ६४ - ६८**

------------- धातूंस्तान् शरावेषु प्रगृह्य च।

शान्तस्य पूर्वभागे च तस्य पङ्क्त्यां सुविन्यसेत्।।

1. वरुणोदानयोर्मध्ये स्नानपीठे। 2. सर्वगन्धान्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



स्थाने यथोक्तद्रव्याणि मन्त्रेणोक्तेन वै पृथक्।
मृदादीनि न्यसेदेवं सावित्र्या वाऽथवा पुनः।।

षट्त्रिंशदङ्गुलैः कूर्चैः श्वभ्रे वापि चतुर्दिशम्।
प्रागग्रमुत्तराग्रं च प्रागाद्यं चोत्तरान्तकम्।।

अधोवेद्यां परिस्तीर्य चोर्ध्ववेद्यां ततः परम्।
प्रागाद्यं च तथैशान्तं जयादीरपि चार्चयेत्।।

जयां च विजयां विन्दां पुष्टिकां नन्दकामपि।
कुमुद्वतीमुत्पलिकां विशोकां चापि पूजयेत्।।

**प्र.२२. २८, २९**

शरावेषु मृदं चैव पूरयित्वा पृथक् पृथक्।
इन्द्रादीशानपर्यन्तं प्रदक्षिणवशेन तु।।

'उदुत्य'मिति मन्त्रेण प्रथमं संन्यसेन् मृदः।
मृदुपस्नानमेकं तु ऐशान्यां विन्यसेत् तदा।।

**प्र.२२.३४, ३५**

प्रागादीशान्तमेतांश्च 'इदं विष्णु'रिति न्यसेत्।।

शैलानां चाप्युपस्नानम् एकमीशान्यगोचरम्।

**प्र.२२. ३७ - ४१**

------------------- शरावेषु पृथक् पृथक्।
प्रक्षिप्य तांश्च सम्पूर्णान् क्रमात् द्वौ द्वौ न्यसेत् तथा।।

इन्द्रादीशानपर्यन्तं 'शुक्रं त' इति मन्त्रतः।
न्यसेदेकमुपस्नानं धान्यानामग्निदिश्यपि।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



शरावाणामलाभे तु कलशेषु पृथक् पृथक्।
'सोम ओषधीना'मुच्चार्य पूर्ववच्चाङ्कुरानपि।।

यमनीलान्तरे चापि शरावे तु सुविन्यसेत्।
अङ्कुराणामुपस्नानमेकमत्रैव विन्यसेत्।।

पर्वतार्थं समं प्रोक्तवृक्षैर्यत्नेन वा मृदा।

## प्र.२२.४७ - ४९

प्रदक्षिणक्रमेणैव चैन्द्रादीशान्तमर्चयेत्।।

दिक्ष्वष्टसु महादिक्षु तत्तद्द्वारस्य दक्षिणे।
'शंसा नियच्छत्वि'त्युक्त्वा मङ्गलान्यत्र विन्यसेत्।।

मङ्गलानामुपस्नानम् ऐन्द्राद्ये चैकमेव हि।
एवं प्रकरणं प्रोक्तं कलशानां ---------।।

## प्र.२२. ६० - ६२

----------------- (अत्र ग्रन्थपातः)

--------------------पञ्चगव्यैः प्रपूर्य च।
'रुद्रमन्य'मिति प्रोच्य न्यसेदीशानगोचरे।।

आढकार्थघृतेनैव सम्पूर्णं कलशं तथा।
'घृतप्रतीक'इत्युक्त्वा इन्द्रेशानान्तरे न्यसेत्।।

कलशं मधुसंयुक्तं सुकुशैः पूरितं तथा।
'मधुवाते'ति मन्त्रेण इन्द्राग्न्योरन्तरे न्यसेत्।।

## प्र.२२.६३

'दधिक्राष्णो'त्युक्त्वा आग्नेय्यां दधि विन्यसेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



**प्र.२२.६४ - ६६**

'अणोरणीयानि'त्युक्त्वा यमाग्न्योर्मध्यमे [1]न्यसेत्।।

उशीरागरुपर्णैर्वा संयुक्तं चन्दनेन वा।

शुद्धोदकेन सङ्गृह्य कलशं परिपूरितम्।।

यमनीलान्तरे तत्र अप्सरस्स्विति विन्यसेत्।

**प्र.२२.६७, ६८**

तत्राक्षतोदकेनैव सम्पूर्णं कलशं ततः।।

'इमा ओषधय' इत्युक्त्वा न्यसेन्नीलेऽक्षतोदकम्।

**प्र.२२.७०**

फलोदकमिति प्रोक्तं कलशं संप्रसाधितम्।

नीलवारुणयोर्मध्ये 'सोमं राजे'ति विन्यसेत्।।

**प्र.२२.७१, ७२**

कुशोदकमिति प्रोक्तं कलशं तेन पूरितम्।।

वरुणोदानयोर्मध्ये 'यतस्स्व'मिति विन्यसेत्।

**प्र.२२.७४**

रत्नोदकमिति प्रोक्तं कलशं तेन पूरितम्।

वायव्ये संन्यसेत् विद्वान् 'अतो देवा'दिमुच्चरन्।।

---

1. क्षीरकलशमिति शेषः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



**प्र.२२.७६, ७८**

कुबेरोदानयोर्मध्ये 'ब्रह्म देवाना'मिति [1] न्यसेत्।।

---

तुर्यांशेषु गृहीतं च [2] कलशं पूर्णमम्भसा।

**प्र.२२.७८ - ८०**

सोमेशानान्तरे चैव 'चित्रं देवाना'मिति न्यसेत्।।

---

एषां प्रत्येकमेकं तु कलशं शुद्धवारिणा।
गृहीत्वा तदुपस्नानं वामपार्श्वे तु विन्यसेत्।।

उपस्नाने तु कलशान् 'अतो देवा'दिना न्यसेत्।
एवं प्रधानकलशाः चतुर्विंशतिरीरिताः।।

**प्र.२२.८३, ८४**

शरावेषु समाहृत्य पुष्पाणि तु पृथक् पृथक्।।

'इमाः सुमनस' इति मन्त्रेण यमनीलान्तरे न्यसेत्।
तस्योपस्नानमेकं तु तत्पार्श्वे कलशं न्यसेत्।।

**प्र.२२.८७**

पङ्क्तीशाद्दक्षिणे चूर्णं 'वन्द्योन' इति विन्यसेत्।

**प्र.२२.८८**

उपस्नानं तु तत्पार्श्वे त्वेकं वै कलशं न्यसेत्।

---

1. जप्योदकमिति शेषः। 2. सर्वौषध्युदककलशम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



**प्र.२२.९०, ९१**

कषायं परिकल्प्यैव 'येते शत'मिति ब्रुवन्।।

वरुणोदानयोर्मध्ये कषायकलशं न्यसेत्।
उपस्नानं तु तत्पार्श्वे एकं वै कलशं न्यसेत्।।

**प्र.२२.९३**

------- वनौषधीर्गृह्य सोमवाय्वोस्तु मध्यमे।
उपस्नानं तु तत्पार्श्वे एकं वै कलशं न्यसेत्।।

**प्र.२२.९५**

[1]तस्यैकं कलशं पार्श्वे उपस्नानं तु विन्यसेत्।

**प्र.२२.९९, १००, १०१**

सर्वगन्धमिति प्रोक्तं शरावेषु प्रपूरयेत्।
न्यसेत् 'त्रातार'मित्येव यक्षराजेशमध्यमे।।

तत्तत्पार्श्वे न्यसेत् तेषाम् उपस्नानं तथैव च।

-------------------------------------------

पङ्क्तीशस्यैव पार्श्वे तु 'सिनीवाली'ति विन्यसेत्।।

**प्र.२२.१०२, १०३, १०४**

तस्य पार्श्वे न्यसेदेकम् उपस्नानं तु पूर्ववत्।

-------------------------------------------

मूलगन्धार्थमाहृत्य तस्य पार्श्वे न्यसेद्बुधः।।

शुद्धोदकलशं स्थात्यत् उपस्नानं च पूर्ववत्।

1. तीर्थवारिणः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



**प्र.२२.१०५, १०७, १०८**

विष्णुगायत्रिया [1]स्थाप्य यक्षराजेशमध्यमे।।

प्लोतपार्श्वे न्यसेत् तानि 'ब्रह्म जज्ञान'मित्यपि।

-------------------------------

--------------------इति धातून् समाहरेत्।

एतानि चूर्णयित्वा तु शरावेषु पृथक् पृथक्।।

प्रक्षिप्य जातवेदेति न्यसेत् तत्रैव पूर्ववत्।

एकादशानुकरणे कलशांश्चैव पूरयेत्।।

**प्र.२२.११० - ११२**

एवमादीनि सङ्गृह्य सोमेशानान्तरे न्यसेत्।

विन्यस्य कलशांश्चैव तथा चूर्णान् पृथक् पृथक्।।

वस्त्रैरावेष्ट्य तान् सर्वान् पुनः कूर्चानि निक्षिपेत्।

उत्कूर्चं वाप्यधःकूर्चं प्रागग्रं वोदगग्रकम्।।

विन्यस्य तेषु कूर्चानि शरावैरपिधाय च।

**अ.२५**

ऐन्द्रईशानयोर्मध्ये मृदं चाष्टौ तु विन्यसेत्।।

पर्वतान् परितो न्यस्य द्वाराणां वामकोणके।

यमपावकयोर्मध्ये धान्यं शाल्यादि संन्यसेत्।।

यमनैऋतयोर्मध्ये अङ्कुरांश्च सुसंन्यसेत्।

मङ्गलान् परितो न्यस्य द्वारदक्षिणकोणयोः।।

1. प्लोतार्थं वस्त्रमिति शेषः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



पञ्चगव्यं तु चैशान्ये चैशेन्द्रे तु घृतं न्यसेत्।
पावकेन्द्रान्तरे चैव मधु चैव समाचरेत्।।

आग्नेय्यां दधि संन्यस्य यमाग्न्योरन्तरे पयः।
यमनीलान्तरे गन्धं कुङ्कुमेनोदकं न्यसेत्।।

नैऋत्यामक्षतोदं च वारुणे च फलोदकम्।
वरुणोदानयोर्मध्ये कुशोदं तु सुविन्यसेत्।।

वायव्यां रत्नमेवोक्तं जप्योदं वायुसोमयोः।
ईशानसोमयोर्मध्ये सर्वौषध्युदकं न्यसेत्।।

यमनीलान्तरे पुष्पं कलशे तु सुसंन्यसेत्।
नीलवारुणयोर्मध्ये हारिद्रं चूर्णमेव च।।

वरुणोदानयोर्मद्ये कषायं तीर्थमेव च।
सोम ईशानयोर्मध्ये वनौषधि सुसंन्यसेत्।।

ईशानसोमयोर्मध्ये सर्वगन्धं सुसंन्यसेत्।
ईशाने धातु विन्यस्य हरिद्राचूर्णकादि च।।

एतेषामन्तरे चैव उपस्नानं न्यसेत् बुधः।
पञ्चगव्यादि मृद्धान्य पुण्यपुष्पादि चौषधिम्।।

अन्तरे हारिद्रचूर्णं च प्रत्येकं तु चतुर्थकम्।
उपस्नानं च कृत्वा तु प्रत्येकं च पृथक् पृथक्।।

पञ्चगव्यादिक्षीरान्तमुपस्नानम् अथाष्टभिः।
अष्टोत्तरशतं चैव देवेशं स्नानमाचरेत्।।

***

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

# ५. स्नपनपूर्वरात्रौ देवशायनम्

## ८.५.१ स्नपनागारे भगवदर्चनम्

य.३४.४८ - ५०

अभ्यर्च्य मण्डपे तस्य निवेद्यैव हविः प्रभुम्।।

पश्चाद्देवं समादाय वेद्यां संस्थापयेत् तथा।
'भूरसी'त्यादिना धीमान् संस्थाप्य प्रणवैः सह।।

ततः संबन्धकूर्चं तत्तथा न्यस्य समर्चयेत्।

## ८.५.२ प्रातरादिकालविशेषानुरोधेन स्नपने प्राप्ते आवाहनविसर्जनयोर्विवेकः

य.३४. ३६ - ४८

[1]सन्ध्याकाले ततः प्राप्ते स्नपनं यदि कौतुके।।

समाप्य स्नपनं पश्चान्नित्यं सम्यक् समाचरेत्।
प्रातःकाले यदि भवेत् समावाह्यार्चनासनात् (नं सकृत्)।।

कृत्वा तत्स्नपनं पश्चादाचरेत् कौतुके यदि।
पूर्वरात्रौ विशेषेण नैवोद्वासनमन्ययोः।।

कौतुकाबन्धनं कृत्वा तत्तत्काले समाचरेत्।
[2]तत्तत्काले च विहिते आवाहनविसर्जने।।

---

1. तयोरभावे सन्ध्यायां प्राप्ते स्नपनकौतुके।
2. तत्कालविहितं तस्मादावाह्योद्वासनं सदा।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



कौतुकस्य विशेषेण विपरीतेऽप्यनर्थकृत्।
रात्रौ तुरीययामे तु स्नपनं यदि संभवेत्।।

कौतुके कौतुकाच्छक्तिं ध्रुवे चारोपयेत् तथा।
तत्काले कौतुकं पश्चादादाय श्वभ्रमध्यमे।।

संस्नाप्य कौतुकं बद्ध्वा स्नापयेत् स्नपनोक्तवत्।
ध्रुवेऽप्यारोपणं प्रोक्तं रात्रिपूजावसानके।।

[1]निशान्ते तद्ध्रुवाच्छक्तेः नित्यमावाहनं सदा।
संप्रोक्तं कौतुके चापि क्रियां तां कौतुके चरेत्।।

दोषो नास्ति सकृच्छक्तिरस्ति तत् कौतुके सदा।
सर्वत्र वासुदेवत्वाद्दीपादुद्दीपनं यथा।।

कारयेत् स्नपनं [2]तस्माद्धविर्नैवेद्य ? कौतुके।
स्नानान्ते तं समभ्यर्च्य जीवस्थाने सुसंन्यसेत्।।

अर्कोदये तथाऽवाह्य पुनरभ्यर्च्य पूर्ववत्।
नैमित्तिकं हविः पूर्वं नित्यं पश्चान्निवेदयेत्।।

सन्ध्ययोरुभयोर्मध्ये स्नपनं यदि कौतुके।
सम्बन्धकूर्चमादाय प्रणम्यैवानुमानयेत्।।

बद्ध्वा प्रतिसरं पश्चात् स्नापयेत् स्नपनोक्तवत्।

1. तत्कालविहितं तस्मादावाह्योद्वासनं सदा।
2. विधिनैव सकौतुकम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



### ८.५.३ कौतुकबन्धनपूर्वकं देवस्य शायनम्

**वि.४९.३२९, ३३०**

आचार्यः पूर्वरात्रौ देवेशं विशेषतोऽभ्यर्च्य, शयनस्थाने शयनं सङ्कल्प्य, तस्मिन् स्नापनबिम्बं, तदलाभे चोत्सवं, तदलाभे कौतुकं समारोप्य, पूर्ववत् प्रतिसरं बद्ध्वा, ------ अथवा तत्काले शयनं सङ्कल्प्य, देवमारोप्य, प्रतिसरं बद्ध्वा, यामं मुहूर्तं वा शाययेत्। आसन्ने काले शयनं विना कौतुकं बन्धयेदिति केचित्।

**क्रि.१३. २५ - ३२**

पूर्वरात्रौ तु देवेशं समभ्यर्च्य निवेदयेत्।।

आलयाद्दक्षिणे वेदिं शयनार्थं प्रकल्प्य च।
शयनानि पञ्च चास्तीर्य तथा धान्योपरि क्रमात्।।

तत्र देवं समारोप्य बद्ध्वा प्रतिसरं तथा।
शयने शाययेत् देवं पूर्ववत् सुसमाहितः।।

(सन्धिद्वयमतिक्रम्य स्नपनं संभवेद्यदि।)
सद्यः प्रतिसरं बद्ध्वा शयनं संप्रकल्पयेत्।।

कौतुके स्नापनाभावे स्नपनं यदि कारयेत्।
ध्रुवार्चास्नपने वापि सद्यः कौतुकबन्धनम्।।

कृत्वा श्वभ्रे प्रतिष्ठाप्य स्नापयेदिति शासनम्।
रात्रौ यदोदयात् पूर्वं निमित्तं स्नपनस्य तु।।

रात्रिपूजावसाने तु तथा नोद्वासयेद्धरिम्।
स्नपनान्ते तथोद्वास्य प्रातरावाहयेत् तथा।।

नावाहनविसर्गौ द्वौ कौतुकव्यतिरिक्तयोः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



**स. ४९. २६ - ३१**

पूर्वेद्युरेव रात्रौ तु देवेशमभिपूज्य च।।

यमाग्न्योर्मध्यमे देशे शयनं संप्रकल्प्य च।
व्रीहिभिस्तण्डुलैस्तत्र स्थण्डिलं संप्रकल्प्य च।।

ऊर्ध्वे पञ्चशयनानि चर्मजादीनि संस्तरेत्।
'वेदाह'मिति तत्रोर्ध्वे वस्त्रेण परिवेष्टयेत्।।

अभ्युक्ष्य शयने तत्र देवेशं स्थापयेत् ततः।
पूर्वोक्तगुणसंपन्नैर्यजमानेन पूजितैः।।

आचार्याद्यैर्विशुद्धैस्तु पुण्याहमपि वाचयेत्।
बद्ध्वा प्रतिसरं तत्र शाययेन्मन्त्रमुच्चरन्।।

उत्तराच्छादनं कृत्वा चामराद्यैश्च वीजयेत्।
नृत्तैर्गेयैस्तथा वाद्यैर्जयशब्दैश्च घोषयेत्।।

**प्र.२२. ११ - २२**

पूर्वरात्रौ विशेषेण देवेशं संप्रणम्य च।।

समभ्यर्च्य निवेद्यैव मुखवासं ददेत् ततः।'

**वा.३५**

पूर्वरात्रौ विशेषेण नित्यपूजावसानके।।

विशेषं देवमभ्यर्च्य हविरन्तं प्रकल्पयेत्।
आलयाद्दक्षिणे कुर्यात् प्रथमावरणे तथा।।

प्रतिष्ठोक्तक्रमेणैव ह्यण्डजादीनि चाहरेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



अथवा पञ्चवस्त्राणि कल्पयित्वा समन्त्रकम्।।

ततः प्रतिसरं बद्ध्वा शाययेत हरिं परम्।
नृत्तैर्गेयैश्च वाद्यैश्च रात्रिशेषं नयेत् क्रमात्।।

प्रभाते देवमुत्थाप्य दीपान्तं च समर्चयेत्।

**ज्ञा.८७.१६६**

**अ.२५**

स्नपनोक्तदिनात् पूर्वरात्रौ कौतुकबन्धनम्।
आलयाभिमुखे कुर्यात् दक्षिणे वा यथार्हकम्।।

उत्तरेशान्यके वापि पश्चिमे वा यथोचितम्।
मण्डपादि प्रकल्प्यैव सर्वालङ्कारसंयुतम्।।

तन्मध्ये धान्यवेदिं च चतुर्हस्तप्रमाणतः।
उत्सेधं भागमेकं तु तदर्धं तण्डुलोपरि।।

तण्डुलार्धं तिलं प्रोक्तं त्रिविधं च समाहरेत्।
पञ्चभिः शयनं कृत्वा अण्डजादीन् यथाक्रमम्।।

शिरोपधानं कृत्वा तु पादधारणमेव तु।
उत्तराच्छादनं कृत्वा शयनं संप्रकल्पयेत्।।

अण्डजादीनलाभे तु प्रत्येकं वस्त्रमाहरेत्।
दर्भैरुपरि विन्यस्य पुष्पैरुपरि विन्यसेत्।।

सूत्रसङ्ग्रहमेवोक्तं यजमानयुतं भवेत्।
स्वर्णसूत्रद्वयं कुर्यात् ध्रुवकौतुकबन्धनम्।।

लोहपात्रे सुसङ्ग्राह्य शुद्धतण्डुलपूरितम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



तदूर्ध्वे सूत्रं संन्यस्य आलयं च प्रदक्षिणम्।।

अभ्यन्तरं प्रविश्यैव घोषयेत् पटहादिभिः।
पुण्याहं वाचयित्वा तु ध्रुवपूर्वं सुबन्धयेत्।।

कौतुकं शयने न्यस्य पश्चात् सूत्रं सुबन्धयेत्।
नृत्तगेयैश्च वाद्यैश्च रात्रिशेषं नयेत् क्रमात्।।

**य.३४. २८ - ३१**

पूर्वरात्रौ समभ्यर्च्य निवेद्य च गृहाद्बहिः।।

प्रथमावरणे सव्ये शयनानि तथा बुधः।
धान्योपरि समास्तीर्य संस्थाप्योपरि चाव्ययम्।।

तथैव प्रतिसरं बद्ध्वा शाययेत् स्थापनोक्तवत्।
स्नापनप्रतिमां चैव तदभावे तु चौत्सवे।।

औत्सवे चेद्विना देव्यौ कौतुकं बन्धयेद्धरिम्।
[1]द्वयोरभावे तत्काले कौतुके वा समाचरेत्।।

**खि.२९. ७६ - ७८**

पूर्वेद्युरेव शर्वर्यां रात्रिपूजावसानके।
बद्ध्वा प्रतिसरं देवं श्वभ्रदक्षिणपार्श्वतः।।

शयने शाययेद्देवं पूर्वोक्तेन विधानतः।
कौतुकाबन्धनादूर्ध्वं यावत्स्नपनसम्भवः।।

तावदाराधयेद्देवं पाद्याद्यैरष्टविग्रहैः।
प्रातरुत्थाप्य देवेशं हविर्नैव निवेदयेत्।।

1. पांठान्तरम् - उभयोरप्यभावे तदशक्तः कौतुकं प्रभुम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



८.५.४ **रात्रौ स्नपने शयननिषेधः**

**खि.२९. ७८**

(रात्रौ यदि स्यात्स्नपनं शयनं नैव कारयेत्।)

८.५.५ **स्वस्थानात् कौतुकदेवीचालननिषेधः**

**य.३४. ३२ - ३६**

देव्यौ नैव समादाय रक्षाद्याः सद्य आचरेत्।
प्राणस्थानं तथा [1]शून्यं सदा चात्र न चालयेत्।।

तस्माद्देव्यौ विना देवं चालयेद्धेतुनाऽ(द्य)पि च।
नित्यस्नानं विना देव्यौ [2]प्राणदेशान्न चालयेत्।।

[3]अग्निष्ठमन्दिरं शून्यं याजुषां भार्यया इव।
अग्निहोत्रगृहात् पत्नी न गच्छेद्ग्राममन्यकम्।।

[4]तथैव देव्यावर्चायां नार्चयेदासनेऽन्यतः।
देव्योश्च कौतुकस्यैव विशेषोऽयं सदा बुधः।।

अन्येषां चलनत्वाच्च हेतुना ते च चालयेत्।

***

पाठान्तरम्

1. धीमान् शून्यं चात्र न चाचरेत्।
2. देव्योर्नाचरेत् प्राणदेशतः
3. अग्निस्त्वामन्दिरं चास्य यजुषा भक्तयामिव।
4 तस्माद्देव्यौ च कर्मार्चां नार्चयेदासनेऽन्यके।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

## ६. स्नपनद्रव्यदेवार्चनम्

### ८.६.१ स्नपने मृदादिद्रव्याणामधिदेवतार्चनम्

**स.५१. ७ - २१**

मृदादिद्रव्यदेवांश्च क्रमेणैवार्चयेत् ततः।।

मृद्देवता तु भूदेवी पर्वतेशस्तु पावकः।
वायुर्वै धान्यदेवोऽभूद् गरुडोऽङ्कुरदेवता।।

मङ्गलाधिपतिः शक्रः पञ्चगव्याधिपः शिवः।
तस्यैव विश्वेदेवाः स्युरुपस्नानाधिदेवताः।।

सामवेदो घृतेशः स्यादुपस्नानस्य वत्सरः।
ऋग्वेदो मधुदेवः स्यादुपस्नानाधिदेवताः।।

प्राणाद्यास्तु यजुर्वेदो दधीश इति कथ्यते।
उपस्नानाधिपा रुद्राः क्षीरं चाथर्वदैवतम्।।

अश्विनौ तदुपस्नानदेवौ गन्धोदकाधिपाः।
ऋतवस्तदुपस्नाने मरुतो देवताः स्मृताः।।

अक्षतोदकदेवश्च काश्यपोऽथ बृहस्पतिः।
तदुपस्नानदेवः स्यात् तथा सोमः फलोदके।।

अनन्तस्तदुपस्नाने कुशोदे मुनयः स्मृताः।
तक्षकस्तदुपस्नाने विष्णू रत्नोदकाधिपः।।

उपस्नाने च गन्धर्वा मन्त्रा जप्योदकेऽधिपाः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



विद्याधराश्चोपस्नाने सर्वौषध्युदकेश्वराः।।

आदित्यास्तदुपस्नाने देवताश्चात्सरोगणाः।
पुण्यपुष्पाधिपो धाता शक्रश्चूर्णस्य देवता।।

वरुणः कषायदेवः स्याद् गुहस्तीर्थोदकाधिपः।
रुद्रो वनौषधीशः स्यात् सिनीवाल्यधिदैवतम्।।

हारिद्रचूर्णमित्युक्तं तदुपस्नानदेवता।
राका स्यात् सर्वगन्धस्य देवश्चन्द्रः प्रकीर्तितः।।

मूलगन्धाधिपो ब्रह्मा प्लोतवस्त्राधिपस्तथा।

त्वष्टा दुर्गा तु धातूनां देवतेति प्रकीर्तिता।।

तत्तद्द्रव्याधिदेवांश्च पार्श्वे तद्द्रव्यधारकान्।
आवाह्य विग्रहैर्देवानर्घ्याद्याचमनान्तकैः।

अर्चयेत विधानेन पश्चान्निश्छिद्रमेव च।
सर्वद्रव्याणि चैतानि वस्त्रैराच्छादयेत् बुधः।।

**प्र.२२. ११२, ११५ - १२६**

प्रणम्य देवदेवेशं द्रव्यार्चनमथारभेत्।।

-----------------------------------------।

मृद्देवता तु भूदेवी पर्वतेशस्तु पावकः।।

वायुर्वै धान्यदेवः स्यात् गरुडोऽङ्कुरदेवता।
मङ्गलाधिपतिः शक्रः पञ्चगव्याधिपः शिवः।।

तथैव विश्वेदेवाश्च उपस्नानाधिदेवताः।
सामवेदो घृतेशः स्याद् उपस्नाने तु वत्सराः।।

ऋग्वेदो मधुदेवः स्यात् उपस्नाने तु वायवः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



यजुर्वेदो दधीशोऽभूद् उपस्नाने कपर्दिनः।।

क्षीरे त्वथर्ववेदश्च उपस्नानेऽश्विनौ तथा।
गन्धोदके षड्तवो मरुतस्तदनन्तरे।।

अक्षतोदे विश्वमूर्तिरुपस्नाने बृहस्पतिः।
सोमः फलोदकेशः स्याद् अनन्तस्तदनन्तरे।।

कुशोदके च मुनय उपस्नाने तु तक्षकः।
विष्णू रत्नोदकेशः स्यात् गन्धर्वास्तदनन्तरे।।

मन्त्रो रत्नोदकेशः (जप्योदकेशः?) स्याद् उपस्नाने तु पुष्पजाः।
सर्वौषध्युदके भानुरुपस्नानेऽप्सरोगणाः।।

पुण्यपुष्पेषु धातारं चूर्णेष्वप्यनपायिनम्।
वरुणः कषायदेवः स्यात् तीर्थे चैव जगद्भवः।।

वनौषधीशो रुद्रोऽभूत् सिनीवाली हरिद्रके।
उपस्नाने तु राका स्यात् सर्वगन्धे शतक्रतुः।।

ब्रह्माणं मूलगन्धे तु प्लोतवस्त्रे पुरन्दरम्।
धातुष्वपि च दुर्गां च तत्तद्द्रव्यधरां स्मरन्।।

त्रयोदशोपचारैश्च मूर्त्तिमन्त्रैरथार्चयेत्।
उपस्नानेषु चान्येषु वरुणं च तथार्चयेत्।।

**वा.३५**

मृद्देवता तु भूदेवी पर्वतेशस्तु पावकः।।

वायुर्वै धान्यदेवोऽभूद् गरुडोऽङ्कुरदेवता।
मङ्गलाधिपतिः शक्रः पञ्चगव्याधिपः शिवः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



तथैव विश्वेदेवाः स्युरुपस्नानाधिदेवताः।
सामवेदो घृतेशः स्याद् उपस्नानस्य वत्सराः।।

ऋग्वेदो मधुदेवः स्याद् उपस्नाने प्रजापतिः।
यजुर्वेदो दधीशोऽभूद् उपस्नाने कपर्दिनः।।

क्षीरे त्वथर्ववेदश्च उपस्नानेऽश्विनौ स्मृतौ।
गन्धोदके षड्तवः मरुतस्तदनन्तरे।।

अक्षतोदे विश्वमूर्तिरुपस्नाने वृहस्पतिः।
सोमः फलोदकेशः स्याद् अनन्तस्तदनन्तरे।।

मुनिः कुशोदकस्याभूद् उपस्नाने तु तक्षकः।
विष्णू रत्नोदकेशः स्यात् गन्धर्वास्तदनन्तरम्।।

मन्त्रो जप्योदकेशः स्याद् उपस्नाने तु पुष्पजाः।
सर्वौषध्युदके भानुरुपस्नानेऽप्सरोगणः।।

पुण्यपुष्पेषु धातारं चूर्णे चाप्यनपायिनम्।
वरुणः कषायदेवः स्यात् तीर्थोदे तु जगद्भुवम्।।

वनौषधीशो रुद्रोऽभूत् सिनीवाली हरिद्रके।
उपस्नाने तु राका स्यात् सर्वगन्धे शतक्रतुः।।

ब्रह्माणं मूलगन्धे तु प्लोतवस्त्रे पुरन्दरम्।
धातूनामपि दुर्गा स्यात् तत्तद्द्रव्यधरा अमी।।

**ज्ञा.८८.१६८, १६९**

विष्वक्सेनमिन्द्रादिदिग्देवताश्च तत्तत्स्थाने पूर्वोक्तैः मूर्तिमन्त्रैरभ्यर्च्य देवेशं शयनादादाय श्वभ्रे प्रतिष्ठाप्य मृदादिद्रव्येषु तत्तद्द्रव्यधरान् तदधिदेवांश्च

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



चतुर्भिर्मूर्तिमन्त्रैरर्चयेत्। मृत्स्वष्टासु तद्दैवतं हरिणीं, पर्वतेष्वग्निं, धान्येषु वायुं च पूर्वोक्तैर्मूर्तिमन्त्रैः, अङ्कुरेषु 'तार्क्ष्यं पक्षिरूपं सुपर्णमङ्कुराधिपम्' इति तार्क्ष्यम्, अष्टमङ्गलेषु इन्द्रं पूर्ववत्। पञ्चगव्ये 'शिवमीशमव्यक्तं पञ्चगव्य'मिति शिवम्, एतस्य उपस्नाने 'विश्वान् देवान् सर्वान् देवान् विश्वापुत्रान् धर्मसूनुकान्' इति विश्वेदेवान्, घृते 'घृतं सामवेदं वज्रं यज्ञ'मिति सामवेदम्, तदुपस्नाने 'वत्सरान् वसुसुतान् निधीन् धर्मसूनुकान्' इति वत्सरान्, मधुनि 'मधु ऋचं साम क्रतु'मिति ऋग्वेदम्, उपस्नाने 'प्राणमपानं व्यानमुदानं समान'मिति प्राणम्, दध्नि 'यजुः दधि मिश्रमिष्टि'मिति यजुर्वेदम्, उपस्नाने 'रुद्रानेकादशाधिपान् हरान् कपर्दिन' इति रुद्रान्, क्षीरे 'अथर्वाणं पवित्रं क्षीरं पुण्य'मित्यथर्ववेदम्, उपस्नाने 'अश्विनौ मुरुतौ युग्मौ त्वाष्ट्रीपुत्रा' वित्यश्विनौ, गन्धोदके 'ऋतून् सहराशीन् गन्धान् तीर्थानि'ति षड्तून्, उपस्नाने 'मरुतो लोकधरान् सप्तसप्तगणान् मरुद्वतीसुता'निति मरुतः, अक्षतोदके 'काश्यपम् विश्वमूर्तिम् अक्षतमनन्त मि'ति काश्यपम्, उपस्नाने पीतवर्णं पूर्ववत्, फलोदके 'सोमं फलोदकं पुण्यममित'मिति सोमम्, उपस्नाने 'नागराजं सहस्रशीर्षमनन्तं वासुकि'मिति वासुकिम्, कुशोदके 'मुनीन् तपोधिपान् कुशान् पापविनाशना' निति मुनीन्, उपस्नाने 'तक्षकं सर्पराजं क्षितिजं धराधर' मिति तक्षकम्, 'रत्नोदके' विष्णुं सर्वव्यापिनं रत्नं विश्वम् इति विष्णुम्, उपस्नाने 'गन्धर्वान् रम्यान् स्वरजान् सोमजा'निति गन्धर्वान्, जप्योदके 'पवित्रं मन्त्रं जप्यं शुद्ध' मिति सर्वमन्त्रम्, उपस्नाने 'विद्याधरान् मन्त्रबलान् पुष्पजान् भोगजान्' इति विद्याधरान्, सर्वौषध्युदके 'आदित्यमण्डजं सूर्यं सर्वौषध'मित्यादित्यम्, उपस्नाने 'अप्सरसः मुदावहाः भोगवहाः स्वरजा' इत्यप्सरसः, पुण्यपुंष्पेषु धातारम्, चूर्णेषु चक्रम्, कषायेषु वरुणं, तीर्थोदकेषु सुब्रह्मण्यं च पूर्ववदेव, ओषधीषु 'शतरुद्रान् ओषधीशान् त्र्यम्बकान् कपालिन' इति रुद्रान्, हारिद्रचूर्णे 'सिनीवालीं सुपाणिं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



पृथुष्टुकां देवेशानी'मिति सिनीवालीम्, गन्धद्रव्येषु 'इन्द्रं भोगं गन्धं शतक्रतु' मितीन्द्रम्, प्लोते 'त्वष्टारं रूपजातं निधिजं प्लोताधिप' मिति त्वष्टारम्, मूलगन्धे ब्रह्माणम्, धातुषु दुर्गां च पूर्वोक्तमूर्तिमन्त्रैरेव तत्तद्द्रव्येषु तत्तदधिदेवं त्रयोदशविग्रहैरर्चयति।

**य.३५. १ - ११**

अत ऊर्ध्वं प्रवक्ष्यामि द्रव्याणामर्चनक्रमम्।
मृत्स्वष्टासु महीं पूज्य पर्वतेष्विन्द्रमर्चयेत्।।

धान्येषु वायुमभ्यर्च्य उक्ताभिर्मूर्तिभिः क्रमात्।
अङ्कुरे तार्क्ष्यमभ्यर्च्य दिक्पालान् मङ्गलेषु च।।

पञ्चगव्ये शिवं विश्वानुपस्नाने घृतेऽपि च।
सामवेदमुपस्नाने वत्सरानर्चयेत् क्रमात्।।

ऋग्वेदं मधुनि त्वस्योपस्नाने प्राणमित्यथ।
दध्नि यजुस्तथा रुद्रमुपस्नाने समर्चयेत्।।

क्षीरेऽप्यथर्वाणं तस्य चोपस्नानेऽश्विनौ ततः।
गन्धोदके ऋतून् पश्चादुपस्नाने तु मरुतः।।

काश्यपं त्वक्षतोदे च उपस्नाने गुरुं तथा।
सोमं फलोदकेऽभ्यर्च्य उपस्नानेऽथ वासुकिम्।।

कुशे मुनीनुपस्नाने सर्पराजं समर्चयेत्।
विष्णुं रत्नोदकेऽभ्यर्च्य सोमं तस्य जले तथा।।

जप्योदके पवित्रं तदुपस्नाने तु पुष्पजान्।
सर्वौषध्युदके चार्कमुपस्नानेऽप्सरसस्तथा।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



धातारं पुण्यपुष्पेषु चक्रं चूर्णे जलाधिपम्।
कषाये तु पुनस्तीर्थे कुमारं चार्चयेत् क्रमात्।।

ओषधीषु तु रुद्रांस्तान् हरिद्रेषु तथा बुधः।
सिनीवालीं समभ्यर्च्य गन्धेष्विन्द्रं तथार्चयेत्।।

प्लोते त्वष्टारमभ्यर्च्य मूलगन्धे प्रजापतिम्।
दुर्गां धातुषु चाभ्यर्च्य मूर्तिभिः पूर्ववत् क्रमात्।।

**अ.२५**

[अत्र तु फलोदकोपस्नाने नागराट्, कुशोदकोपस्नाने तक्षकः, रत्नोदकोपस्नाने गन्धर्वाश्च अर्चनीया इत्युच्यते इति विशेषः।]

**वि.४९.३३० - ३३४**

[1]तासु मेदिनीमभ्यर्च्य, --------- [2]तेष्वग्निमभ्यर्च्य,--------- [3]तेषु वायुमभ्यर्च्य, [4]तेषु तार्क्ष्यमभ्यर्च्य, [5]तेष्विन्द्रमभ्यर्च्य, --------- [6]तस्मिन् शर्वम्, उपस्नाने विश्वान् देवान् समभ्यर्च्य, [7]तस्मिन् सामवेदमभ्यर्च्य, उपस्नाने अप्सरसश्चाभ्यर्च्य, --------- [8]तस्मिन् ऋग्वेदम् उपस्नाने प्राणानावाह्य अभ्यर्च्य, --------- [9]तस्मिन् यजुर्वेदम्, उपस्नाने रुद्रमभ्यर्च्य,--------- [10]तस्मिन् अथर्ववेदम्, उपस्नाने अश्विनावभ्यर्च्य, --------- [11]तस्मिन् ऋतूनभ्यर्च्य, उपस्नाने मरुतोऽभ्यर्च्य, -------- [12]तस्मिन् काश्यपम्, उपस्नाने बृहस्पतिं चाभ्यर्च्य, -------- [13]तस्मिन्

---

1.मृत्सु 2.पर्वतेषु 3.धान्येषु 4. अङ्कुरेषु
5.अष्टमङ्गलेषु 6. पञ्चगव्ये 7.घृते 8.मधुनि
9.दध्नि 10. क्षीरे 11. गन्धोदके 12. अक्षतोदके
13. फलोदके,

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



सोमम्, उपस्नाने नागराजमभ्यर्च्य, [1]तस्मिन् मुनीन्, उपस्नाने तक्षकमभ्यर्च्य [2]तस्मिन् विष्णुम्, उपस्नाने गन्धर्वानभ्यर्च्य, [3]तस्मिन् पवित्रम्, उपस्नाने विद्याधरान् अभ्यर्च्य, --------- [4]तस्मिन् आदित्यम्, उपस्नाने अप्सरसश्चावाह्य अभ्यर्च्य --------- [5]तेषु धातारमभ्यर्च्य,--------- [6]तस्मिन् चक्रमभ्यर्च्य, --------- कषायेषु वरुणं, तीर्थेषु सुब्रह्मण्यं चाभ्यर्च्य,--------- [7]तेषु रुद्रमभ्यर्च्य,--------- [8]तस्मिन् देवसनाभिमभ्यर्च्य,--------- [9]तस्मिन् इन्द्रमभ्यर्च्य, --------- प्लोते वस्त्रे त्वष्टारं मूलगन्धे ब्रह्माणं, धातुषु दुर्गाम्, भूषणे षण्मुखं च आराध्य,

## वि.४८.३२८

द्रव्याधिदेवान् [10]तत्तत्पार्श्वे चैकादशविग्रहैरष्टविग्रहैर्वाऽर्चयेत्। प्रणवादि-नमोऽन्तैस्तत्तन्नाममन्त्रैः पूर्वं तोयं, ततः पुष्पं, पश्चात् तोयं च समर्चयेत्। षट् त्रयो विग्रहाः सर्वत्र सर्वेषामर्चनार्हा इत्येके।

## क्रि.१३. ३९, ४०

पूर्वोक्तेन प्रकारेण तत्पङ्क्त्यां विहिते पदे।
न्यसेन्मृदादिद्रव्याणि देवेशाभिमुखानि वै।।

तेषु कूर्चं च विन्यस्य पूजयेदधिदेवताः।
तत्तद्द्रव्यधरान् ध्यात्वा तत्तद्द्रव्यसमीपतः।।

***

1. कुशोदके 2. रत्नोदके 3. जप्योदके 4. सर्वौषध्युदके
5. पुण्यपुष्पेषु 6. जातीफलचूर्णे 7. वनौषधीषु 8. हरिद्राचूर्णे
9. सर्वगन्धचूर्णे 10. तत्तद्द्रव्यपार्श्वे।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

## ७. स्नपनप्रयोगः

### ८.७.१ स्नानवेद्यां भगवदर्चनम्

**य. ३४. ७६**

शयनाद्देवमादाय श्वभ्रमध्येऽथ राजवत्।
संस्थाप्य पूजयेत्पश्चादर्घ्यान्तं क्रमशः सुधीः।।

**स.५१. १ - ७**

फलकां श्वभ्रमध्ये च विन्यसेदचलां शुभाम्।
आचार्यः शिष्यसंयुक्तो देवेशं संप्रणम्य च।।

पूर्वोक्तेन विधानेन देवमुद्धृत्य मन्त्रतः।
धूपैर्दीपैः समायुक्तैः पटहादिनिनादितैः।।

ध्वजैश्छत्रैश्च पिञ्छैश्च चामरैश्च समायुतम्।
जयशब्दैस्समायुक्तं नृत्तगेयसमन्वितम्।।

शकुनसूक्तं जपन्नेव देवदेवं समानयेत्।
ग्रामं देवालयं वाथ प्रदक्षिणमथाचरेत्।।

स्थापयेच्छ्वभ्रमध्ये च देवं संप्रणमेत्पुनः।
सुवर्भुवर्भूरित्युक्त्वा मूर्ध्नि नाभौ च पादयोः।।

स्पृष्ट्वाऽऽवाह्य च देवेशमर्चयेदष्टविग्रहैः।
दक्षिणस्यां दिशि द्वारे विमाने सति तत्र च।।
प्राङ्मुखं स्थापयेद्देवं तत्तद्दिङ्मुखमेव च।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



**खि.३०.५१ - ५३**

शयनाद्देवमुत्थाप्य सर्वालङ्कारसंयुतम्।।

ग्रामं प्रदक्षिणीकृत्य स्थापयेच्छ्वभ्रमध्यमे।

पूजयेद्यजमानस्तु वस्त्रहेमाङ्गुलीयकैः।।

आचार्यपूर्वकान् सर्वान् वृतान् स्नपनकर्मणि।

**प्र.२२.१२७ - १२९**

आचार्यं पूजयित्वा तु वस्त्रैराभरणैस्तथा।

शिष्यं च पूजयेत्पश्चाद्यजमानस्स्वशक्तितः।।

ततो गुरुः प्रसन्नात्मा देवेशं सम्प्रणम्य च।

अष्टोपचारैरभ्यर्च्य स्नपनावसरं ततः।।

विज्ञाप्य हरये सम्यक् पश्चात्कार्यं समाचरेत्।

**वा.३७**

पूर्वमाचार्य आहूय वस्त्राभरणकुण्डलैः।।

पूजितो यजमानेन पश्चात्कार्यं समाचरेत्।

प्राशयेद्दधि मन्त्रज्ञो 'दधिक्रावण'चोच्चरन्।।

अप आचम्य शुद्धात्मा उष्णीषं चोत्तरीयकम्।

धारयेत पवित्रं च हस्ताभ्यामङ्गुलीयकैः।।

ऊर्ध्वपूण्ड्राङ्किताादीनि कुर्यात्तद्देशिकोत्तमः।

देवदेवं समभ्यर्च्य उपचारैस्त्रयोदशैः।।

अथवा चाष्टभोगेन चार्चयेद्विष्णुमव्ययम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



**ज्ञा.८७. १७०**

अथातः स्नपनं भवति। यजमानो वस्त्रकुण्डलाद्याभरणैः सशिष्यमाचार्य-मलङ्कृत्य पूजयेत्। सर्वे 'दधिक्रावण' इति दधिप्राशनं कृत्वा अप आचम्य सोष्णीषोत्तरीयाभरणा भवेयुः। आचार्यो भगवन्तं पूर्ववत् त्रयोदशविग्रहैः पश्चादष्टविग्रहैरर्चयति।

**वि. ४९.३३०**

शकुनसूक्ततोयधारापुरस्सरं वाद्यघोषसमायुक्तं, देवमानीय, स्नानवेद्यां प्राङ्मुखमालयद्वारदिङ्मुखं वा 'परं रंह' इति स्थापयित्वा, पाद्याचमनं प्रदाय, यजमानस्य यदुपचारः इष्टस्तं दत्वा, त्रयोदशोपचारैरभ्यर्च्य,

## ८.७.२ स्नपनाङ्गहोमः

**वि.४९. ३३०**

प्राच्यामाहवनीयाग्निकुण्डं कृत्वा, आघारं हुत्वा, वैष्णवं जुहुयात्। हौत्रं प्रशंस्य, देवेशं द्रव्यदेवांश्च तत्तन्मूर्तिमन्त्रैरावाह्य, आवाहनक्रमेण निर्वाप्य, स्वाहाकारं कृत्वा, द्रव्यं, प्रतिद्रव्याधिदेवत्यं वैष्णवं च हुत्वा, पश्चात् स्नापयेत्।

**ज्ञा.८८. १६९**

उत्तममध्यमत्रिकेषु श्वभ्रस्य पूर्वे पश्चिमेऽप्यौपासनाग्निं साधयित्वा पौरुषं दौर्गं वैष्णवं तत्तद्द्रव्याधिपमूर्तीर्हुत्वा देवस्य स्नपनमारभेत्।

**अ.२५**

ऐन्द्रे आहवनीयं च अन्वाहार्यं च दक्षिणे।
प्रतीच्यां गार्हपत्यं तु आवसथ्यं तथोत्तरे।।

कुण्डान् यथोक्तं कृत्वा तु मृदा वा सिकतेन वा।
आघारं पूर्ववत् कृत्वा इन्द्रादीनां यथाक्रमम्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



द्रव्याधिदेवतां हुत्वा तत्तद्दिक्षु सुहूयते।
वैष्णवं ब्राह्मसंयुक्तं रौद्रमन्त्रं तथैव च।।

इन्द्रं तु दक्षिणाग्नौ तु पङ्क्तीशं पश्चिमे भवेत्।
शैषिकं चोत्तरे हुत्वा तत्तन्मन्त्रं सवैष्णवम्।।

**खि. २९. १२६ - १३४**

प्रतीच्यां सर्वशान्त्यर्थं कुण्डमौपासनं चरेत्।।

आघारञ्च ततः कृत्वा पूर्वोक्तेन विधानतः।
आघारान्ते च पूर्वोक्तं हौत्रं सम्यक् प्रशंस्य च।।

देवं श्रियं महीञ्चैव दक्षिणप्रणिधौ जले।
आवाहयेदथाध्वर्युर्भक्तिश्रद्धासमन्वितः।।

पङ्क्तीशञ्चापि सेनेशं जयाद्याः कलशाधिपान्।
उत्तरप्रणिधौ देवान् सर्वानावाहयेद्बुधः।।

जुष्टाकारं तत्क्रमेण स्वाहाकारञ्च कारयेत्।
मूलमन्त्रैः क्रमेणैव हुत्वा सर्वं समाचरेत्।।

क्रियाहीने विपर्यासे मन्त्राणां सङ्करेऽपि च।
द्रव्यहीने मानहीने ध्यानहीनेऽन्यथापि च।।

सर्वदोषोपशमनं सर्वसम्पत्समृद्धिदम्।
जुहुयात्पौरुषं सूक्तं विष्णुसूक्तं तथैव च।।

वैष्णवैर्मनुभिष्षड्भिः प्रायश्चित्ताहुतीर्हुनेत्।
विदितानान्तु दोषाणां प्रायश्चित्तं यथोदितम्।।
तत्तन्मन्त्रैर्हुनेदग्रावज्ञातं पूर्ववच्चरेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



**प्र.२२. १२७, १२८**

ततो गुरुः प्रसन्नात्मा देवेशं संप्रणम्य च।
अष्टोपचारैरभ्यर्च्य स्नपनावसरं ततः।।

विज्ञाप्य हरये सम्यक् पश्चात्कार्यं समाचरेत्।

### ८.७.३ स्नपनप्रयोगः

**वि.४९.३३० - ३३५**

अभिमुखे दक्षिणे वा आसीनः तद्बिम्बार्हं तिष्ठन् वा, देवमानम्य, प्राणायामं कृत्वा ------------ एकाक्षरमिति मृदा स्नापयेत्।। ------------ 'विश्वे निमग्न' इति पर्वतेन प्रदक्षिणं प्रणामं च कारयेत्। 'प्राणप्रसूति'रिति [1]स्नापयेत्। 'वितत्य बाण' (वै.म.प्र.९) मिति [2]देवमाराधयेत्। 'त्वं वज्रभृ' (वै.म.प्र.१) दिति मङ्गलैः प्रदक्षिणं प्रणामं च कारयेत्। ---------------- 'वसोः पवित्र'मिति पञ्चगव्येन स्नापयेत्। 'वारीश्चतस्र' इति सर्वोपस्नानैरभिषेचयेत्। 'अग्न आयाही'ति घृतेन स्नापयेत्। ------ 'अग्निमील' इति मधुना स्नापयेत्। 'इषे त्वोर्जे त्वे'ति दध्ना स्नापयेत्। 'शन्नो देवी'रिति क्षीरेण स्नापयेत्। ------------ 'अभि त्वा शूर' इति गन्धोदकेन स्नापयेत्। ------------ 'इमा ओषधय' इति अक्षतोदकेन स्नापयेत्। 'देवस्य त्वे'ति फलोदकेन स्नापयेत्।-------- 'चत्वारि वागि'ति कुशोदकेन स्नापयेत्। ------------ 'नारायणाय विद्महे' इति रत्नोदकेन स्नापयेत्। ------------ 'पूतस्त' इति जप्योदकेन स्नापयेत्। 'चत्वारि शृङ्गे'ति सर्वौषध्युदकेन स्नापयेत्। पञ्चगव्यादि द्रव्याणामन्तरे

2. धान्यैरित्यध्याह्रियते। 3.अङ्कुरैरित्यध्याह्रियते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



चोष्णोदकेन स्नापयेत्। तत्तद्द्रव्यान्ते पूर्ववस्त्रं विसृज्य, अन्यद्वस्त्रं परिधाप्य, अष्टोपचारैरभ्यर्च्य, करकोदकेन तत्तद्द्रव्यं प्रणवेन प्रोक्ष्य, आदाय, देवं सकृत् प्रदक्षिणं कारयित्वा, अभिषेकं कुर्यात्। ------------ 'धाता विधाते'ति [1]देवमाराधयेत्। 'ऋचो यजूंषी' (वै.म.प्र.१)ति चूर्णेन स्नापयेत्। ---------- 'स एष देव' इति कषायेनोद्वर्त्य 'स सर्ववेत्ते'ति तीर्थोदकैः स्नापयेत्। 'सामैश्चिताङ्ग'मिति वनौषधिभिर्मार्जयेत्। ------------ 'अतो देवा'दिना हरिद्राचूर्णेन स्नापयेत्। ------------ 'त्वं स्त्री'ति सर्वगन्धेनोद्वर्तयेत्। 'आपो हि ष्ठा'द्यैः उष्णोदकैः संस्नाप्य, आचमनं दत्त्वा, ------------ श्वभ्रस्य दक्षिणे पार्श्वे पीठं संन्यस्य, तत्र देवं संस्थाप्य, 'मित्रः सुपर्ण' इति प्लोतेन विमृज्य 'तेजो वत्से'ति वस्त्रं, 'सोमस्य तनूरसी'त्युत्तरीयं, 'भूतो भूते'ष्वित्याभरणं दत्त्वा, पुष्पादिभिरलङ्कृत्य 'अग्निं दूत'मिति उपवीतं दत्त्वा, 'त्वं भूर्भुव' इति मूलगन्धान् स्पर्शयित्वा 'बुद्धिमता'मिति धातुभिरलङ्कृत्य पाद्याद्यैरर्चयेत्। ------------ [2]अथवा बिम्बमादाय, 'कनिक्रदा'दिना आलयं प्रदक्षिणीकृत्य, आस्थाने संस्थाप्य, शुद्धस्नपनविधिना संस्नाप्य प्रभूतं निवेदयेत्।

**प्र.२२.१२९ - १५४**

'रक्षस्व त्व' मिति प्रोच्य द्रव्यदेवं प्रणम्य च।।

शिष्यस्तु नम्रकायस्सन्नाचार्याज्ञां प्रतीक्षते।
आज्ञापयेद् गुरुश्शिष्यं हरस्वेदमिति ब्रुवन्।।

तत्तद्द्रव्यं समादाय शिष्यस्तस्मै निवेदयेत्।
अद्भिः प्रोक्ष्य समादाय तद् द्रव्यं गुरुरत्वरः।।

1. पुण्यपुष्पैरित्यध्याह्रियते। 2. पाठान्तरम् - औत्सवं (वै.मु.सं.पृ.३१२)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



प्रणवं तु समुच्चार्य तत्र कार्यं समाचरेत्।
ललाटान्तं समुद्धृत्य देवदेवं प्रणम्य च।।

तद्द्रव्येण सकृत् त्रिर्वा देवेशस्य प्रदक्षिणम्।
तद्द्रव्यनाम संयोज्य तन्मन्त्रान्ते तु कारयेत्।।

'अतो देवा' दिमन्त्रेण देवदेवं प्रणम्य च।
विष्णुं च पुरुषं सत्यमच्युतं चानिरुद्धकम्।।

एवं मन्त्रं समुच्चार्य तत्र कार्यं समाचरेत्।
क्रियान्ते पात्रमादाय पूर्वस्थाने निवेशयेत्।।

एकाक्षरेण मन्त्रेण प्रोक्ष्य गृह्य प्रदक्षिणम्।
कूर्चेनादाय संस्राव्य मूर्ध्नि वै स्नापयेन्मृदा।।

'विश्वे निमग्न' इत्युक्त्वा पर्वतेन प्रदक्षिणम्।
धान्येन स्नापयेच्चैव 'प्राणप्रसूति'मुच्चरन्।।

'वितत्य बाण'मित्युक्त्वा अङ्कुरैरेव चार्चयेत्।
'त्वं यज्ञे'ति च मन्त्रेण मङ्गलैश्च प्रदक्षिणम्।।

'वसोः पवित्र'मित्युक्त्वा पञ्चगव्याभिषेचनम्।
'वारीश्चतस्र'इत्युक्त्वा सर्वोपस्नानमाचरेत्।।

'अग्न आयाहि' मन्त्रेण घृतेनैवाभिषेचयेत्।
'अग्निमीले'ति मन्त्रेण मधुनैवाभिषेचयेत्।।

दध्नाभिषेचयेत् पश्चात् 'इषे त्वे'ति समुच्चरन्।
'शन्नोदेवीरभी'त्युक्त्वा क्षीरेणैवाभिषेचयेत्।।

'अभि त्वा शूर' इत्युक्त्वा स्नापयेद् गन्धवारिणा।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



'इमा ओषधय' इत्युक्त्वा स्नापयेदक्षतोदकैः।।

'जपन् दत्त्वे'ति चोच्चार्य फलोदैश्चाभिषेचयेत्।
'चत्वारी'ति च मन्त्रेण कुशोदैश्चाभिषेचयेत्।।

'तत्पुरुषाये'ति मन्त्रेण रत्नोदैश्चाभिषेचयेत्।
'पूतस्तस्ये'ति मन्त्रेण जप्योदैरभिषेचयेत्।।

'चत्वारि शृङ्गे'त्युच्चार्य सर्वौषध्युदकैश्चरेत्।
'धाता विधाते'त्युच्चार्य पुण्यपुष्पैरथार्चयेत्।।

'ऋचो यजूंषि' मन्त्रेण चूर्णेन स्नापयेद् गुरुः।
'स एष देव' उच्चार्य उद्वर्तेत कषायकैः।।

'स सर्ववेत्ता' मन्त्रेण तीर्थोदैश्चाभिषेचयेत्।
'सामैश्च साङ्ग'मित्युक्त्वा मार्जयेच्च वनौषधीः।।

हारिद्रचूर्णैः संस्नाप्य 'अतो देवा' इति ब्रुवन्।
'त्वं स्त्री पुमानि'त्युच्चार्य लेपयेत् सर्वगन्धकैः।।

स्नापयेदुष्णतोयेन 'आपो हि ष्ठे'ति चोच्चरन्।
नित्यस्नानोक्तमार्गेण शुद्धोदैरभिषेचयेत्।।

तत्तद्द्रव्याभिषेकान्ते स्नानवस्त्रं विसृज्य च।
धौतं समर्पयेच्चैव पूजयेदष्टविग्रहैः।।

'मित्रः सुपर्ण' इत्युक्त्वा प्लोतेन परिमृज्य च।
वस्त्राद्यैः समलङ्कृत्य पूर्वोक्तेनैव कारयेत्।।

'त्वं भूर्भुवस्त्वं'मन्त्रेण मूलगन्धेन मार्जयेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



'बुद्धिमता'मित्युच्चार्य चालङ्कुर्याच्च धातुभिः।।
पाद्यमाचमनं दद्यात् आलयस्य प्रदक्षिणम्।
स्वस्तिसूक्तादिसूक्तं च जप्त्वा चैवाथ कारयेत्।।

अर्चास्थाने तु संस्थाप्य पूजयित्वोक्तमार्गतः।
महाहविः प्रभूतं वा यथाशक्ति निवेदयेत्।।

**ज्ञा.८९.१७०, १७१**

'सर्वे दधिक्रावण' इति दधिप्राशनं कृत्वा अप आचम्य सोष्णीषोत्तरीयाभरणा भवेयुः। आचार्यो भगवन्तं पूर्ववत् त्रयोदशविग्रहैः पश्चात् अष्टविग्रहैरर्चयति। श्वभ्रस्य वामे अर्चनार्थं पुष्पादीन् संभृत्य द्रव्यप्रोक्षणार्थमद्भिःपूर्णं सकूर्चं करकं निधाय तज्जलेन तत्तद्द्रव्याणि प्रणवेन प्रोक्ष्य आदाय ललाटान्तमुद्धृत्य तद्द्रव्येण देवं त्रिः सकृद्वा प्रदक्षिणं कारयित्वा तत्तन्मन्त्रान्ते च तत्तद्द्रव्यनाम योजयित्वा विष्ण्वादिपञ्चमूर्तिमन्त्रैः स्नापयेत्। पुनः सकृत् प्रदक्षिणं कारयित्वा तद्द्रव्यपात्रं पूर्वस्थाने न्यसेत्। द्रव्यं प्रति निर्माल्यमपोह्याभ्यर्च्य घण्टां ताडयित्वा 'एकाक्षर' मिति मृदा स्नापयेत्। 'विश्वे निमग्न' इति पर्वतेन प्रदक्षिणं कारयित्वा 'प्राणप्रूसति'रिति धान्यैः स्नापयेत्। 'वितत्य बाण' मित्यङ्कुरैरभ्यर्च्य 'त्वं वज्रभृ 'दिति मङ्गलैश्च प्रदक्षिणं कारयेत्।

'वसोः पवित्र'मिति पञ्चगव्येन स्नापयित्वा, 'वारीश्चतस्र' इत्युपस्नानेन, 'अग्न आयाही'ति घृतेन, 'अग्निमील' इति मधुना, 'इषे त्वोर्जे त्वे'ति दध्ना, 'शंन्नो देवीरि'ति क्षीरेण 'अभि त्वा शूर' इति गन्धोदकेन, 'इमा ओषधय' इत्यक्षतोदकेन, 'जपन् दत्वा नुम'दिति फलोदकेन, 'चत्वारि वागि' ति कुशोदकेन, 'नारायणाये'ति रत्नोदकेन, 'पूतस्तस्ये'ति जप्योदकेन, 'चत्वारि शृङ्गा' इति सर्वौषध्युदकेन, च संस्नाप्य 'धाताविधाते'ति पुण्यपुष्पैरर्चयेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



'ऋचो यजूंषी'ति चूर्णैः संस्नाप्य, 'स एष देव' इति कषायेनोद्वर्तयेत्। 'स सर्ववेत्ते'ति तीर्थोदकैः संस्नाप्य 'सामैश्च साङ्ग'मिति वनौषधिभिः संमार्जयेत्। 'अतो देवा' इति हरिद्राचूर्णेन स्नापयेत्। 'त्वं स्त्री' ति सर्वगन्धेन 'आपोहिष्ठा' इत्युष्णोदकेन संस्नाप्य शुद्धोदकैः संस्नापयेत्। 'मित्रः सुपर्णः' इति प्लोतेन विमृज्य पूर्ववत् वस्त्राद्यैरलङ्कृत्य 'त्वं भूर्भुव' इति मूलगन्धैः संस्पृश्य 'बुद्धिमता'मिति धातुभिरलङ्कृत्य पूर्ववत् पाद्यादिभिरभ्यर्च्य 'कनिक्रदा'दिना आलयं प्रदक्षिणीकृत्य अर्चास्थाने वा संस्थाप्याभ्यर्च्य पायसादिभिः प्रभूतं महाहविर्वा यथाशक्ति निवेदयेत्।

**वा.३७**

**स.५१.२३ - ४९**

अर्चनार्थांश्च संभारान् सर्वान् संभृत्य पूर्ववत्।
आचार्यो भक्तियुक्तस्तु पादौ प्रक्षाल्य चाचमेत्।।

'दधिक्रावृष्ण' इत्युक्त्वा दधिप्राशनमाचरेत्।
आचम्य प्रयतः शुद्धो देवदेवं प्रणम्य च।।

सोष्णीषः सोत्तरीयश्च भूषणैरपि भूषितः।
स्नपने प्रमुखे सम्यग् द्विकाङ्गुष्ठद्विजानुना।।

समासीनश्च देवेशमर्चयेदष्टविग्रहैः।
अधिके देवरूपे तु स्थित्वा देवं समर्चयेत्।।

द्रव्यैर्मृदादिभिर्देवं मन्त्रेण स्नापयेत् क्रमात्।
उत्तराभिमुखः स्थित्वा चासीनो वा तथैव च।।

अर्चयेत् स्नापयेच्चेति केचिदाहुर्मनीषिणः।
प्रदक्षिणक्रमाच्छिष्यो द्रव्याण्यादाय वै ततः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



स्थित्वा दक्षिणपार्श्वे च गुरुहस्ते ददेत् पुनः।
प्रणवेनैव कूर्चेन करकाद्भिश्च तत्र वै।।

प्रोक्षयित्वैव हस्ताभ्यामादाय गुरुरत्वरः।
एकाक्षरं जपन्नेव मृद्भिः संस्नापयेद्विभुम्।।

शिष्यस्तत्पात्रमादाय तत्स्थाने संन्यसेत् तथा।
तत्काले वाद्यघोषं च नृत्तं गेयं च कारयेत्।।

द्रव्यं प्रति तथा देवमर्चयेदन्तरेऽन्तरे।
'विश्वे निमग्न' इत्युक्त्वा सर्वतश्च प्रदक्षिणम्।।

कारयित्वा तथा तैस्तु प्रणामं चापि कारयेत्।
'प्राणप्रसूति'रित्युक्त्वा धान्यैस्तैः स्नापयेद्बुधः।।

'वितत्य बाण'मित्युक्त्वा चाङ्कुरैरर्चयेद्बुधः।
'त्वं वज्रभृद्भूते'त्युक्त्वा मङ्गलैरष्टभिस्तथा।।

प्रदक्षिणं प्रणामं च कारयेत् तदनुक्रमात्।
'वसोः पवित्र'मित्युक्त्वा स्नापयेत् पञ्चगव्यकैः।।

'वारीश्चतस्र' इत्युक्त्वा सर्वेषामन्तरेऽन्तरे।
उपस्नानैश्च कलशैर्देवेशं स्नापयेत् पृथक्।।

'अग्न आयाहि वीते'ति घृतेन स्नापयेद्विभुम्।
'अग्निमीले'ति मन्त्रेण मधुना स्नापयेत् पुनः।।

'इषे त्वोर्जे त्वे'त्युक्त्वा च दध्ना तु स्नापयेत् पुनः।
'शं,नो देवी'ति मन्त्रेण क्षीरोदैः स्नापयेत् क्रमात्।।

'अभि त्वा शूर' इत्युक्त्वा गन्धोदैः स्नापयेद्धरिम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



'इमा ओषधये'त्युक्त्वा स्नापयेदक्षतोदकैः।।

'जपन् दत्त्वे'ति मन्त्रेण स्नापयेच्च फलोदकैः।
'चत्वारि वाक् परी'त्युक्त्वा स्नापयेच्च कुशोदकैः।।

'नारायणाय विद्मे'ति रत्नोदैः स्नापयेत् ततः।
'पूतस्तस्ये'ति मन्त्रेण जप्योदैः स्नापयेद् गुरुः।।

'चत्वारि शृङ्गा' मन्त्रेण सर्वौषध्युदकैरपि।
प्रधानैर्द्वादशद्रव्यैर्देवेशं स्नापयेत् क्रमात्।।

'धाता विधाते'त्युच्चार्य पुण्यपुष्पैरथार्चयेत्।
'ऋचो यजूंषी'त्युक्त्वैव तच्चूर्णैः स्नापयेत् पुनः।।

उद्वर्तयेत् कषायेण 'स एष देव' इत्यपि।
'स सर्ववेत्ता'मन्त्रेण स्नापयेत् तीर्थवारिभिः।।

'सामैश्चिताङ्ग' मित्युक्त्वा चौषधीभिः प्रमार्जयेत्।
हरिद्राचूर्णमादाय'सिनीवाली'ति मन्त्रतः।।

'त्वं स्त्री पुमांस्त्वं चे' ति तच्चूर्णैः स्नापयेद्बुधः।
वैष्णवैः सर्वगन्धं च देवेशं स्नापयेत् पुनः।।

'त्वं भूर्भुवस्त्व'मित्युक्त्वा मूलगन्धैश्च मार्जयेत्।
'इषे त्वोर्जे त्वा'दि जपन् 'आप उन्द'न्त्वितीर्य च।।

पुनरुष्णोदकैरेव शोधयेच्च घृतादिकम्।
विसृंज्य प्रतिसराबन्धं शुद्धद्रव्येण शोधयेत्।।

शुद्धोदकैः सुगन्धैश्च स्नापयेत यथोचितम्।
श्वभ्रादुत्थाप्य देवेशं स्थापयेदप्रमादतः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



**य.३५. १२ - ३२**

दधिप्राशं तथा कृत्वा तथाऽऽचम्याचमेत् पुनः।।

करयोरुभयोः पश्चात् पवित्रे धारयेत् तथा।
श्वेतवस्त्रोत्तरीयैश्च कटकाद्यन्वितो गुरुः।।

पुनरभ्यर्च्य देवेशं पाद्याद्यर्घ्यान्तमेव च।
पूजाद्रव्याणि संभृत्य प्रोक्षयेत् करकोदकैः।।

'रक्षस्व त्व'मिति च्छात्रो द्रव्यदेवं प्रणम्य च।
समादाय गुरोर्हस्ते दद्यान्नम्राङ्ग एव च।।

गुरुस्तं प्रणवेनैव प्रोक्ष्यादाय करद्वये।
मस्तकान्तं समुद्धृत्य त्रिः सकृद्वा प्रदक्षिणम्।।

कारयित्वाऽथ देवेशं मन्त्रेणैव पुनर्गुरुः।
तद्द्रव्यनाम क्रमशो योजयित्वाऽथ मन्त्रवित्।।

'तद्विष्णुं स्नापयामी'ति तद्द्रव्येणाभिषेचयेत्।
पुनरादाय तत्पात्रं पूर्वस्थाने सुसंन्यसेत्।।

द्रव्यं प्रति च निर्माल्यमपोह्याभ्यर्च्य मन्त्रतः।
'एकाक्षर'मिति प्रोच्य स्नापयेत् तं मृदा पुनः।।

'विश्वे निमग्न' इत्युक्त्वा प्रादक्षिण्यं च पर्वतैः।
कारयित्वा पुनर्धान्यैः 'प्राणप्रसूति' मन्त्रतः।।

स्नापयेदङ्कुरैः पश्चा'द्वितत्ये'ति तु मन्त्रतः।
'त्वं वज्रभृद्भूते'त्युक्त्वा मङ्गलैश्च प्रदक्षिणम्।।

'वसोः पवित्र'मित्युक्त्वा पञ्चगव्येन चाव्ययम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



घृतेन 'चाग्न आयाहि' मधुना 'चाग्निमील'तः।।

'इषे त्वोर्जेत्वे'ति दध्ना 'शं नो देवी'रिति ब्रुवन्।
क्षीरेण स्नापयेत् पश्चा'दभित्वा शूर'मन्त्रतः।।

गन्धोदकेन विधिना 'इमा ओषधय' इत्यपि।
अक्षतोदकमित्युक्त्वा 'जपन् दत्वा' फलोदकम्।।

'चत्वारी'ति कुशाद्भिस्तद्विष्णुगायत्रिया बुधः।
रत्नोदकेन जप्याद्भिः 'पूतस्तस्ये'ति मन्त्रतः।।

'चत्वारि शृङ्गा' इत्युक्त्वा सर्वौषध्युदकेन च।
तत्तद्द्रव्यान्तरे तत्तदुपस्नानान् क्रमेण वै।।

'वारीश्चतस्र' इत्युक्त्वा स्नापयेदचलात्मना।
पूजयेत् पुण्यपुष्पैश्च 'धाता विधाते'ति च ब्रुवन्।।

'ऋचो यजूंषि' चोक्त्वा तु चूर्णैः संस्नापयेत् क्रमात्।
'स एष देव' इत्युक्त्वा चूर्णेनोद्वर्तयेद्धरिम्।।

'स सर्ववेत्ते'ति ततस्तीर्थैश्चैवाभिषेचयेत्।
'सामैश्चसाङ्ग'मित्युक्त्वा वनौषध्या समार्जयेत्।।

हारिद्रं स्नापयेत् विद्वान् 'अतो देवा' इति ब्रुवन्।
'त्वं स्त्री'ति सर्वगन्धेन चूर्णेन स्नापयेत् क्रमात्।।

संस्नाप्य गन्धतोयेन प्लोतेन विमृजेत् ततः।
वस्त्राद्यैः समलङ्कृत्य 'त्वं भूर्भुवस्स्वे'ति मन्त्रतः।।

मूलगन्धैः सुसंस्पृश्य 'ततो बुद्धिमता'मिति।
अलङ्कृत्य धातुभिर्धीमान् पाद्याद्यैरभिपूज्य च।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



**अ.२५**

[अत्र 'वज्रभृद्भूते'त्यस्य स्थाने 'त्वं यज्ञनेता हुतभुक्' इति दृश्यते।]

**क्रि.१३. ४१ - ४६**

उद्धृत्य शयनाद्देवं श्वभ्रमध्ये निवेश्य च।
पाद्यादिभिः समभ्यर्च्य तैलेनाभ्यज्य पूर्ववत्।।

तथैव पुनरभ्यर्च्य स्नापयेच्च मृदादिभिः।
प्रणवेन समभ्युक्ष्य गृहीत्वा शिष्यहस्ततः।।

ललाटान्तं समुद्धृत्य त्रिः सकृद्वा प्रदक्षिणम्।
नीत्वा संस्नापयेद्देवं मूर्तिभिः पञ्चभिः क्रमात्।।

द्रव्यं पात्रं पुनः प्रोक्ष्य पूर्वस्थाने निवेशयेत्।
प्राग्द्रव्यैश्च प्रधानैस्तदुपस्नानसमन्वितैः।।

अनुद्रव्यैश्च पूर्वोक्तैः मन्त्रैः संस्नापयेत् तथा।
संस्थाप्य देवमास्थाने समभ्यर्च्य निवेदयेत्।।

कौतुकं स्नपनान्ते च जीवस्थाने निवेश्य च।
समभ्यर्च्य निवेद्यैव दद्यात् पुष्पाञ्जलिं पुनः।।

## ८.७.४ मतान्तरेण स्नपनप्रयोगः

**वि.४९. ३३४, ३३५**

प्रणवपूर्वं गायत्र्यैव मृदादिद्रव्याणां न्यासं कृत्वा, तत्तदधिदैवं समाराध्य 'पवमाना'द्यैर्देवं संस्नापयेदित्येके।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



### ८.७.५ देव्योः स्नपनम्

**य.३५. ४२ - ४४**

कर्मान्ते तस्य देव्यौ च स्नापयेदिति केचन।
सहपीठे यदि भवेन्नामाद्यं कर्मणोऽन्तरे।।

शुद्धस्नानैः सहात्रापि स्नापयेन्मां महीं प्रभुम्।
देवीयुक्तध्रुवार्चा चेद्देव्यौ तत्स्नपनान्तरे।।

संस्नाप्य शुद्धतोयेन सह शेषं समाचरेत्।

### ८.७.६ स्नपनान्ते आचार्यादिदक्षिणादिदानम्

**प्र.२२. १५५ - १५८**

निष्काधिकं सुवर्णं च सवत्सामपि गां तथा।
गुरवे दक्षिणां दद्यात् स्नापकानां तथैव च।।

तत्रान्यकर्मकर्तॄणां यथाशक्त्या च दक्षिणाम्।
दद्यात् कर्मफलं प्राप्य यजमानोऽथ भक्तिमान्।।

स्नपनायत्तमुद्दिष्टधान्यद्रव्याम्बराणि च।
पात्राणि च तथान्यानि स्नपनान्ते घृतानि च।।

निवेदयित्वा गुरवे प्रणमेच्च मुहुर्मुहुः।

### ८.७.७ आचार्यादिदक्षिणालोपफलम्

**प्र.३५.५९२, ५९३**

आचार्यर्त्विजां तद्वदन्येषां च पदार्थिनाम्।।

दक्षिणादानहीने च सर्वनाशो भविष्यति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



## ८.७.८ स्नपनोपयुक्तद्रव्यविनियोगः

**अ.२५**

अङ्कुरादिप्रभूतान्तं वस्तु द्रव्यं तु सर्वतः।
वस्त्रधान्यसमायुक्तं लोहरत्नादि धातवः।।

शयनं सोपधानं च देवं संयोज्य वस्त्रकम्।
एवं द्रव्यमिति प्रोक्तम् आचार्याय प्रदापयेत्।।

आचार्यस्य च द्रव्याणि निष्फलं चान्यसङ्ग्रहे।

## ८.७.९ स्नपनफलम्

**स.५१. ६०, ६१**

भक्त्यैव देवदेवस्य स्नापनं कारयेत् तु यः।।

सर्वपापैर्विनिर्मुक्तः पुत्रपौत्रादिवर्धनम्।
धनधान्यविवृद्धिं च कामांश्चान्यानवाप्नुयात्।।

**खि.२९. ११०, १११**

**स.५२. ४४, ४५**

स्नपनं कारयेद्यस्तु देवदेवस्य भक्तितः।।

काम्यं सर्वं च लब्ध्वैव विष्णुलोकं स गच्छति।

**ज्ञा.८९. पृ.१७१**

देवेशस्य स्नपनेनावग्रहदुर्भिक्षव्याध्याधिनाशाद्यशुभानि सर्वोपद्रवाश्च नश्यन्ति।
तस्मात् भक्त्यैव कुर्यात्।

**अ.२५**

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



## ८.७.१० महास्नपनफलम्

### प्र.३५. ४०५ - ४०७, ४२१ - ४२६

अथ वक्ष्ये विशेषेण महास्नपनजं फलम्।
येन द्रव्येण देवेशं स्नापयेद्यस्तु भक्तितः।।

तद्द्रव्यं वर्धते तस्य नश्यन्त्येवाशुभानि तु।
राज्ञो राष्ट्रस्य तद्द्रव्यं समुद्ध्यैव भविष्यति।।

अशुभानि विनश्यन्ति शुभानि प्रभवन्ति च।

---------------------------------------

अन्यैरनुक्तैर्वा यस्तु द्रव्यैः स्नापनकर्मणि।।

उपतिष्ठेज्ज्ञगद्योनिं फलं प्राप्नोति विस्तृतम्।

---------------------------------------

एवं यः स्नपनं विष्णोः कारयेच्छक्तितो नरः।।

यथोक्तानीह लब्ध्वैव फलानि सुचिरं भुवि।
अन्ते विमानमारुह्य हैमं देवैः परीवृतः।।

किन्नरैरप्सरोभिश्च नृत्तैर्गेयैश्च तर्पितः।
यक्षैर्वृतोऽथ गन्धर्वैः स्तूयमानो मुदान्वितः।।

सर्वलोकात् परं पुण्यं वैकुण्ठं लोकमाप्नुयात्।

## ८.७.११ स्नपनसेवाफलम्

### प्र.३५. ४२६, ४२७

देवदेवस्य विष्णोऽस्तु स्नपनं भक्तिमांस्तु यः।।

सेवेत सोऽपि पाप्मभ्यो मुच्यते नात्र संशयः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



## ८.७.१२ स्नापनान्तोत्सवफलम्

**प्र.३५. ४२७, ४२८**

स्नापनान्तं तु देवेशस्योत्सवं यश्च कारयेत्।।

प्रजावृद्धिं श्रियं स्फारां समाप्नोति विशेषतः।

## ८.७.१३ स्नपनान्तोत्सवसेवाफलम्

**प्र.३५. ४२८**

उत्सवं सेवते यस्तु सोऽपि यज्ञफलं लभेत्।।

## ८.७.१४ स्नपनान्तोत्सवलोपफलम्

**प्र.३५. ५९४**

स्नपनान्तोत्सवे हीने न देवः परितुष्यति।

## ८.७.१५ ग्रहणादिपुण्यकालस्नपनफलम्

**प्र.३५. ४३०, ४३१**

ग्रहणे विषुवे तद्वत् सङ्क्रमादिषु चैव हि।
अन्येष्वपि च पुण्येषु कार्येषु जगतः प्रभुम्।।

स्नापयेद्यश्च सेवेत फलमाप्नोति सोऽपि सः।

## ८.७.१६ विष्णुपञ्चदिनस्नपनफलम्

**प्र.३५.४२९**

विष्णुपञ्चदिने यस्तु देवेशं स्नापयेत् प्रभुम्।
तस्य स्यान्महती संपत् पशुपुत्रादिसंमिता।।

***

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

## ८. ध्रुवार्चाबेरस्न्नपनम्

### ८.८.१ ध्रुवार्चास्न्नपनविशेषः

**क्रि.१३. ४७ - ५२**

ध्रुवार्चास्न्नपने कुर्यात् आलयाभिमुखे प्रपाम्।
पूर्ववत् परितः पङ्क्त्यां स्नानद्रव्याणि विन्यसेत्।।

धान्यराशौ तु तन्मध्ये गन्धतोयाभिपूरितम्।
कुम्भं संन्यस्य वरुणं तत्र संपूज्य दैवतम्।।

आदायाभ्यन्तरं गत्वा स्नापयेच्च मृदादिभिः।
अलङ्कृत्य समभ्यर्च्य हवींष्यपि निवेदयेत्।।

रात्रौ सूर्योदयात् पूर्वं स्न्नपनं यदि संभवेत्।
नोद्वास्य शक्तिं तद्बिम्बात् श्वभ्रे संस्थाप्य पूर्ववत्।।

स्न्नपनान्ते समभ्यर्च्य निवेद्योद्वासयेत् तथा।
उदये शक्तिमुद्वास्य ध्रुववेद्यां निवेश्य च।।

ध्रुवात् तत्र समावाह्य स्न्नपयेदिति शासनम्।

**ज्ञा.८९. १७१**

ध्रुवार्चनायां मण्डपे प्रपायां वा मृदादिद्रव्याणि संन्यस्यादाय अभ्यन्तरं प्रविश्य तत्रैव देवेशं स्नापयेत्। अथवा औत्सवं बिम्बं तत्पार्श्वे प्रतिष्ठाप्य तत्रैव स्न्नपनोत्सवादीन् कुर्यात्। ध्रुवार्चायामुत्सवं न कुर्यादित्यन्ये वदन्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



**वा.३७**

ध्रुवार्चनं यदि स्यात् तु स्थापयेन्मण्डपान्तरे।
ध्रुवेणाभ्यन्तरे स्नाप्य सर्वं पूर्ववदाचरेत्।।

अथवा बलिबेरं वा औत्सवं वापि कारयेत्।
एवं चैवाभिषिच्यैव विशेषश्चात्र वक्ष्यते।।

बलिबेरादिहीनं चेत् ध्रुवेणैव समाचरेत्।
अत्रैवं चोत्सवादीनि न कुर्यादिति शासनम्।।

एवं यः कुरुते भक्त्या ऐहिकामुष्मिकाय च।
एवंक्रमेण संप्रोक्तम् इति शास्त्रस्य निश्चयः।।

अनुक्तं चैव यत् सर्वं युक्तितः कारयेत् क्रमात्।

**अ.२५**

ध्रुवार्चायां यदि भवेत् मण्डपे तु यथाक्रमम्।
मृदादीनि च संन्यस्य देवानभ्यर्चयेत् क्रमात्।।

ततोऽभ्यन्तरं प्रविश्यैव द्रव्यमादाय पूर्ववत्।
स्नापयेत् [1]पूर्ववन्मन्त्री ध्रुवार्चां पूजयेत् तथा।।

**य.३५. ३७ - ३९**

**प्र.२२. १५८ - १६७**

ध्रुवार्चना यदि स्यात् तु प्रमुखे स्नपनं चरेत्।।
वितानस्तम्भवेद्यादि पूर्ववत् कारयेत् ततः।
पञ्चहस्तादिभेदेषु पङ्क्तिं कुर्यात् विधानतः।।

---

1. स्नपनादिबेराणां स्नपनवत् (?)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



मध्ये कुम्भं च संन्यस्य अर्चयित्वा तु पूर्ववत्।
ध्रुवपीठस्य परितः कूर्चयुक्तं चतुर्दिशम्।।

जयादीरर्चयित्वा तु मृदादीन् पूर्ववत् क्रमात्।
तत्पात्रं संप्रगृह्यैव पाणिभ्यां क्षालनं चरेत्।।

अथवा पात्रमादाय पूरयित्वा तु संन्यसेत्।
द्रव्यं प्रतिविशेषेण पूरयित्वार्चयेत् क्रमात्।।

पाद्यं चाचमनं पुष्पं गन्धं धूपं तथैव च।
दीपमर्घ्यं तथाचामम् अर्चयित्वाष्टविग्रहैः।।

देवदेवं नमस्कृत्य प्रदक्षिणमथाचरेत्।
देवस्य पुरतस्तिष्ठेत् द्रव्यमादाय पाणिना।।

गोशृङ्गाग्रं समुद्धृत्य पूर्वोक्तविधिना क्रमात्।
पुनः प्रदक्षिणं कृत्वा पूर्वस्थाने तु विन्यसेत्।।

ध्रुवेणाभ्यन्तरे चैव बिम्बैरन्यैः सहैव तु।
पूर्वमुक्तं ध्रुवार्चा चेत् स्नपनं सम्यगाचरेत्।।

यथोक्तेनैव मार्गेण यथाविधि समर्चयेत्।

## वि.४९. ३३५

ध्रुवार्चाबेरस्नपनं चेन्मुखमण्टपे देवालयाभिमुखे स्नपनालयं कृत्वा, अलङ्कृत्य, [1]पूर्ववत् पञ्चविंशतिभागं कृत्वा, तन्मध्ये द्रोणद्वयपूर्णकुम्भं सूत्रेण वेष्टयित्वा, वस्त्रेणाऽऽवेष्ट्य, अद्भिरापूर्य, सुवर्णं निक्षिप्य, तं परितः पूर्ववत् मृदादिद्रव्याणां

1. स्नानवेदिनिर्माणोक्तवत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



न्यासं कृत्वा, अधिदेवमाराध्य, देवेशं परितः पीठोर्ध्वे [1]पूर्ववत् जयादीनभ्यर्च्य, कलशानादाय, अभ्यन्तरं प्रविश्य, [2]तथैव स्नापयेत्।

तत्तत्कुम्भोदकेन 'अतो देवा'दिभिः संस्नाप्य, अलङ्कुर्यात्। एष विशेषोऽन्यत् सर्वं [3]समानम्।

## ८.८.२ एकबेरे कौतुके शयनं विना प्रतिसरबन्धपूर्वकं स्नपनविधिः

**प्र.२७. २१०, २११**

एकबेरे कौतुके तु कर्तव्ये शयनं विना।।

बद्ध्वा प्रतिसरं सद्यः स्नपनं सम्यगाचरेत्।

***

1. स्नपनाङ्गजयाद्यर्चनवत्।
2. देवेशस्नपनवत्।
3. स्नपनविधिनेति शेषः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

# ९.पञ्चविंशतिकलशस्नपनम्
## (अधमाधमस्नपनम्)

### ८.९.१ पञ्चविंशतिकलशस्नपनमहिमानुवर्णनम्

**य.३६. १**

अत ऊर्ध्वं प्रवक्ष्यामि स्नपनं चाधमाधमम्।
भक्तानां दुर्बलानां च क्षुद्रं चापि महार्थदम्।।

### ८.९.२ पञ्चविंशतिकलशस्नपने द्रव्यकलशादिसङ्ख्याविवेकः

**य.३६. २ - ५**

सामान्यानि च सर्वेषां भवन्ति स्नपनेषु च।
तस्माद्गव्यादिभिर्द्रव्यैः सर्वौषध्युदकान्तकैः।।

द्रव्यैः प्रधानाः संपूर्णाः कलशा द्वादशैव च।
वारिपूर्णा उपस्नानकलशा द्वादश क्रमात्।।

हरिद्राचूर्णसंयुक्तकलशेन सहैव च।
पञ्चविंशतिसख्याश्च कलशाश्च तपोधनाः।।

स्नपनार्थं विशेषेण ------------------।

### ८.९.३ पञ्चविंशतिकलशस्नपने द्रव्यन्यासः

**य.३६. ५ - १५**

-------------------- पूर्वोक्तदिवसे तथा।
अङ्कुरानर्पयित्वैव रक्षार्थं चाधिवासयेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



पूर्वोक्तमण्डपे धीमान् कर्मसूत्रैः समस्थले।
पञ्चविंशत्पदं कृत्वा भित्तिमानं विशेषतः।।

अत्र मध्यपदे श्वभ्रं परितोऽष्टौ पदांस्त्ययेत्।
सञ्चारणार्थं चतुरो द्वारार्थं दिक्षु वै क्रमात्।।

कलशस्थापनार्थं तच्छेषितेऽर्कपदे तथा।
आढकं वा तदर्धं वा प्रस्थं वा कलशं प्रति।।

सङ्गृह्य व्रीहिभिः पीठं तत्पदायामविस्तृतम्।
यथालाभोदयं कुर्याद्द्रव्यं प्रति पृथक् पृथक्।।

प्रोक्षणोल्लेखने पीठे दर्भाणामास्तरं पृथक्।
कृत्वा सङ्गृह्य कलशान् द्रव्यैरपि सुपूरयेत्।।

प्रणवेन कूर्चान् निक्षिप्य सोपस्नानं पृथक् पृथक्।
सापिधानं च कृत्वा तु विष्णुगायत्रिया न्यसेत्।।

गव्यं दध्यक्षतोदं च रत्नोदं विदिशासु च।
ईशाद्यं संन्यसेत् पश्चाद्द्वाराणां वामपार्श्वके।।

घृतं क्षीरं फलं जप्यं प्रागाद्यं चास्य पार्श्वके।
मधु गन्धं कुशोदं च सर्वौषध्युदकं न्यसेत्।।

विधिना तत्क्रमेणैव एतेषां वामपार्श्वतः।
संन्यसेत् तदुपस्नानान् नीलतोयाधिपान्तरे।।

संन्यस्यैव च हारिद्रं वस्त्रेण परिवेष्टयेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



## ८.९.४ पञ्चविंशतिकलशस्नपने जयाद्यर्चनम्

य.३६. १५ - १७

अथाधिवासितं देवमादाय श्वभ्रमध्यमे।।

संस्थाप्य कूर्चान् परितः प्रागग्रांश्चोदगग्रकान्।
वेद्यामुपरि चार्घ्यान्तं जयादीरर्चयेत् क्रमात्।।

पङ्क्तीशममितं वीशं दिक्पालान् मूर्तिमन्त्रतः।
कलशाद्वाह्यतोऽभ्यर्च्य ---------------- ।।

## ८.९.५ पञ्चविंशतिकलशस्नपने कलशेशार्चनम्

य.३६. १७ - २१

------------------ कलशेशानथार्चयेत्।

शिवं च विश्वसूनुं च सामवेदं च वत्सरान्।
ऋचः प्राणं यजू रुद्रमथर्वाणमथाश्विनौ।।

तीर्थांश्च लोकनाथं च विश्वमूर्तिं गुरुं ततः।
सोमं च नागराजं च मुनिं तक्षकमेव च।।

पुरुषं चापि गन्धर्वान् मन्त्रं विद्याधरान् क्रमात्।
अर्कमप्सरसस्तस्मिन्नेकमूर्त्याऽधिपांस्ततः।।

हारिद्रे च सिनीवालीमर्घ्यान्तं चासनादिकम्।
प्रणवादिनमोन्तं वै ध्यात्वा मूर्तिभिरर्चयेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



## ८.९.६ पञ्चविंशतिकलशस्नपनप्रयोगः

**य.३६. २२ - ३८**

पश्चाद्देवं प्रणम्यैव पाद्याद्यैरभिपूज्य च।
उत्तराभिमुखस्तिष्ठेद् गुरुर्देवस्य दक्षिणे।।

ततः प्रणम्य शिष्यस्तं 'रक्षस्वे'ति च मन्त्रतः।
समादाय च गव्याद्यं क्रमाद्धस्ते ददेद्गुरोः।।

पुनस्तं प्रणवेनैव प्रोक्ष्याऽऽदाय समाधिना।
आदाय वामहस्ते तं धृत्वा तदितरेण वै।।

न्यस्तं कूर्चं समादाय द्रव्यनाम प्रशंस्य च।
मन्त्रान्ते स्रावयेन्मौलौ कूर्चाग्रेण सकृत् पुनः।।

कूर्चेन सार्धं तद्द्रव्यं त्रिः सकृद्वा प्रदक्षिणम्।
विष्णुं च स्नापयामीति द्रव्येण स्नापयेत् ततः।।

गव्यानां पञ्चकं चात्र फलोदं पादयोः पुनः।
संस्राव्य राजवच्छिष्टैः स्नापयेदथवा हरिम्।।

ततः कलशमादाय शिष्यस्तं गुरुहस्ततः।
पूर्वस्थाने सुसंन्यस्य करौ प्रक्षालयेत् तथा।।

'वसोः पवित्र'मित्युक्त्वा 'अग्न आयाहि'मन्त्रतः।
'अग्निमील' 'इषेत्वे'ति 'शन्नोदेवी'रिति क्रमात्।।

'अभित्वा' च 'इमा ओष' जपन् 'चत्वारि वागि'ति।
'तत्पुरुषाय पूतेति क्रमाच्चत्वारि शृङ्ग'तः।।

प्रधानैः स्नापयेद्देवमुपस्नानैः सदा बुधः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



'वारीश्चतस्र' इत्युक्त्वा स्नापयेत् कलशैस्तथा।।

द्रव्यं प्रति च वस्त्राद्यैर्विभूष्यार्घ्यान्तमर्च्य च।
'श्रिये जाते'ति चोक्त्वान्ते हारिद्रैः स्नापयेत् तथा।।

ततः प्रणम्य देवेशं कलशेशान् विसृज्य च।
शुद्धस्नानोक्तमार्गेण तैलेनैवाभिषेचयेत्।।

विमृज्य प्लोतवस्त्रेण श्वभ्रादादाय चाव्ययम्।
योगासने सुसंस्थाप्य वस्त्राद्यैर्भूषयेत् तथा।।

समभ्यर्च्य तथार्घ्यान्तं दानं दत्त्वाथ पूर्ववत्।
महाहविः प्रभूतं वा निवेद्यात्रैव चाव्ययम्।।

प्रणम्य दण्डवद्भूमौ प्रार्थनामन्त्रमुच्चरन्।
विनोदानत्र कृत्वान्ते गुरुं पश्चात् प्रपूजयेत्।।

पुनरादाय देवेशं कृत्वा धामप्रदक्षिणम्।
जीवस्थाने प्रतिष्ठाप्य पूर्वोक्तं चात्र पूजयेत्।।

श्वभ्रादादाय कर्मान्ते कौतुकं यदि मन्त्रतः।
जीवस्थाने सुसंस्थाप्य पूजयेदथवा बुधः।।

***

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

# १०.सहस्रकलशस्नपनम्

## ८.१०.१ सहस्रकलशस्नपनकालः

**खि.३०. १**

अथातः स्नपनं वक्ष्ये सहस्रकलशैस्तथा।

कालः [1]पूर्ववदेव स्यात् --------------।।

## ८.१०.२ सहस्रकलशस्नपने अष्टविधायाः मृदःसंग्रहणम्

**खि.३०. १ - ३**

----------अथ स्यात् द्रव्यसङ्ग्रहः।।

सस्यक्षेत्रे नदीतीरे तटाके दर्भमूलतः।

गजदक्षिणदन्ते च वृषशृङ्गे तथैव च।।

कुलीरवासे वल्मीके मृदमष्टसु संभरेत्।

## ८.१०.३ अष्टकुलपर्वतानां कल्पनम्

**खि.३०. ३**

पर्वतान् कारयेद्विद्वान् [2]पूर्वोक्तेनैव वर्त्मना।।

---

1. महास्नपनवत्।
2. स्नपनोक्तेन

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



## ८.१०.४ धान्यानामाहरणम्

खि.३०. ४, ५

शालिव्रीहियवान् मुद्गतिलमाषांश्च तिल्वकान्।

निष्पावान् सर्षपांश्चापि धान्यानि सुसमाहरेत्।।

[1]एतान्येव तु गृह्णीयादङ्कुरार्थं विचक्षणः।

## ८.१०.५ अष्टमङ्गलकल्पनम्

खि.३०. ५

अष्टौ च मङ्गलान् कुर्यात् [2]पूर्वोक्तेन विधानतः।।

## ८.१०.६ पञ्चगव्यादिप्रधानद्रव्यणामाहरणम्

खि.३०. ६

पञ्चगव्यादिद्रव्याणि द्वादशोक्तानि [3]पूर्ववत्।

## ८.१०.७ पुण्यपुष्पाहरणम्

खि.३०. ६, ७

बिल्वं च करवीरं च कुमुदं पद्ममेव च।।

नन्द्यावर्तं च तुलसीं धातकीं चम्पकं तथा।

अष्टौ वै पुण्यपुष्पाणि पूजनार्हाणि चाहरेत्।।

---

1. शाल्यादीनि धान्यानि।
2. स्नपनोक्तेन।
3. स्नपनवत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



### ८.१०.८ उद्वर्तनार्थचूर्णाहरणम्

**खि.३०. ८, ९**

श्रीवेष्टकं मसूरं च उशीरं चैव चन्दनम्।
जातीफलं च कर्पूरं मुद्गं दमनकं तथा।।

उद्वर्तनार्थमेतानि गृह्णीयाच्चूर्णितानि वै।

### ८.१०.९ कषयार्थमश्वत्थचूर्णाद्याहरणम्

**खि.३०.९, १०**

अश्वत्थस्य वटस्यापि मधूकस्यासनस्य च।।

खदिरस्य त्वचश्चैव वञ्जुलस्यार्जुनस्य च।
पितृद्रुमस्य त्वचश्च कषायार्थं समाहरेत्।।

### ८.१०.१० तीर्थोदकाहरणम्

**खि.३०. ११**

नदीतटाकवापीषु पल्वले निर्झरे तथा।
ह्रदे सरसि सेतौ च जलं तीर्थोदकं स्मृतम्।।

### ८.१०.११ वनौषधिचूर्णाहरणम्

**खि.३०. १२**

सिंही च नकुली व्याघ्री अनन्ताश्रीः सुवर्चला।
मार्जनार्थं चौषधयः स्मृता दूर्वा च पाठका।।

### ८.१०.१२ हारिद्रचूर्णाहरणम्

**खि.३०. १३**

हरिद्रायाश्च चूर्णं च हारिद्रं हि भवेत् पुनः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



## ८.१०.१३ सर्वगन्धचूर्णाहरणम्

**खि.३०.१३, १४**

हरेणूशीरपत्रं च स्थौणेयागरुचन्दनम्।।

आहरेत् सर्वगन्धार्थमेलां कर्पूरमेव च।

## ८.१०.१४ प्लोतवस्त्राहरणम्

**खि.३०. १४**

प्लोतार्थमष्टौ वस्त्राणि गृह्णीयाच्च विशेषतः।।

## ८.१०.१५ मूलगन्धाहरणम्

**खि.३०. १५**

स्पर्शनार्थं मूलगन्धान् कृष्णं कृष्णप्रियां (?) तथा।

दूर्वापामार्गदमनान् पलाशकुशभूस्तृणान्।।

## ८.१०.१६ भूषणाहरणम्

**खि.३०. १६, १७**

मनश्शिलां हरितालं जातिहिङ्गुलिकं तथा।

सौवर्णं गौरिकं चैव राजावर्तं च गैरिकम्।।

श्यामाकं चाञ्जनं धातूनलङ्कारार्थमाहरेत्।

कौशेयादि यथाशक्ति वस्त्रमाभरणं हरेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



### ८.१०.१७ अङ्कुरार्पणपूर्वकं द्रव्यस्य ग्रहणम्

**खि.३०. २०**

अङ्कुरानर्पयित्वैव गुरुरेतान् समाहरेत्।।

### ८.१०.१८ सहस्रकलशस्नपने स्नपनशालानिर्माणम्

**खि.२०.२१ - २४**

प्रमुखे चोत्तरे वापि ऐशान्ये वा यथोचितम्।
त्रिपञ्चहस्तविस्तीर्णं त्रिंशद्धस्तायतं तथा।।

मण्डपं वाऽथ कूटं वा प्रपां वाऽपि च कारयेत्।
चतुर्द्वारसमायुक्तं चतुस्तोरणसंयुतम्।।

सर्वालङ्कारसंयुक्तं वितानादिविभूषितम्।
पूर्णकुम्भाङ्कुरोपेतं मुक्तादामभिरञ्चितम्।।

दर्भमालाभिराकीर्णं फुल्लपल्लवशोभितम्।
द्वारस्तम्भेषु सर्वत्र कदलीक्रमुकैर्युतम्।।

### ८.१०.१९ श्वभ्रकल्पनम्

**खि.३०.२५ - २७**

एवं कृते स्थले द्वेधा विभक्ते पश्चिमेऽङ्कणे।
शिलाभिरिष्टकाभिर्वा श्वभ्रं कुर्यात् तु मध्यमे।।

चतुरश्रं चतुर्दिक्षु जलनिर्गमसंयुतम्।
द्वादशाङ्गुलविस्तारं चतुरङ्गुलमुन्नतम्।।

एकवेदियुतं कृत्वा सुधया परिलेपयेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



## ८.१०.२० औपासनकुण्डकल्पनम्

**खि.३०. २७**

श्वभ्रस्य दक्षिणे कुर्यात् कुण्डमौपासनं ततः।।

## ८.१०.२१ सहस्रकलशस्नपने ऋत्विग्वरणम्

**खि.३०. २८ - ३०**

पूर्वेद्युरेव वरयेद्यजमानः सुसंयतः।

आचार्यसहितांश्चैव कार्यार्थं द्वादशर्त्विजः।।

तेष्वेकं योजयेदेवमाचार्यो होमकर्मणि।

हौत्रप्रशंसनायैकं चतुरोऽर्चनकर्मणि।।

अभिषेकाय [1]चत्वारो द्वौ द्वौ तु परिचारकौ।

## ८.१०.२२ सहस्रकलशस्नपने पूर्वेद्युः देवशायनम्

**खि.३०. ३०, ३१**

पूर्वेद्युरेव शर्वर्यां बध्नीयात् कौतुकं क्रमात्।।

[2]पूर्वोक्तेन विधानेन शयने शाययेद्धरिम्।

## ८.१०.२३ सहस्रकलशस्नपने कलशकल्पनम्

**खि.३०. ३१ - ४०**

मण्डपस्य तु पूर्वार्धे कलशस्थापनाय तु।।

---

1. चतुरौ (?)

2. पञ्चमूर्तिप्रतिष्ठोक्तेन।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



प्रत्येकं तु मृदादीनां द्विप्रस्थैर्व्रीहिभिः क्रमात्।
कुर्वीत सूत्रमार्गेण पदानि दश पञ्च च।।

प्राक् पश्चिमायतां पङ्क्तिं कुर्याद्विंशत्करायताम्।
द्वितालमात्रविस्तारां यथालाभोन्नतां तथा।।

यमान्तशलमन्योन्यं पङ्क्तयः परिकीर्तिताः।
ईशानसोमयोर्मध्ये पीठं शान्तस्य तण्डुलैः।।

नीलवारुणयोर्मध्ये मित्रस्थानं च कल्पयेत्।
कलशांस्तन्तुनाऽऽवेष्ट्य पूरयेदाढकोदकैः।।

प्रत्येकं च चतुर्विंशत् प्रधानकलशाः स्मृताः।
तत्तद्द्रव्यैः प्रपूर्याः स्युः पञ्चगव्यादिकैः क्रमात्।।

तेषामुपस्नानतया कलशाश्च पृथक् पृथक्।
चत्वारिंशत् तथाष्टौ च भवेयुः जलपूरिताः।।

कषायस्य तु चत्वार उपस्नानास्तु षोडश।
कलशाश्च चतुर्विंशत् तीर्थतोयस्य केवलम्।।

हरिद्राचूर्णकलशाः सोपस्नानाः प्रधानवत्।
चत्वारः सर्वगन्धस्य उपस्नानास्तु षोडशः।।

सङ्ख्यैवं कलशानां तु सहस्राणां प्रकीर्तिता।

**८.१०.२४ सहस्रकलशस्नपने द्रव्यन्यासः**

**खि.३०. ४० - ४८**

कूर्चान् कुशान् वा निक्षिप्य शरावैस्तु पिधाय च।।

प्रक्षालितशरावेषु मृदादीनि निधाय च।
पञ्चगव्यैः समभ्युक्ष्य पङ्क्तीः दर्भैः समास्तरेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



प्रागाद्युत्तरपङ्क्तौ तु प्रत्येकं प्रस्थपूरितान्।
अष्टौ वै मृच्छरावांस्तु युग्मं युग्मं सुसंन्यसेत्।।

ततः पर्वतधान्याष्टमङ्गलान्यङ्कुराणि च।
न्यस्य प्राक्करणान्येवं क्रमेणान्यासु पङ्क्तिषु।।

प्रधानान् पञ्चगव्यादीन् सोपस्नानान् न्यसेत् पृथक्।
चतुर्दश्यां तु पङ्क्त्यां वै तथानुकरणानि तु।।

पुण्यपुष्पाणि चूर्णानि कषायकलशानपि।
तीर्थानां कलशांश्चापि विन्यसेच्च विधानतः।।

ततः परस्यां पङ्क्तौ च विन्यसेच्च वनौषधीः।
हरिद्राचूर्णकलशान् सोपस्नानान् क्रमेण तु।।

कलशान् सर्वगन्धस्य प्लोताद्यान्यपराण्यपि।
विन्यासं पञ्चदश्यां वै पङ्क्त्यामेव तु कारयेत्।।

वस्त्रैराच्छाद्य विधिना --------------------- ।

## ८.१०.२५ सहस्रकलशस्नपने श्वभ्रे देवस्थापनम्

**खि.३०. ४८ - ५२**

-------------------- देवाभिमुखमर्चयेत्।
विष्वक्सेनं च पङ्क्तीशमर्चयित्वा च पूर्ववत्।।

पत्रैः श्वभ्रं समाच्छाद्य कूर्चानुपरि निक्षिपेत्।
जयादीः पूजयित्वा तु बैल्वीं तु फलकां न्यसेत्।।

अश्वत्थफलकां वाऽपि तालोच्छ्रयसमन्विताम्।
सर्वं मानं विजानीयादाचार्यस्यैव हस्ततः।।

आघारं च ततः कुर्यात् सूत्रोक्तेन विधानतः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



शयनाद्देवमुत्थाप्य सर्वालङ्कारसंयुतम्।।

ग्रामं प्रदक्षिणीकृत्य स्थापयेच्छ्वभ्रमध्यमे।

**८.१०.२६ सहस्रकलशस्नपने ऋत्विक्पूजनम्**

**खि.३०. ५२, ५३**

पूजयेद्यजमानस्तु वस्त्रहेमाङ्गुलीयकैः।।

आचार्यपूर्वकान् सर्वान् वृतान् स्नपनकर्मणि।

**८.१०.२७ सहस्रकलशस्नपनाङ्गहोमः**

**खि.३०. ५३, ५४**

हौत्रप्रशंसनं कृत्वा तदालयगतांस्तथा।।

अधिदेवान् मृदादीनां सर्वानावाहयेत् क्रमात्।
जुष्टाकारं ततः कृत्वा तत्क्रमेणाहुतीर्यजेत्।।

**८.१०.२८ सहस्रकलशस्नपनानन्तरं देवस्य स्वस्थानप्रापणम्**

**खि.३०. ५५, ५६**

स्नापयित्वा तु देवेशं सर्वैः द्रव्यैर्यथाविधि।
अलङ्कृत्य ततो देवमालयं तु परीत्य च।।

प्राणस्थाने प्रतिष्ठाप्य पूजयित्वा विधानतः।
प्रभूतं च निवेद्यैव दक्षिणां च प्रदापयेत्।।

**८.१०.२९ सहस्रकलशस्नपने अनुक्तांशाचरणक्रमः**

**खि.३०. ५७**

अनुक्तमत्र कुर्वीत शताष्टकलशे यथा।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



## ८.१०.३० सहस्रकलशस्नपने दक्षिणादानम्

**खि.३०. ५७ - ५९**

आचार्यदक्षिणा देया स्नापकानां यथाविधि।।

चतुर्णामभिषेक्तॄणां दक्षिणाऽऽचार्यदक्षिणा।
अर्धम् अध्वर्युहोत्रोश्च देया वै दक्षिणा भवेत्।।

चतुर्णां कलशोद्धारपूजकानां च तत्समा।
तदर्थं परिचर्तृभ्यां दक्षिणा स्याद्यथाक्रमम्।।

## ८.१०.३१ स्नपनोपयुक्तद्रव्यविनियोगः

**खि.३०. ६०, ६१**

उपयुक्तानि यान्यत्र द्रव्याणि स्नपनोत्तमे।
तानि सर्वाणि वस्तूनि आचार्याय ददेत् ततः।।

देवयागे तु शिष्टं यदाचार्यस्य धनं मतम्।

## ८.१०.३२ सहस्रकलशस्नपनफलम्

**खि.३०. ६१ - ६३**

एवं यः कुरुते भक्त्या विष्णोः स्नपनमुत्तमम्।।

स्नपनोक्तं फलं सर्वमवाप्नोति न संशयः।
कामार्थी स्नापयेद्देवं सर्वान् कामानवाप्नुयात्।।

क्षीरेण द्रोणमात्रेण केवलेन घृतेन वा।
गव्येन स्नापयेद्विष्णुं फलमेतदवाप्नुयात्।।

***

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

# ११.शुद्धस्नपनम्

## ८.११.१ शुद्धस्नपनप्रयोगः

### वि.४७.३१८ - ३२१

स्नपनद्रव्याणि संभरति, देवागारं प्रविश्य, देवस्य पादयोः पुष्पाञ्जलिं दत्त्वा, 'परं रंह' (वै.म.प्र.८) इति हस्ताभ्यां देवमादाय अलङ्कृते मण्टपे पीठे 'प्रतद्विष्णु'रिति संस्थाप्य, पात्रे परिच्छदादिपरिवृतं राजवदुपचारं कारयित्वा, 'त्रीणि पदा' इति, 'इन्द्रोऽभिमन्ते'ति देवस्य पादौ प्रक्षाल्य, 'विष्णुर्मां रक्षत्वि'ति धौतेन विमृज्य, 'विष्णवे नम' इति पुष्पाञ्जलिं दत्त्वा, 'शन्नो देवी'रित्याचमनं ददाति। अष्टाक्षरेण मुखं पाणी च धौतेन विमृज्य, 'घृतात्परी' ति मुखवासं प्रदाय विविधैः स्तोत्रैर्नृत्तगेयवाद्यैश्च विनोदं कारयेत्। मुख्यं गौणं च ज्ञात्वा, देवेशं प्रणम्य, वस्त्राभरणगन्धमाल्याभरणादीनि विमोच्य, 'वसोः पवित्र'मित्यनेन वाससाऽऽच्छाद्य, मुखवासं निवेद्य तत्काले वैष्णवैर्मन्त्रैर्जयशब्दैश्च स्तुत्वा, देवेशं प्रणम्य, कार्यं विज्ञापयेत्। पूजकः स्वयमेव श्रावयेत्। तद्वाक्यं विष्णोर्वाक्यमिति स्मृत्वा, सर्वं समाचरेत्। पुनः पुनः मुखवासं निवेद्य, विष्णुगायत्र्या धौतेन वस्त्रेण देवस्य स्कन्धं समाच्छाद्य, अभावे नववस्त्रेण, 'अतो देवा' इत्यलकान् विकीर्य, 'इदं विष्णु'रिति अलकशोधनं कृत्वा, तैले सोममभ्यर्च्य, 'त्रीणि पदे'ति तैलं शिरसि संस्राव्य, 'सोमं राजान'मिति मर्दयित्वा, 'विष्णोः कर्माणी'त्यावर्त्यावर्त्य करोति। अलकान् संबध्य 'तद्विष्णोः पर'मिति परिमलैः पुष्पमाल्यैरलङ्कृत्य, करौ प्रक्षाल्य, स्कन्धाद्वस्त्रं विमोच्य 'तद्विप्रास' इत्यङ्गे अभ्यञ्जनं कृत्वा तच्छेषं भक्तेभ्यः प्रदद्यात्। 'विष्णोर्नुक'मिति शालिपिष्टेन देवेशं परिमृज्य 'तदस्य प्रिय'मिति वस्त्रेणार्द्रेण विमृज्य, शकुनसूक्तेन

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



देवमादाय, 'प्रतद्विष्णुः स्तवत' इति स्नानपीठे देवं संस्थाप्य, पूर्ववत् पादौ प्रक्षाल्य, सौवर्णैः साधनैश्चूतपत्रसिराभिर्वा 'परो मात्रया, विचक्रम' इति दन्तधावनं, तालुशोधनं च भावयति। पूर्ववदाचमनं दद्यात्। एकादश्यां, पर्वणि, नवम्याम् अष्टम्यां च वर्जयेत्। तासु कुर्याच्चेत्, राजशत्रुपरिपालनं ग्रामयजमानयोर्भयंप्रदं भवति। दूर्वाक्षतपुष्पाणि देवस्य मूर्धादिपादपर्यन्तं 'त्रिर्देव' इति सन्धौ सन्धौ संयोज्य, पादयोः प्रक्षिपेत्। वस्त्रादीनि विमोच्य 'परिलिखित'मिति आम्लेन संशोध्य, सूक्ष्मसिकताभिः 'विष्णवे नम' इति यथा बिम्बशुद्धिः तथा शोधयित्वा 'वारीश्चतस्र' इति शुद्धोदकैरभिषिच्य, पूर्ववद्धौतेन वस्त्रेणाऽऽच्छाद्य पाद्याचमनं दत्त्वा, कर्पूरादिपरिमलैर्युक्तेन हरिद्रापिण्डेन 'सिनीवाली'ति देवस्य सर्वाङ्गमालिप्य, पूर्ववच्छुद्धोककैर-भिषेचयेत्।

पुनः संशोध्य, आचमनं दत्त्वा, वस्त्रमाल्याद्यैर्विभूष्य, 'नमो वरुणः शुद्ध' इति क्षीरेण उष्णोदकैर्वा अभिषिच्य, 'भूरानिलय' इति गन्धतोयैः पुनः संस्नाप्य, पूर्ववत् वस्त्रमाल्यादिभिरलङ्कृत्य, ' अग्निं दूत'मिति उपवीतं, 'सोमस्य तनूरसी'त्युत्तरीयं च दद्यात्। 'इदं ब्रह्म पुनीमहं' इति देवस्य हस्तयोः पवित्रं संयोज्य, 'तद्विप्रास' इति चन्दनेन सर्वाङ्गमालिप्य, पाद्याद्यर्घ्यान्तमभ्यर्च्य, देवेशं प्रणम्य, सहस्रधारामभ्यर्च्य, पूर्ववत् सहस्रधार-याऽभिषेचयेत्। अलाभे षोडशादिचतुरन्तं यथालाभं कुम्भोदकैः 'वसोः पवित्र ' मिति पुरुषसूक्तेन वा अभिषेचयेत्। तत्तत्काले चतुर्दिक्षु वेदानध्यापयेत्। स्तोत्रैर्जयशब्दैः नृत्तगेयवाद्यैश्च घोषयेत्। पुनः शुद्धोदकैरभिषिच्य, वस्त्रमाल्यादीनि विमोच्य, अङ्गं प्रति 'मित्रः सुपर्ण' इति प्लोतेन विमृज्य, धौतवस्त्रेणाऽऽच्छाद्य, पाद्याचमनं दत्त्वा, पुष्पाञ्जलिं दत्त्वा, शकुनसूक्तेन देवमुद्धृत्य, पूर्ववन्मण्टपे पीठे संन्यस्य, वस्त्राभरणगन्धमाल्याद्यैरलङ्कृत्य, पाद्याद्यर्घ्यान्तमभ्यर्च्य,

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



दूर्वाक्षतगन्धपुष्पाण्येकपात्रे सङ्गृह्य देवस्य पुरतः संस्थाप्य, सोममभ्यर्च्य, हस्ताभ्यां गृहीत्वा, विष्णुगायत्र्या मकुटोपरि त्रिः प्रदक्षिणमावर्त्य, पुरतः निक्षिपेत्। पश्चाद्रक्षादीपविधानेन रक्षादीपं कारयेत्। तत्काले 'देवस्य त्वे' त्यादर्शं दर्शयित्वा, अष्टाक्षरेण देवस्य छत्रचामरपरिच्छदादीनि योजयित्वा, विनोदमपि कारयेत्।

शकुनसूक्तेन देवमुद्धृत्य, हविर्निवेदनस्थाने 'भूरसी'त्यादिना प्रतिष्ठाप्य, आसनाद्यैरुपचारैरभ्यर्च्य, पानीयाचमनमुखवासं दत्त्वा, देवेशमुद्धृत्य, पूर्ववन्मण्टपे पीठे संन्यस्य, वस्त्रमाल्यादीनि विमोच्य अन्यैर्वस्त्रमाल्याद्यैरलङ्कृत्य, अपूपादीनि भक्ष्याणि भोज्यानि विविधानि पक्वान्यपक्वानि च विष्णुगायत्र्या अष्टाक्षरेण वा निवेदयेत्। पूर्ववत् पाद्याचमनमुखवासौ दत्त्वा, यानमारोप्य, आलयं प्रदक्षिणीकृत्य, देवागारं प्रविश्य, पूर्वस्थाने न्यसेत्। अर्चनं चेज्जीवस्थाने प्रतिष्ठाप्यार्चयेत्।

### ८.११.२ शुद्धस्नपनप्रकारः

**वा.३८**

अतः परं प्रवक्ष्यामि शुद्धस्नानविधिं परम्।
आस्थानमण्डपे चैव स्नपनालय एव वा।।

अलङ्कृत्य वितानाद्यैर्दर्भमालाविलम्बितम्।
प्रोक्ष्योपलिप्य विधिना श्वेतचूर्णैरलङ्कृतम्।।

'शन्नो निधत्ता'मुच्चार्य साङ्कुरैः पालिकादिभिः।
तन्मध्ये विष्टरं न्यस्य तदूर्ध्वे वस्त्रमास्तरेत्।।

स्नानद्रव्याणि संभृत्य नित्यपूजोक्तमार्गतः।
पुनरन्तः प्रविश्यैव देवदेवं प्रणम्य च।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



उच्चार्य शकुनं सूक्तं च देवमादाय चादरात्।
'अतो देवादि'मन्त्रेण स्थापयेत हरिं परम्।।

पूर्ववस्त्रं विसृज्यैव चान्यत् तत् [1]परिधाय च।
आवाहनादि पात्रं च पूर्ववत्स्थापयेद्बुधः।।

ब्राह्ममासनमास्थाय देवदक्षिणपार्श्वतः।
देवेशं प्राङ्मुखं वीक्षम् उत्तराभिमुखोऽर्चयेत्।।

उत्तराभिमुखं देवं पश्चिमाभिमुखोऽर्चयेत्।
तथैव दक्षिणे वीक्षं प्राङ्मुखस्सम्यगर्चयेत्।।

विपरीतेन चैवान्यदिङ्मुखं नार्चयेद्हरिम्।
तस्मात् सर्वप्रयत्नेन दक्षिणे सम्यगर्चयेत्।।
अथवा वामपार्श्वे वा वासयित्वार्चयेद्बुधः।।

नित्यपूजोक्तमार्गेण देहन्यासादि कारयेत्।
स्नानद्रव्याणि सर्वाणि यथार्हं प्रोक्षयेत् सुधीः।।

इन्द्रादिपरिवारादीन् तत्तत्स्थाने समर्चयेत्।
प्रणम्य देवदेवेशं स्थितिन्यासं समाचरेत्।।

पूर्ववद्ध्यानमाविश्य देवमानम्य पूर्ववत्।
अत्वरं देवमादाय स्नानपीठे निवेशयेत्।।

पूर्वं मन्त्रासनोक्तेन कारयेद्देशिकोत्तमः।
अष्टम्यां च नवम्यां च चतुर्दश्यां च पर्वणि।।

---

1. परिधाप्य (?)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



धावनाभ्यञ्जने चैव वर्ज्ये शास्त्रेण निश्चयः।
पश्चात् स्नानासनं कल्प्य पाद्यमाचमनं ददेत्।।

नित्यस्नानोक्तमार्गेण कारयित्वा विचक्षणः।
अलङ्कारासनं कल्प्य पादुके दापयेद्बुधः।।

'भूरसी'त्यादिमन्त्रेण चासनं संविशेत् सुधीः।
नित्यार्चनोक्तमार्गेण सर्वं दत्त्वा विचक्षणः।।

दण्डवत् प्रणमेद्भूमौ क्षमस्वेति प्रणम्य च।
पश्चाद् भोज्यासनं कल्प्य तस्योक्तं सर्वमाचरेत्।।

अपूपादीनि भक्ष्याणि देवेशाय निवेदयेत्।
पुनराचमनं दत्त्वा मुखवासं प्रदापयेत्।।

उपलाल्य च देवेशं यानमारोप्य पूर्ववत्।
यात्रासनोक्तमार्गेण कृत्वा सर्वं समाचरेत्।।

प्रदक्षिणं शनैः कृत्वा प्रविश्यान्तःपुरे पुनः।
द्वारपार्श्वे च तिष्ठन्तं भक्तांश्चैव समीक्ष्य च।।

विसर्जयित्वा भक्तानां गीर्भिः संमानपूर्वकम्।
अर्चापीठे प्रतिष्ठाप्य पूर्ववन्मन्त्रमुच्चरन्।।

पुष्पाञ्जलिं ददेत् पश्चात् विष्णुसूक्तं समुच्चरन्।
दिव्योपचारहीनश्चेत् क्षमस्वेति प्रणम्य च।।

भक्तियुक्तस्य या पूजा अधमाप्युत्तमा भवेत्।
भक्तिहीना च या पूजा उत्तमा सापि नश्यति।।

एवं यः कुरुते भक्त्या विष्णुलोकं स गच्छति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



## ८.११.३ शुद्धस्नपनप्रयोगः उत्तमकल्पः

**क्रि.३३.६४ - १०८**

अतः परं प्रवक्ष्यामि शुद्धस्नानविधिं हरेः।।

मण्डले त्वभिषेकार्थं बहिः सोपानमण्डपे।
संस्थापयेद्देवदेवं स्नापनालय एव वा।।

आस्थानमण्डपे वाऽथ कुर्याच्छुद्धाभिषेचनम्।
गोमयेनोपलिप्यैव मण्डपं चतुरश्रकम्।।

पञ्चवर्णैरलङ्कृत्य वितानस्तम्भवेष्टनैः।
मुक्तादामावलम्बैश्च पुष्पदामावलम्बनैः।।

पताकाभिर्ध्वजैश्चैव अलङ्कृत्य च सर्वतः।
सर्वत्र दीपानारोप्य तन्मध्ये सोत्तरच्छदम्।।

विष्टरं सुस्थिरं न्यस्य पूजकस्सुसमाहितः।
'भूः प्रपद्य' इति देवेशं प्रणम्यैवानुमान्य च।।

'परं रंहे'ति मन्त्रेण पीठादादाय चात्वरः।
स्वस्तिसूक्तं समुच्चार्य शाकुनं सूक्तमेव च।।

शङ्खघोषयुतं नीत्वा स्थापयेदत्र विष्टरे।
'प्रतद्विष्णुस्तवत' इति स्थापयित्वा समाहितः।।

'नारायणाय विद्मे'ति पादे पुष्पाणि विन्यसेत्।
पाद्यमाचमनं दत्त्वा पूर्वोक्तविधिना ततः।।

'अन्नाद्याये'ति मन्त्रेण दन्तधावनमाचरेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



तेनैव जिह्वाशुद्धिं च मुखप्रक्षालनं तथा।।

पुनराचमनं दत्त्वा प्लोतेन परिमृज्य च।
मुखवासं निवेद्यैव प्रणम्यैवानुमान्य च।।

देवस्यापरभागं तदाच्छाद्यैव गलादधः।
देवस्य पश्चिमे स्थित्वा गुरुस्तद्भावभावितः।।

'अतो देवादि' मन्त्रांश्च 'सोमं राजान' मुच्चरन्।
तैलेनाभ्यञ्जनं कृत्वा केशानाबध्य वै पुनः।।

सुगन्धिमालयाऽऽवेष्ट्य पाणी प्रक्षाल्य वै ततः।
ललाटात् पादपर्यन्तं तैलेनाभ्यज्य मर्दयेत्।।

शालिपिष्टेन देवाङ्गं विमृजेच्चन्दनेन वा।
अष्टम्यां च नवम्यां च चतुर्दश्यां च पर्वणि।।

अभ्यञ्जनं च दन्तानां धावनं वर्जयेत् तथा।
ततो देवं समासाद्य स्नानवेद्यां तु पूर्ववत्।।

प्राङ्मुखं स्थापयेत् सम्यक् तमिन्दुमुखमेव वा।
पाद्यमाचमनं दत्त्वा प्रणम्यैवानुमान्य च।।

'परिलिखित' मिति मन्त्रेण आम्लेन परिशोधयेत्।
तेनैव केशशुद्धिं च कुर्यादामलकादिभिः।।

'वारीश्चतस्र' इत्युक्त्वा वारिणा स्नापयेत् पुनः।
'नमो वरुण' इत्युक्त्वा स्नापयेत् पुष्पवारिणा।।

'सिनीवाली' ति देवाङ्गम् आलिप्य च हरिद्रया।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



'भूरानिलय' इत्युक्त्वा स्नापयेद् गन्धवारिणा।।

पुनराचमनं दत्त्वा वस्त्रं चैवोत्तरीयकम्।
दद्याद्यज्ञोपवीतं च तत्तन्मन्त्रमुदीरयन्।।

दत्त्वा चानामिकाङ्गुल्योः पवित्रे परहस्तयोः।
अष्टोपचारैरभ्यर्च्य वेदैः संस्तूय च क्रमात्।।

शङ्खपद्माङ्कपात्राभ्याम् आवर्जितजलेन च।
सहस्रधारापात्रेण पौरुषं सूक्तमुच्चरन्।।

नारायणानुवाकेन स्नापयित्वा ततः परम्।
देव्योश्च तत्तन्मन्त्राभ्यां तत्तन्मन्त्रैरथापि वा।।

संस्नाप्य चन्दनं दत्त्वा प्लोतेन परिमृज्य च।
वस्त्रखण्डेन धौतेन सूक्ष्मेनाच्छाद्य मन्त्रवित्।।

कल्पयित्वोत्तरासङ्गमलकानपि शोधयेत्।
पुनराचमनं दत्त्वा दद्यात् पुष्पाणि पादयोः।।

ततो देवं समादाय स्थापयेत् पूर्वविष्टरे।
सूक्ष्मकौशेयवस्त्रेण चित्रकक्ष्यायुतेन च।।

अलङ्कृत्य च देवेशं यथा चक्षुर्मनःप्रियम्।
विसृज्यालकबन्धं च धूपं दत्त्वा यथोचितम्।।

उत्तरीयोपवीताभ्यां भूषणैरपि भूषयेत्।
आसनादिभिरभ्यर्च्य दीपान्ताचमनान्तकैः।।

नित्यार्चनोक्तविधिना दर्पणादीन् यथाविधि।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



राजवद्विग्रहांश्चापि तत्तन्मन्त्रैः प्रयोजयेत्।।

मात्रादानं च कृत्वा तु मधुपर्कं निवेद्य च।
'अथावनीद' मन्त्रेण मण्डलं चतुरश्रकम्।।

कृत्वाऽत्रास्तीर्य धौतं च पत्रं प्रागुत्तराग्रकम्।
प्रागग्रमुत्तराग्रं वा संन्यसेत् कदलीभवम्।।

'आ मा वाजस्य' मन्त्रेण क्षालयेत् प्रोक्षयेत् तु वा।
हविः पात्राधिपं सूर्यं तस्य पार्श्वे समर्चयेत्।।

'देवस्य त्वे'ति मन्त्रेण घृतेनाप्यभिघार्य च।
'अमृतोपस्तरणमसी'ति हविः प्रक्षिप्य तत्र वै।।

फलं गुडोपदंशादीन् दधिक्षीरमथापि वा।
तत्र निक्षिप्य गायत्र्या देवेशायेति संस्मरन्।।

तस्यैव परितो दिक्षु प्रागादिषु यथाक्रमम्।
पायसान्नेन चत्वारि शुद्धान्नेन हवींषि च।।

पात्रैः पञ्चभिरादाय त्रिपादोपरि विन्यसेत्।
'यत्ते सुसीम' इत्युक्त्वा घृतमास्राव्य तत्र वै।।

अभिमृश्यान्नसूक्तेन दद्यादाचमनं पुनः।
'तदस्य प्रिय'मित्युक्त्वा 'सुभूः स्वय'मुदीर्य च।।

हविर्निवेदयेद्विष्णोः प्रभूतं भक्तिसंयुतम्।
अमन्त्रकं द्वितीयं च तृतीयं च निवेदयेत्।।

अर्चकस्य मनस्तृप्तिर्यावता संनिवेदयेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



चतुर्दिक्षु त्रिपादोर्ध्वे न्यस्तान्यपि हवींषि च।।
मूर्तीनां पुरुषादीनां तत्तन्मन्त्रैर्निवेदयेत्।
आज्येन साज्यचरुणा होमं हुत्वा यथाविधि।।

'इदं विष्णु'रिति प्रोच्य पानीयं स्वादु शीतलम्।
प्रस्थपूर्णेन पात्रेण पञ्चधैव निवेदयेत्।।

पुनराचमनं दत्त्वा मुखवासं निवेदयेत्।
अपूपान् पृथुकान् लाजान् कदल्यादिफलानि च।।

निवेद्याष्टाक्षरेणैव नारिकेलफलानि च।
पुनराचमनं दत्त्वा मुखवासं निवेदयेत्।।

परीत्य मन्दिरं पश्चात् सर्वालङ्कारसंयुतम्।
स्थापयेज्जीवस्थाने तु 'भूरसि भू'रिति ब्रुवन्।।

## ८.११.४ शुद्धस्नपनप्रयोगः मध्यमकल्पः

**क्रि.३३. १०९ - ११५**

विना राजोपचारैश्च प्रभूतहविषा तथा।
[1]स्थापयित्वा समभ्यर्च्य दत्त्वा पञ्चविधं हविः।।

अर्चापीठे न्यसेद्देवम् इदं मध्यममीरितम्।
नित्याभिषेचनान्ते च देवान् संस्थाप्य तत्र च।।

पाद्यमाचमनं दत्त्वा कृत्वा वै दन्तधावनम्।

---

1. स्नापयित्वा (?)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



दर्पणं दर्शयित्वा तु मुखवासं निवेद्य च।।

तैलेनाभ्यज्य चाम्लाद्यैः शोधयित्वाऽभिषिच्य च।
हरिद्रयाङ्गमालिप्य गन्धोदैरभिषिच्य च।।

अष्टोपचारैरभ्यर्च्य स्नापयित्वा च पूर्ववत्।
जीवस्थाने प्रतिष्ठाप्य वस्त्रेणाच्छाद्य पूर्ववत्।।

आसनादिभिरभ्यर्च्य दीपान्ताचमनान्तकैः।
शुद्धान्नमेव देवाय हविर्दद्यात् समन्त्रकम्।।

पानीयाचमनं दत्त्वा मुखवासं निवेदयेत्।
एष एव विशेषः स्यात् अन्यत् सर्वं च [1]पूर्ववत्।।

***

1. उत्तमकल्पवत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

# १२. पञ्चगव्यप्रोक्षणम्

## ८.१२.१ आलयादीनां शुद्ध्यर्थं पञ्चगव्येन प्रोक्षणम्
क्रि.३३.३४ - ४७

अतः परं प्रवक्ष्यामि पञ्चगव्यस्य लक्षणम्।
देहबेरालयादीनां शृद्ध्यर्थं यत् प्रयुज्यते।।

सूतसात्त्वतचण्डालसूतिकादिप्रवेशने।
पञ्चगव्यं तु संयोज्य प्रोक्षयेत्तेन मन्दिरम्।।

पञ्चगव्यानि सङ्गृह्य पञ्चपात्रेषु पूरयेत्।
देवाग्रे मण्डपे चैव यज्ञवाटे तथैव च।।

स्वगृहस्याङ्गणे चैव गोमयेनोपलिप्य च।
तन्मध्ये षोडशदलां रङ्गवल्लीं च कारयेत्।।

द्रोणार्धतण्डुलैः पूर्णं कांस्यपात्रं प्रगृह्य च।
तन्मध्ये विलिखेत् पद्मं दलपञ्चकसंयुतम्।।

पात्राणि पञ्चगव्यानां विन्यसेत् तद्दलेषु च।
मध्य आज्यं प्रतिष्ठाप्य पूर्वस्मिन् दधि निक्षिपेत्।।

क्षीरं तु दक्षिणे चैव गोमयं पश्चिमे तथा।
उत्तरे चैव गोमूत्रं क्रमेण स्थापयेद् बुधः।।

घृते तु सामवेदं च दध्नि ऋग्वेदमेव च।
क्षीरे अथर्ववेदं च गोमये स्कन्दमेव च।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



शर्वं देवं च गोमूत्रे अधिदेवान् समर्चयेत्।
आज्यं 'शुक्रमसी'त्युक्त्वा षोडशांशं प्रगृह्य च।।

'दधिक्राव्ण' इत्युक्त्वा क्षिप्त्वा तद्द्विगुणं दधि।
'आप्यायस्वे'ति मन्त्रेण त्रिगुणं क्षीरमाहरेत्।।

'गन्धद्वारे'ति मन्त्रेण गोमयं च चतुर्गुणम्।
षड्गुणं चैव गोमूत्रं गायत्र्या तत्र निक्षिपेत्।।

'वसोः पवित्र'मित्युक्त्वा एकीकुर्यात्तु पञ्चकम्।
पञ्चगव्याधिदेवस्य मूर्तिमन्त्रं वदाम्यहम्।।

'पञ्चगव्यं शिवं चेशमव्यक्तमि'ति पूजयेत्।
जपित्वा विष्णुसूक्तं च रुद्रमन्यं त्रियम्बकम्।।

'अणोरणीयानि'त्युक्त्वा 'आपो हि ष्ठा'दिभिस्तथा।
प्रोक्षणैरनुवाकैश्च प्रोक्षयेत् सर्वमन्दिरम्।।

**८.१२.२ देहशुद्ध्यर्थं पञ्चगव्यप्राशनक्रमः**

**क्रि.३३.४८, ४९.५३, ५४**

'शन्नो देवी'रिति प्रोच्य पञ्चगव्यं च त्रिः पिबेत्।
पञ्चगव्यं तथा पीत्वा पूतो भवति निश्चयः।।

आचार्यकरदत्तं तत् पञ्चगव्यं पिबेद् बुधः।

----------------------------------------

आचार्यकरदत्तं तु त्रिः पिबेत् पञ्चगव्यकम्।।

पञ्चगव्यं तथा पीत्वा सर्वपापैः प्रमुच्यते।

***

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

## १३. पञ्चगव्यस्नपनम्

### ८.१३.१ शुभप्रदानि पञ्चगव्यानि

**क्रि.३३. २०, २१**

कपिलाया वरं क्षीरं श्वेताया दधि शस्यते।
रक्तायाश्च घृतं ग्राह्यं कृष्णाया गोमयं तथा।।

गोमूत्रं नीलवर्णायाः पञ्चगव्यं शुभप्रदम्।

### ८.१३.२ पञ्चगव्यानां प्रमाणम्

**क्रि.३३. २१, २२**

प्रस्थपादं घृतञ्चैव दधि तद्द्विगुणं स्मृतम्।।

त्रिगुणं क्षीरमित्युक्तं गोमयन्तु चतुर्गुणम्।
षड्गुणञ्चैव गोमूत्रं पञ्चगव्यं सुयोजयेत्।।

### ८.१३.३ ग्राह्याणि पञ्चगव्यानि

**क्रि.३३. २३, २४**

पतितं गोमयं श्रेष्ठं गोमूत्रञ्चाप्यपातितम्।
धारोष्णं क्षीरमादेयं सद्यस्तप्तं घृतं तथा।।

दधि चाप्यनतीताहमेतद् गव्यस्य लक्षणम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



## ८.१३.४ पञ्चगव्यैः भगवतः स्नापनम्

**क्रि.३३. १७ - १९, २४ - ३३**

अतः परं प्रवक्ष्यामि पञ्चगव्यविधिं हरेः।।

तण्डुलोपरि देवाग्रे स्थण्डिले चतुरश्रके।
पद्ममष्टदलं कृत्वा तन्मध्ये प्रणवं न्यसेत्।।

प्रागादीशानपर्यन्तं दलेष्वष्टाक्षरं न्यसेत्।
तत्पद्मं कुशपुष्पाद्यैरलङ्कृत्य तथोपरि।।

---------------------------------------

मध्ये पदे तु गोमूत्रं दधि पूर्वं यमे घृतम्।।

क्षीरञ्च पश्चिमे सौम्ये गोमयं स्थापयेत्क्रमात्।
आग्नेय्यां गन्धतोयञ्च नैर्ऋत्यामाम्लकं तथा।।

वायव्यामपि हारिद्रमैशान्याञ्च कुशोदकम्।
एवं क्रमेण विन्यस्य अधिदेवांत्समर्चयेत्।।

गोमूत्रे जाह्नवी प्रोक्ता यजुर्वेदश्च दध्नि वै।
सामवेदो घृते प्रोक्तः क्षीरे ऋग्वेद एव च।।

अथर्वा गोमये चैव अभ्यर्च्या अष्टविग्रहैः।
गायत्र्या चैव गोमूत्रं 'दधिक्राव्णे'ति वै दधि।।

आज्यं 'शुक्रमसी'त्युक्त्वा 'आप्यायस्वे'ति वै पयः।
गोमयं 'गन्धद्वारे'ति 'देवस्य त्वा' कुशोदकम्।।

एवं क्रमेण संयोज्य चतुर्वेदादिमन्त्रकैः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



स्नापयेत्पञ्चगव्येन आम्लेन च सुशोधयेत्।।
'सिनीवाली'ति हारिद्रैर्गन्धै'भूनिले'ति च।
स्वादुशीतलतोयेन आम्लेन च सुशोधयेत्।।

संस्नाप्य वस्त्राभरणैरलङ्कृत्य निवेदयेत्।

## ८.१३.५ पञ्चगव्यस्नापनफलम्

**प्र.३५.४११**

स्नापनात् पञ्चभिर्गव्यैः पापं नश्यति सर्वथा।

**क्रि.३३.४७**

## ८.१३.६ पञ्चगव्यप्राशनफलम्

**क्रि.३३. ३२ , ३३**

अभिषिक्तावशिष्टं तदमृतं गव्यमेव वा।।

प्राशयित्वा महापापैरुपपापैः प्रमुच्यते।
ऐहिकान् सकलान् भोगान् भुक्त्वा सायुज्यमाप्नुयात्।।

***

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

# १४.पञ्चामृतस्त्रपनम्

## ८.१४.१ पञ्चामृतलक्षणम्

**क्रि.३३. ७**

गुडं क्षीरं दधि घृतं मधु सर्वं समन्वितम्।
पञ्चामृतं तु विज्ञेयं स्नानार्थं शार्ङ्गिणः प्रियम्।।

## ८.१४.२ पञ्चामृतस्त्रपनप्रयोगः

**क्रि.३३. ३ - ६ ; ८ - १६**

देवस्य पुरतः सम्यक् गोमयेनोपलिप्य च।।

यवैर्वा तण्डुलैर्वात्र द्विहस्तायतविस्तृतम्।
स्थण्डिलं कल्पयित्वाऽष्टदलं पद्मं च कल्पयेत्।।

पद्मस्योर्ध्वे तु पुष्पाणि प्रक्षिपेत् तुलसीं तु वा।
पद्माकारस्य मध्ये तु प्रणवं विलिखेद्बुधः।।

प्रागादीशानपर्यन्तं दलेष्वष्टाक्षरं लिखेत्।
कलशांश्च समाहृत्य तन्तुना वेष्टयेद्गुरुः।।

---------------------------------

पञ्चाभिषेककलशान् पूरयेदमृतेन वै।
गुडसंमिश्रितं तोयं पद्ममध्ये सुविन्यसेत्।।

क्षीरसंपूर्णकलशं प्राच्यां पद्मदले न्यसेत्।
दधिसंपूर्णकलशं विन्यसेद्दक्षिणे दले।।

पश्चिमे दधि (घृत ?) पात्रं तु उत्तरे च मधु न्यसेत्।
आग्नेयादिदलेष्वेवम् उपस्नानानि विन्यसेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



मध्ये चैकमुपस्नानं विन्यसेत् तु विचक्षणः।
चन्द्रं चाथर्ववेदं च यजुः साम ऋचं तथा।।

मध्यादीशानपर्यन्तम् उपस्नाने तथैव च।
आदित्यमश्विनौ चैव रुद्रं चैव तु वत्सरान्।।

प्रागादि पञ्चवायूंश्च मध्यादिषु समाह्वयेत्।
देवदेवं समादाय स्थापयेदथ पश्चिमे।।

पाद्याद्यैरर्चयेद्विद्वान् स्नपनोक्तविधानतः।
'सोमं राजान'मित्युक्त्वा 'शन्नोदेवी'रिति क्रमात्।।

'इषे त्वोर्जे त्वे'ति जपन् 'अग्न आयाहि वी'ति च।
'अग्निमील' इति प्रोच्य देवेशं स्नापयेद्बुधः।।

'वारीश्चतस्र' इत्युक्त्वा सर्वोपस्नानमाचरेत्।

### ८.१४.३ पञ्चामृतादिप्राशनफलम्

**क्रि.३३. ३२, ३३**

अभिषिक्तावशिष्टं तत् अमृतं गव्यमेव वा।।

प्राशयित्वा महापापैरुपपापैः प्रमुच्यते।
ऐहिकान् सकलान् भोगान् भुक्त्वा सायुज्यमाप्नुयात्।।

### ८.१४.४ पञ्चामृतस्नपनफलम्

**क्रि.३३. १६, १७**

एवं पञ्चामृतस्नानं सर्वशान्तिकरं परम्।।

राजराष्ट्रर्द्धिजननं सर्वाभीष्टफलप्रदम्।

***

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

# १५.महाभिषेकः

## ८.१५.१ महाभिषेकमहिमानुवर्णनम्

**स.६४. १ - ६**

अतः परं प्रवक्ष्यामि ह्यभिषेकविधिं परम्।
विष्णोर्नारायणस्यैव देवदेवस्य शार्ङ्गिणः।।

कृत्वा महाभिषेकं तु सागरान्तां महीमिमाम्।
प्राप्नुवन्ति हि राजानः सकलं चायुषं वरम्।।

इन्द्रादिलोकपालाश्च देवाश्चानेन कर्मणा।
प्राप्तास्ते लोकपालत्वं हरेरेव प्रसादतः।।

पृथुश्च जनकश्चैव मान्धाता नृपतिस्तथा।
कृत्वा महाभिषेकं तु दीर्घकालमिमां महीम्।।

पालयामासुरखिलां प्रेत्य सिद्धिं परां गताः।
अन्येऽप्यखिलकामांस्तु प्राप्यैवापुः परां गतिम्।।

तत् सर्वसाधनं कर्म शृणुतैतत् समाहिताः।

## ८.१५.२ महाभिषेककालः

**स.६४. ६, ७**

अयने चोत्तरे चैव शुभर्क्षे श्रवणादिके।।
शुभवारे तिथौ शुक्ले स्थिरराशौ समाचरेत्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



## ८.१५.३ महाभिषेके अङ्कुरार्पणम्

**स.६४. ७**

[1]तस्मात् तु दिवसात् पूर्वमङ्कुरानर्पयेत् क्रमात्।।

## ८.१५.४ महाभिषेके कूटादिकल्पनम्

**स.६४. ८ - १२**

प्रमुखे चोत्तरे कुर्यात् कूटं वाऽथ प्रपां तु वा।
हस्तैरादित्यसङ्ख्याकैः ऋत्विक् सङ्ख्यैरथापि वा।।

विस्तीर्णमिति देवान्तं स्थानं तत्तत्तलोच्छ्रयम्।
पदान्तरं चतुर्हस्तमुच्छ्रयं च यथोचितम्।।

तोरणानि चतुर्दिक्षु तत्र कुर्याद्यथाविधि।
वितानैश्च समाच्छाद्य स्थूणा वस्त्रेण वेष्टयेत्।।

मुक्तावलिध्वजैः पुष्पैः पल्लवैनार्दगवल्लिभिः।
कदलीपूर्णकुम्भाद्यैरङ्कुरैर्दर्भमालया।।

समन्तात् समलङ्कृत्य भक्त्या शक्त्या विशेषतः।

## ८.१५.५ भूमण्डलादिकल्पनपूर्वकं भगवतः अभिषेचनम्

**स.६४. १२ - ३२**

लिखेदत्र यथान्यायं भूमिमण्डलमुत्तमम्।।

तन्मध्ये च महामेरुं कल्पयेच्छ्लक्ष्णया मृदा।
मृदङ्गाकृति हस्तं तु तस्योत्सेधो विधीयते।।

1. महाभिषेकदिवसात्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



विष्टम्भं चैकहस्तं तु पूर्वतः श्वेतवर्णकम्।
रक्तं दक्षिणतः पीतं पश्चिमे कृष्णमेव च।।

उत्तरे तं तु सर्वत्र रत्नाढ्यं हेमभूषितम्।
लिखेत् पूर्ववदायामं दक्षिणे चोत्तरेऽपि च।।

त्रींस्त्रीनद्रिविशेषान् वै विस्तारः षोडशाङ्गुलः।
हिमाद्रिं श्वेतवर्णं च हेमकूटं च पिङ्गलम्।।

निषधं रक्तवर्णं च क्रमशो दक्षिणे लिखेत्।
नीलाद्रिं नीलवर्णं च श्वेतं श्वेतगिरिं तथा।।

शतशृङ्गं च हेमाभं लिखेत् तस्योत्तरे तथा।
धातुभिर्वर्णयेत् तत्र जम्बूद्वीपमिदं तथा।।

लवणाब्ध्यपरे तत्र शाकद्वीपं तु तद्बहिः।
ततः क्षीरार्णवस्यान्ते कुशद्वीपमतः परम्।।

घृतोदधिः क्रौञ्चद्वीपो दध्यब्धेः शाल्मलिस्तथा।
सुरोदधिश्च गोमेधद्वीपश्चेक्षुरसोदधिः।।

पुष्करद्वीप उद्दिष्टः प्लक्षः शीतार्णवाद्बहिः।
लोकालोकमहाभूभृत्प्रावृतं तु ततो बहिः।।

इन्द्रादिलोकपालानां दिक्षु लोकान् क्रमान्न्यसेत्।
पूर्वेद्युरेव सकलं विन्यस्यैव यथाविधि।।

वास्तुहोमं ततो हुत्वा पूर्वरात्रौ विशेषतः।
सैकते स्थण्डिले चैव लोकपालान् समर्चयेत्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



आचार्याद्यैश्च पूर्वोक्तैरभिषेकं च कारयेत्।
वस्त्रैराभरणाद्यैश्च पूजकान् पूजयेत् क्रमात्।।

सन्ध्यायां लोकपालांश्च हविषा दक्षिणादिभिः।
यथाशक्ति प्रपूज्यैव तस्य तस्यायुधानपि।।

सौवर्णानेव संदध्याच्छक्तिर्भवति चायुधैः।
आचार्यः श्रद्धया युक्तो महामेरुं समर्चयेत्।।

महामेरूर्महीभर्ता देवावासस्तथैव च।
शैलेन्द्रश्चेति तं विद्वांश्चतुर्मूर्तिक्रमेण वै।।

तस्य मूर्धनि देवेशं प्राङ्मुखं क्रोडरूपिणम्।
आदिवाराहमित्युक्त्वा तथा यज्ञेश्वरं त्विति।।

उर्वीसंधारणं चेति वेदवादमिति क्रमात्।
मेरुमध्ये ततः सूर्यमतः प्राच्यां चतुर्मुखम्।।

उत्तरे भूमिदेवीं च जम्बूशाखां च दक्षिणे।
सुखशीतघनच्छायां सङ्कल्प्यैव समर्चयेत्।।

सङ्गोष्य कौतुकं बद्ध्वा चाधिवास्य यथाविधि।
कलशैर्दशभिर्द्वाभ्यां पञ्चगव्यादिपूरितैः।।

अभिषिच्य च देवेशं तत्स्थाने स्थापयेत् क्रमात्।

## ८.१५.६ महाभिषेकाङ्गं होमः

**स.६४. ३२ - ३५**

मेरोस्तु पश्चिमे कुण्डमौपासनविधानतः।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



कृत्वा तत्र निधायाग्निं हुत्वाघारं यथाविधि।
परिषिच्य जुहोत्याज्यं मन्त्रैरेतैरनुक्रमात्।।

आदिवराहाय स्वाहा यज्ञेश्वराय स्वाहा उर्वीसंधारणाय स्वाहा वेदरूपाय स्वाहा विष्णवे स्वाहा पुरुषाय स्वाहा सत्याय स्वाहा अच्युताय स्वाहा अनिरुद्धाय स्वाहा वासुदेवाय स्वाहा सङ्कर्षणाय स्वाहा प्रद्युम्नाय स्वाहा अनिरुद्धाय स्वाहा ब्रह्मणे स्वाहा चतुर्मुखाय स्वाहा हिरण्यगर्भाय स्वाहा प्रजापतये स्वाहा मार्कण्डेयाय स्वाहा महामुनये स्वाहा लोकचक्षुषे स्वाहा सहस्रांशवे स्वाहा मेदिन्यै स्वाहा उर्व्यै स्वाहा इन्द्राय स्वाहा शचीपतये स्वाहा पुरुहूताय स्वाहा पुरन्दराय स्वाहा सहस्राक्षाय स्वाहा प्रेताधिपतये स्वाहा वरुणाय स्वाहा अम्बुनाथाय स्वाहा सोमाय स्वाहा द्विजराजाय स्वाहा अग्नये स्वाहा हव्यमुखाय स्वाहा निर्ऋतये स्वाहा रक्षोधिपतये स्वाहा हेमकूटाय स्वाहा नीलाय स्वाहा श्वेतशैलाय स्वाहा शतश्रृङ्गाय स्वाहा महाव्याहृतये स्वाहा गन्धमादनाय स्वाहा जम्बूद्वीपाय स्वाहा लवणार्णवाय स्वाहा शाकद्वीपाय स्वाहा क्षीरार्णवाय स्वाहा कुशद्वीपाय स्वाहा अमृतार्णवाय स्वाहा क्रौञ्चद्वीपाय स्वाहा दधिमहोदधये स्वाहा शाल्मलीद्वीपाय स्वाहा सुरोदधये स्वाहा गोमेधद्वीपाय स्वाहा इक्षुरसार्णवाय स्वाहा पुष्करद्वीपाय स्वाहा शीतोदधये स्वाहा लोकालोकाय स्वाहा भूलोकाय स्वाहा भुवर्लोकाय स्वाहा सुवर्लोकाय स्वाहा जनोलोकाय स्वाहा तपोलोकाय स्वाहा सत्यलोकाय स्वाहा ब्रह्मलोकाय स्वाहा वसुलोकाय स्वाहा रुद्रलोकाय स्वाहा आदित्यलोकाय स्वाहा नागलोकाय स्वाहा विष्णुलोकाय स्वाहा अतलाय स्वाहा सुतलाय स्वाहा वितलाय स्वाहा प्रतलाय स्वाहा धातकीतलाय स्वाहा विद्रूपतलाय स्वाहा संफुल्लाग्रतलाय स्वाहा महातलाय स्वाहा अनन्ताय स्वाहा दिग्गजेभ्यः स्वाहा कपिलाय स्वाहेति।।

एवं हुत्वा यथान्यायं जुहुयात् पारमात्मिकम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



हुत्वा पुरुषसूक्तं च विष्णुसूक्तं च वैष्णवम्।।

अष्टाविंशति हुत्वा तु महाव्याहृतिसंयुतम्।
इन्द्रादिलोकपालानां दिशां होमं च हूयते।।

## ८.१५.७ महाभिषेकानन्तरं मौलिपूजनम्

**स.६४. ३६ - ५१**

अष्टौ वा कलशा ग्राह्याः षोडशप्रस्थसंयुताः।
सर्वौषध्युदकं चैव सर्वपुष्पोदकं तथा।।

सर्वरत्नोदकं चैव सर्वधान्योदकं तथा।
सर्वतीर्थोदकं चैव सर्वगन्धोदकं तथा।।

अक्षतोदकमुद्दिष्टं कुशदर्भोदकं तथा।
मेरोरुत्तरपार्श्वे तु विन्यसेत् कलशान् क्रमात्।।

मध्ये मौलिं प्रतिष्ठाव्य धान्यपीढे विधानतः।
'जातरूपमयाये'ति 'मकुटाय' तथैव च।

गणाधिपतयेत्युक्त्वानन्तायेति च क्रमात्।
पुष्पादिभिः समभ्यर्च्य षड्विग्रहविधानतः।।

अष्टभिः कलशैर्मौलिं संस्थाप्य च विधानतः।
अम्बरं छादयेत् तत्र चामरैरुपवीजयेत्।।

अभिषेकान्त उद्धृत्य जयशब्दसमन्वितम्।
कनिक्रददादिकं जप्त्वा देवपार्श्वे निधापयेत्।
देवदेवं च पाद्याद्यैरर्चयेदष्टविग्रहैः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



पीताम्बरधरं विष्णुं कौस्तुभोद्भासितं परम्।।

श्रीवत्सलक्षणोरस्कं सर्वदेवसमावृतम्।
हृदि संचिन्त्य मनसा प्रणवात्मानमव्ययम्।।

यजमानः स्वयं मौलिमुद्धृत्य च समाहितः।
आचार्यहस्ते संदद्याद्देवेशं मनसा स्मरन्।।

आचार्योऽपि प्रसन्नात्मा ध्यात्वा तं परमं हरिम्।
विष्णुसूक्तं च जप्त्वैव जपेदेकाक्षरादिकम्।।

ध्रुवसूक्तं ततो जप्त्वा भूतो भूतेष्विति ब्रुवन्।
ध्रुवे वा कौतुकादौ वा मकुटानि यथार्हतः।।

पूजयेद्देवदेवं तं चत्वारः स्थापकाः क्रमात्।
चतुर्दिक्षु जपेयुस्ते तत्र सूक्तं ध्रुवाह्वयम्।।

पुरुषसूक्तं च जप्त्वैव जपेदेकाक्षरादिकम्।
विष्णुसूक्तं जपेयुस्ते चतुर्दिक्षु समन्विताः।।

देवदेवं समभ्यर्च्य पूर्वोक्तेन विधानतः।
पायसं कृसरं गौल्यं यावकं च निवेदयेत्।।

अन्तहोमं च हुत्वा तु प्रणामान् पञ्च चाचरेत्।

## ८.१५.८ महाभिषेकफलम्

### स.६४. ५१ - ५६

भक्त्या यः कुरुते विष्णोरभिषेकं विधानतः।।

काम्यं च चक्रवर्तित्वं प्राप्य निष्कण्टकां महीम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



चतुस्सागरपर्यन्तां प्राप्नोत्येव विशेषतः।।

अर्घ्यान्तं कारयेद्यस्तु विष्णुलोक समाराद्य।
भक्त्या च परया युक्तो विष्णुवन्मोदते चिरम्।।

एतेन विधिना विष्णोरालये तस्य संनिधौ।
अभिषेकं वरं राज्ञा कारयेदिति शासनम्।।

श्रियो देव्याश्च भूदेव्या देवदेवस्य चोपरि।
राजा तस्य प्रसादेन भूराज्यं श्रियमाप्नुयात्।।

अनेन तत्प्रसादेन तदा संपदमाप्नुयात्।
इह लोके सुखान् भुक्त्वा अन्ते मोक्षं समाप्नुयात्।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

Students Offset, T

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.